சாரங்கள் (11) தானங்கள் அல்லது 'பிடிகள்', வரிசையுள்ளவை, வரிசை தப்பியவை (12) ஸ்வரங்களைப் பல வகையாகத் தொகுத்து தானங்களை கற்பனை செய்யும் வழி (13) தானங்களின் தொகைக் கணக்குப் பார்க்கும் சுலபமான வழி (14) தானங்களின் வரிசைக் கிரமத்தைக் கண்டு பிடித்தல் (15) இரண்டு ஸ்வரங்களின் அம்சங்கள் சேர்ந்த சாதாரண ஸ்வரங்கள் (16) சாதிகள் என்னும் தாய் ராகங்களின் சேர்க்கையால் உண்டாகும் சாதாரண சாதிகள் (17) ஷட்ஜம், மத்யமம் இந்த இரண்டு ஸ்வரங்களைக் குறைத்துப் பிடிப்பதனால் ஏற்படும் புதிய ஸ்வரங்கள்—காகலி, அந்தரம் (18) கானக்கிரியைகளின் வகைகளாகிய 'வர்ணங்களும்' அவற்றின் உட்பிரிவுகளாகிய 'அலங்காரங்களும்' (19) சாதிகள் என்னும் தாய் ராகங்களின் ரஞ்சனத்திற்கான முக்கிய ஸ்வரங்கள்—கிரஹம், அம்சம் முதலியன.

अथ नादोत्पत्तिः ।

गीतं नादात्मकं वाद्यं नादव्यक्त्या प्रशस्यते ।
तद्द्वयानुगतं नृत्यं नादाधीनमतस्त्रयम् १२ ॥

नादेन व्यज्यतेवर्णः पदंवर्णात्पदाद्वचः ।
वचसोव्यवहारोयं नादाधीनमतो जगत् ॥ १३ ॥

आहतोऽनाहतश्चेति द्विधानादोनिगद्यते ।
सोयं प्रकाशतेपिण्डे तस्मात्पिण्डोऽभिधीयते ॥ १४ ॥

तत्रानाहतनादं तु मुनयस्समुपासते ।
गुरूपदिष्टमार्गेण मुक्तिदं नतुरञ्जकम् ॥ १५ ॥

सनादस्त्वाहतोलोके रञ्जको भवभञ्जकः ।
श्रुत्यादि द्वारतस्तस्मात्तदुत्पत्तिर्निरूप्यते ॥ १६ ॥

(12—16) Sound, its importance, its 2 kinds, ahata (the beaton) and anahata (unbeaten); the latter cognised by yogis only leading to emancipation of the soul-the former pleasing to the ear, leads also to eternal bliss.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(சு. 12-16) நாதம் அதன் முக்கியத்துவம். அதன் இருவகை—ஆஹதம் (அடிக்கப்பட்டது-) அநாஹதம் (அடிக்கப்படாதது.) அநாஹதம்:—யோகிகளே கேட்கக்கூடியது. மோட்சத்தைக் கொடுக்கக்கூடியது. ஆஹதம் யாவரும் அனுபவிக்கக் கூடியது ; அதுவும் பிரம்ம ஆனந்தத்தை யளிக்கவல்லது.

तत्र शारीर विवेकः ॥ गुदलिङ्गान्तरेचक्रं आधाराख्यं चतुर्दलम् ।
स्वाधिष्ठानं लिङ्गमूलेषट्पत्रं चक्रसंज्ञकम् ॥ १७ ॥

नाभौदशदलं चक्रं मणिपूरकसंज्ञकम् ।
हृदयेऽनाहतं चक्रं शिवस्य प्रणवाकृतेः ॥ १८ ॥

पूजास्थानं तदिच्छन्ति युतं द्वादशभिर्दलैः ।
कण्ठे नु भारतीस्थानं विशुद्धिःषोडशच्छदम् ॥ १९ ॥

तत्र षड्जादयः सप्तस्वराः सम्यक्प्रभेदतः ।
ललनाख्यं घण्टिकायां चक्रं द्वादशपत्रकम् ॥ २० ॥

भ्रूमध्ये द्विदलं चक्रं आज्ञासंज्ञं मनोरमम् ।
ततोप्यस्ति मनश्चक्रं षड्दलं सर्वसौख्यदम् ॥ २१ ॥

ततोपि षोडशदलं सोमचक्रं प्रकीर्तितम् ।
चक्रं सहस्रपत्रन्तु ब्रह्मरन्ध्रं सुधाधरम्
तत्सुधासारधाराभिरभिवर्द्धयते तनुम् ॥ २२ ॥

सुषुम्णया ब्रह्मरन्ध्रं आरोहत्यवरोहति ।
जीवः प्राणसमारूढो रज्वा कोलाटिको यथा ॥ २३ ॥

* तास्तु भूरितरास्तासु मुख्याः प्रोक्ताश्चतुर्दश ॥ २४ ॥

---

* अयं उत्तरार्धः । अस्यपूर्वार्धः सँगीतरत्नाकरे यथा । 'सुषुम्नां परितो नाड्यः कन्दादाब्रह्मरंध्रत इति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुषम्नेडा पिङ्गला च कुहूरथपयस्विनी ।
गान्धारी हस्तिजिह्वाच वारणाथयशस्विनी ॥ २५ ॥

विश्वोदराशङ्खिनीच ततः पूषा सरस्वती ।
अलम्बुषेति तत्राद्यास्तिस्रो मुख्यतमा मताः ॥ २६ ॥

(17—26) The 9 chakras or nerve centres and the 14 principal nadis or nerves in the human body.

(சு. 17-26) ஒன்பது நாடிச் சக்கிரங்களும், 14 முக்கிய நாடிகளும்.

एवं विधेतु देहेस्मिन् मलसंचयसंवृते ।
प्रसाधयन्तिधीमन्तो भुक्तिमुक्तिमुपायतः ॥ २७ ॥

अथनादस्य चोत्पत्तिं वक्ष्ये शास्त्रविवेकतः ।
धर्मार्थकाममोक्षाणामिदमेवैकसाधनम् ॥ २८ ॥

नादविद्यां परांलब्ध्वा सरस्वत्याः प्रसादतः ।
कम्बलाश्वतरौ नागौ शम्भोः कुण्डलतां गतौ ॥ २९ ॥

पशुः शिशुर्मृगोवापि नादेन परितुष्यति ।
अतो नादस्य महात्म्यं व्याख्यातुं केनशक्यते ॥ ३० ॥

तथाच आञ्जनेयः । नादाब्धेस्तु परं पारं नजानातिसरस्वती ।
अद्यापि मज्जनभयात् तुम्बं वहति वक्षसि ॥ ३१ ॥

तथाचविज्ञानेश्वरः । वीणावादनतत्वज्ञः श्रुतिजातिविशारदः ।
तालज्ञश्चाप्रयासेन मोक्षमार्गं निगच्छति* ॥ ३२ ॥

27—32 In praise of music.

---

* याज्ञवल्क्यस्मृतिवचनमेतत् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(சு. 27-32) சங்கீதத்தின் பெருமை.

आत्मना प्रेरितंचित्तं वह्निमाहन्ति देहजम् ।
ब्रह्मग्रन्थिस्थितंप्राणं सप्रेरयति पावकः ॥ ३३ ॥

पावकप्रेरितः सोथ क्रमादूर्ध्वपथाचरन् ।
अतिसूक्ष्मध्वनिं नाभौ हृदिसूक्ष्मं गले पुनः ॥ ३४ ॥

पुष्टं शीर्षे त्वपुष्टं च कृत्रिमं वदने तथा ।
आविर्भावयतीत्येवं पञ्चधा कीर्त्यते बुधैः ॥ ३५ ॥

कथं कण्ठस्थितः पुष्टः स्यादपुष्टश्शिरस्थितः ।
उच्यते तत्रशिरसि संचार्यारोह वर्णयोः ।
सम्भूतिर्न भवेद्यस्मादपुष्टःशिरसिस्थितः ॥ ३६ ॥

33—36 How voice is produced—its five kinds.

(சு. 33-36) சரீரத்தில் நாதம் உண்டாகும் இடம், அதன் ஐந்து வகைகள்.

नकारं प्राणनामानं दकारमनलं विदुः ।
जातः प्राणाग्निसंयोगात्तेन नादोभिधीयते ॥ ३७ ॥

37— The word 'Nada' derived.

(சு. 37) 'நாதம்' என்னும் சொல்லின் பகுபத இலக்கணம்.

अथ ब्रह्मग्रन्थेर्लक्षणं ।

आधाराद्व्यंगुलादूर्ध्वे मेहनाद्व्यंङ्गुलादधः ।
एकाङ्गुलं देहमध्ये तप्तजाम्बूनदप्रभम् ॥ ३८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्रास्तेऽग्निशिखातन्वी चक्रात्तस्मान्नवाङ्गुले ।
देहस्य कन्दोऽस्त्युत्सेधायामाभ्यं चतुरङ्गुलः ।
ब्रह्मग्रन्थिरिति प्रोक्तम् तस्य नाम पुरातनैः ॥ ३९ ॥

38—39. Brahmagranthi the base of voice-production 12 angulas above the adhara chakra (1 angula=$\frac{3}{4}''$ approximately)

(சு. 38-39) ஆதார சக்கிரத்திற்கு பன்னிரண்டு அங்குலத்துக்கு மேல் பிரஹ்ம கிரந்தி இருக்கிறது. அதிலிருந்து கிளம்பும் வாயுவே நாதத்தை உண்டாக்குகிறது. 1 அங்குளம் = $\frac{3}{4}$ தற்கால அங்குளம்.

अथ वायवः ।

प्राणापानौ तथाव्यानसमानोदानसंज्ञकाः ।
नागः कूर्मश्च कृकरोदेवदत्तधनञ्जयौ ॥ ४० ॥
तेषां मुख्यतमः प्राणो नाभिकन्दादधःस्थितः ।
सरत्यास्ये नासिकयोः नाभौहृदयपङ्कजे ॥ ४१ ॥
शब्दोच्चारण निश्वासोच्छ्वासकासादिकारणम् ।
अपानस्तुगुदे मेढ्रे कटि जङ्घोदरे तथा ॥ ४२ ॥
व्यानोऽक्षि श्रोत्र गुल्फेषु कट्याङ्घ्राणे चतिष्ठति ।
समानोव्याप्य सकलं शरीरं वह्निनासह ॥ ४३ ॥
उदानः पादयोरास्ते हस्तयोरङ्गसन्धिषु ।
त्वगादिधातूनाश्रित्य पञ्चनागादयः स्थिताः ॥ ४४ ॥
त्वगसृङ्मांसमेदोऽस्थि मज्जा शुक्राणि धातवः ।
हृदि प्राणो गुदेऽपानः समानो नाभिसं स्थितः ।
उदानः कण्ठ देशस्थः व्यानस्सर्वशरीरगः ॥ ४५ ॥

40—45 The ten Vayus and their places—the 7 dhatus

(சு. 40-45) பத்து வித வாயுக்களும், ஏழு தாதுக்களும்.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ प्रकृतम् । इति वस्तुस्थितिस्तावद्गाने त्रेधा भवेदसौ ।
हृदिमन्द्रो गले मध्यो मूर्ध्नि तार इति क्रमात् ॥ ४६ ॥

द्विगुणः पूर्वपूर्वस्मादयंस्यादुत्तरोत्तरः ।
एवं शरीरवीणायां दार्व्यां तुविपर्ययः ॥ ४७ ॥

स्वरूपमात्रश्रवणात् नादोनुरणनं विना ।
श्रुतिरित्युच्यते भेदास्तस्या द्वाविंशतिर्मताः ॥ ४८ ॥

तदभिव्यक्तये नाडिस्थितिर्देहेनिरूप्यते ।
इडावामे स्थिदा नाडी दक्षिणेपिङ्गलातथा ।
हृदिनाडी सुषुम्नासा ब्रह्मरन्ध्रावधिस्थिता ॥ ४९ ॥

46—49. The seats of the octaves in the body; the 3 principal Nadis—Ida, Pingala and Sushumna.

(சு. 46-49) சரீரத்தில் 3 ஸ்தாயிகளின் ஸ்தானங்களும், சரீரத்திலுள்ள நாடிகளில் முக்கியமான நாடிகளாகிய 'இடை,' 'பிங்கலை' 'ஸுஷும்னை' என்பவைகளும்.

अथ श्रुतयः ।

तीव्राकुमुद्वतीमन्दा छन्दोवत्यस्तु षड्जागाः ।
दयावती रञ्जनी च रतिकाऋषभे स्थिताः ॥ ५० ॥

रौद्री क्रोधाच गान्धारे वज्रिकाच प्रसारिणी ।
प्रीतिश्चमार्जनी त्येता श्रुतयोमध्यमश्रिताः ॥ ५१ ॥

क्षितीरक्ताच सन्दीपिन्यालापिन्यपिपञ्चमे ।
मदन्ती रोहिणीरम्येत्येता धैवतसंश्रयाः ॥ ५२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उग्राच क्षोभिणीतिद्वे निषादे वसतः श्रुती ।

एवं गण्ठे तथाशीर्षे श्रुतिद्वाविंशतिर्मता ॥ ५३ ॥

50—53. The Srutis, 22 in number, and their distribution in the 7 swaras.

(சு. 50-53) சுருதிகள் இருபத்திரண்டும், அவைகள் ஸ்வரங்களில் அமைந்திருக்கும் விதமும்.

अथ श्रुतिविवेकः ।

श्रुत्यनन्तरभावित्वं यस्यानुरणनात्मकः ।

स्निग्धश्चरञ्जकश्चासौ स्वरइत्यभिधीयते ॥ ५४ ॥ अथवा ।

स्वयं यो राजते नादः सस्वरः परिकीर्तितः ।

शुद्धाः सप्तस्वरा स्तेच मन्द्रादि स्थानतस्त्रिधा ॥ ५५ ॥

च्युताच्युतादिभेदेन विकृता द्वादशोदिताः ।

चतुःश्रुतिर्यदाषड्जो द्विश्रुतिर्विकृतस्तदा ॥ ५६ ॥

साधारणे च्युतः सस्यात् काकलीत्वेऽच्युतः स्मृतः ।

त्रिश्रुती ऋषभः साधारणे षांड्जींश्रुतिंश्रितः ॥ ५७ ॥

चतुःश्रुतित्वं आपन्नः तदैको विकृतोभवेत् ।

साधारणे मध्यमस्य गान्धारस्त्रिश्रुतिर्भवेत ॥ ५८ ॥

• स्वस्यान्तरत्वे भवति चतुःश्रुतिरिति द्विधा ।

च्युताच्युतादिभेदेन मध्यमोऽपिद्विधा भवेत् ॥ ५९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

साधारणेन्तरत्वेच द्विश्रुतिर्विकृतस्तदा ।
पञ्चमो मध्यमग्रामे त्रिश्रुतिर्जायतेस्वरः ॥ ६० ॥

मध्यमस्य श्रुतिं प्राप्य कैशिकोपि चतुःश्रुतिः ।
धैवतो मध्यमग्रामे विकृतः स्याच्चतुःश्रुतिः ॥ ६१ ॥
कैशिके काकलीत्वे च निषादस्त्रिचतुःश्रुतिः ।
एते च सप्तभिः शुद्धैः भवन्त्येकोनविंशतिः ॥ तथा च रत्नाकरः ॥

(54—62) The 7 Suddha swaras and 12 Vikrita swaras as formulated in Sangita Ratnakara.

(சு. 54—62) சங்கீத ரத்னாகரத்தில் சொல்லியிருக்கிறபடி 7 சுத்த ஸ்வரங்களும், 12 விக்ருத ஸ்வரங்களும்.

चतुर्विधाः स्वरा वादी संवादी च विवाद्यपि ।
अनुवादी च वादीतु प्रयोगे वहुलःस्वरः ॥ ६३ ॥

वाद्यादिभेदभिन्नाश्चतुर्विधास्ते स्वराः कथिताः ।
रागोत्पादनशक्तिर्वादनं तद्योगतोवादी ॥ ६४ ॥

वहुलस्वरः प्रयोगे सभवति राजा च सर्वेषाम् ।
श्रुतयोष्टौ द्वादशवा भवन्तिमध्ये ययोः स्वरयोः ॥ ६५ ॥

संवादिनौ तुकथितौ परस्परं तौ निषादगान्धारौ ।
रिधयो र्विवादिनौस्तः तयोरिधौवा र्विवादिनौस्याताम् ॥ ६६ ॥

शेषाणामनुवादित्वं स्वराणामुपजायते ।
वादी राजा स्वरस्तस्य संवादी स्यादमात्यवत् ।
शत्रुर्विवादी तस्यस्यात् अनुवादीतुभृत्यवत् ॥ ६७ ॥

इति वाद्यादिभेदाः ।

63—67 Vadi, Samvadi (consonant) Anuvadi (assonant) & Vivadi (dissnoant) Swaras,—a classification necessary in the formation of Ragas.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(சு. 63—67) ராகங்களை அமைப்பதற்கு வேண்டிய ஸ்வரங்களின் வகை:—

வாதி (முக்கிய ஸ்வரம்), ஸம்வாதி (கிளை ஸ்வரம்), விவாதி (பகை ஸ்வரம்), அனுவாதி (நட்பு ஸ்வரம்),

ग्रामः स्वरसमूहःस्यात् मूर्छनादेःसमाश्रयः ।
तौद्वौधरातले तत्र स्यात्षड्जग्राम आदिमः ॥ ६८ ॥

द्वितीयो मध्यमग्रामस्तयोर्लक्षणमुच्यते ।
षड्जग्रामः पञ्चमेस्वचतुर्थश्रुतिसंस्थिते ॥ ६९ ॥

स्वोपान्त्यश्रुतिसंस्थेस्मिन् मध्यमग्रामइष्यते ।
यद्वाधस्त्रिश्रुतिः षड्जे मध्यमे च चतुःश्रुतिः ॥ ७० ॥

रिमयोः श्रुतिमेकैकां गान्धारश्च समाश्रयेत् ।
पश्रुतिंधोनिषादस्तु धश्रुतिं सश्रुतिंश्रितः ॥ ७१ ॥

गान्धारग्राममाचष्ट तदातं नारदोमुनिः ।
प्रवर्तते स्वर्गलोके ग्रामोसौ नमहीतले ॥ ७२ ॥

षड्जःप्रधान आद्यत्वाद्मात्याधिक्यतस्तथा ।
ग्रामेस्यादविलोपित्वात् मध्यमस्तुपुरस्सरः ।
एतत्कुलप्रसूतत्वात् गान्धारोप्यग्रणीर्दिवि ॥ ७३ ॥

68—73 The 3 Gramas and their characteristics.

(சு. 68—73) 3 க்ராமங்கள் என்னும் ஸ்வரத் தொகுதிகளும் அவற்றின் லக்ஷணங்களும்.

गीर्वाण कुलसम्भूताः षड्जगान्धारमध्यमाः ।
पञ्चमः पितृवंशोत्थो रिधवृपि कुलोद्भवौ ॥ ७४ ॥

निषादोऽसुरवंशोत्थो ब्राह्मणाः समपञ्चमाः ।
रिधौतुक्षत्रियौज्ञेयौ वैश्यजाती निगौ मतौ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शुद्धावन्तरकाकल्पौ क्रमेण कथिता बुधैः ७५ ॥

(74—75) The tribe and caste of swras.

(ஶ. 74—75) ஸ்வரங்களின் குலமும் ஜாதியும்

इति ग्रामलक्षणम् ।

क्रमात्स्वराणां सप्तानां आरोहश्चावरोहणम् ।
मूर्छनेत्युच्यतेग्रामत्रये ताः सप्त सप्त च ॥ ७६ ॥

स्थानत्रयसमायोगे मूर्छनारम्भसम्भवः ।
तत्र मध्यस्थषड्जेन षड्जग्रामस्य मूर्छना ॥ ७७ ॥

प्रथमारभ्यतेन्यास्तु निषादाद्यैरधस्तनैः ।
मध्यमध्यमसमारभ्य मध्यमग्राममूर्छना ॥ ७८ ॥

आद्यान्यास्तदधोधस्थ स्वरानारभ्यषट्क्रमात् ।
षड्जेतूत्तरमन्द्राख्या रजनीचोत्तरायता ॥ ७९ ॥

शुद्धषड्जामत्सरीकृदश्वक्रान्ताभिरुद्गता ।
सौवीरीमध्यमग्रामे हारिणाश्वाततःपरा ॥ ८० ॥

स्यात्कलोपनता शुद्धमध्यामार्गी च पौरवी ।
हृष्यका सप्तमी प्रोक्ता मूर्छनेत्यभिधाइमाः ॥ ८१ ॥

नन्दा विशाला सुमुखी विचित्रारोहिणी सुखा ।
आलापाचेतिगान्धारग्रामेस्युः सप्तमूर्छनाः ॥ ८२ ॥

ताश्च स्वर्गे प्रयोक्तव्या विशेषादत्रनोदिताः ।
पृथक्च चतुर्विधाः शुद्धाः काकलीकलितास्तथा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सान्तारास्तद्द्वयोपेताः षट्पंचाशत्तुमूर्छनाः ॥ ८३ ॥

(76—83) Moorchhanas (modes) fore each grama. 28 in number. made up of 7 Suddha, 7 with Kakali, 7 with antara and 7 with both.—56 for both the gramas.

(சு. 76—83) மூர்ச்சனைகள், ஒவ்வொரு கிராமத்திற்கும் சுத்த மூர்ச்சனைகள் 7, அந்தர ஸ்வரத்தோடு கூடியது 7, காகலி ஸ்வரத்தோடு கூடியது 7, இரண்டும் கூடியது 7, ஆக இரண்டு கிராமங்களுக்கும் 56.

यदानिषादसंज्ञकः श्रुतिद्वयं समाश्रयेत् ।
तदूर्ध्वसस्य काकलीतदा सकीर्त्यते बुधैः ॥ ८४ ॥

यदाश्रयतिगान्धारो मध्यमस्य श्रुतिद्वयम् ।
तदासावन्तरः प्रोक्तः मुनिभीऋतुसन्धिवत् ॥ ८५ ॥

(84—85) 'Kakali' and 'Antara' defined.

(சு. 84—85) 'காகலி' 'அந்தரம்' என்ற ஸ்வரங்களின் லக்ஷணம்.

मूर्छनायां यावतिथौ भवेतां षड्जमध्यमौ ।
ग्रामयोस्तावतिथ्येव मूर्छना सा प्रकीर्तिता ॥ ८६ ॥

(86) Order of Moorchhnas.

(சு. 86) மூர்ச்சனைகளின் வரிசை.

प्रथमादिस्वरारम्भा देकैका सप्तधाभवेत् ।
तासूच्चार्यान्त्यस्वरांस्तान् पूर्वानुच्चारयेत्क्रमात् ।
ते क्रमाः कथितास्तेषां सङ्ख्यानेकतरामता ॥ ८७ ॥

(87) Kramas, 7 for each moorchhana

(சு. 87) கிரமங்கள், ஒவ்வொரு மூர்ச்சனைக்கும் 7.

यदातु मूर्छनाः शुद्धाः षाडवौडवितीकृताः ।
तदातु शुद्धतानाःस्युः मूर्छनास्तत्र षड्जगाः ॥ ८८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सप्तक्रमाद्यदाहीना: स्वरैः सरिपसप्तमैः ।
तदाष्टाविंशति स्ताना:षाडवा: परिकीर्तिताः ॥ ८९ ॥

यदातुमध्यमग्रामे मूर्छनाः सरिगोज्झिताः ।
सप्तक्रमाद्यदातानाः स्युस्तदात्वेकत्रिंशतिः ॥ ९० ॥

एवमेकोनपञ्चाशन्मिलिताः षाडवा मताः ।
सपाभ्यां द्विश्रुतिभ्यांच रिपाभ्यां सप्तवर्जिताः ॥ ९१ ॥

षड्जग्रामे पृथक् ताना एकविंशतिरौडवाः ।
त्रिश्रुतिभ्यां द्विश्रुतिभ्यां मध्यमग्राममूर्छनाः ॥ ९२ ॥

यदाहीनास्तदातानाः चतुर्दश समीरिताः ।
औडवामिलिताः पञ्च त्रिंशद्ग्रामद्वयेस्थिताः ।
सर्वे चतुरशीतिःस्युः मिलिताः षाडवौडवाः ॥ ९३ ॥

इति शुद्धतान विवेकः ॥

(88—93) Suddha Tanas, 84 in number.

(சு. 88—93) சுத்த தானங்கள் 84.

असम्पूर्णाश्चसंपूर्णाव्युत्क्रमोच्चारिताः स्वराः ।
मूर्छनाः कूटतानाःस्युः तासां सङ्ख्याभिधीयते ॥ ९४ ॥

पूर्णाः पञ्चसहस्राणि चत्वारिंशद्युतानि च ।
एकैकस्यां मूर्छनायां कूटतानास्सह क्रमैः ॥ ९५ ॥
षट्पञ्चाशन्मूर्छनाःस्युः पूर्णाः कूटास्तु योजिताः ।
लक्षद्वयं सहस्राणि द्व्यशीतिर्द्विशते तथा ॥ ९६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चत्वारिंशच्च संख्याताः अथापूर्णान्प्रचक्ष्महे ।
एकैकान्त्यान्त्यविरहाभेदाः षट् षट्स्वरादयः ॥ ९७ ॥

एकस्वरोत्र निर्भेदोप्युक्तो नष्टादिसिद्धये ।
क्रमाश्चकूटतानत्वेप्युक्तास्तेप्युपयोगिनः ॥ ९८ ॥

स्युः षाडवानां विंशत्या सह सप्तशतानि च ।
औडवानान्तु विंशत्या सहितं शतमुच्यते ॥ ९९ ॥

चतुःस्वराणां कूटानां चतुर्विंशतिरीरिताः ।
त्रिस्वराः षट् द्विस्वरौद्वौ एक एकस्वरोमतः ॥ १०० ॥

आर्चिकोगाथिकश्चैव सामिकोथ स्वरान्तरः ।
एकस्वरादितानानां चतुर्णामभिधाइमाः ॥ १०१ ॥

उक्तशुद्धादिभेदेन निगयुक्ताश्चतुर्विधाः ।
तयोरेकैकहीनास्तु द्वेधाःमूलक्रमामताः ॥ १०२ ॥

षड्जाद्यौ मध्यमाद्यौ द्वौ चत्वारःस्युर्द्विधा द्विधा ।
चतुर्धान्ये दशेत्यष्टाचत्वारिंश दमीक्रमाः ॥ १०३ ॥

सविंशतिस्सप्तशती प्रागुक्तागुणिता क्रमैः ।
चतुस्त्रिंशत्सहस्राणि षष्टचापञ्चशतानि च ॥ १०४ ॥

इति षाडवसंख्यास्यादथ पञ्चस्वरान्ब्रुवे ।
गाद्यौ धाद्यौ निषादाद्यौ चतुर्भेदाः षडौडवाः ॥ १०५ ॥

अष्टावन्ये द्विधात्वेवं चत्वारिंशदिमे क्रमाः ।
सविंशतौ शतेतैश्च गुणितेऽष्टौ शतानिच ॥ १०६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चत्वारिंच सहस्राणि संख्या पञ्चस्वरेष्विति ।
चतुःस्वरेषु न्याद्यौ द्वौ चतुर्धा द्वादशापरे ॥ १०७ ॥

क्रमाद्द्विधेति द्वात्रिंशच्चतुर्विंशतिताडिताः ।
शतानि सप्ताष्टषष्ट्या चतुःस्वरसुसंमितिः ॥ १०८ ॥

त्रिस्वरेषु तु माद्यौ द्वावमे द्वौ द्वादशापरे ।
द्विधा षड्विंशतिरिति क्रमास्ते षड्भिराहताः ॥ १०९ ॥

षट्पञ्चाशच्छतंचस्युः द्विस्वरेषु पुनर्द्विधा ।
रिगधन्यादयोष्टौस्युः शुद्धाः षडितरे क्रमाः ॥ ११० ॥

द्वाविंशतिस्तेच चतुश्चत्वारिंशद्द्विताडिताः ।
एकस्वरास्त्वभेदत्वान्मौला एव चतुर्दश ॥ १११ ॥

षड्जादेः शुद्धमध्यायाः भेदकं पञ्चमं विना ।
चतुः स्वरे क्रमद्वंद्वेऽष्टाचत्वारिंशदीरिताः ॥ ११२ ॥

तानास्त्रिस्वरयोस्त्वेते द्वादश द्विस्वरे द्वयम् ।
एक एकस्वरस्तेत्रिषष्टि रौत्तरमन्द्रकैः ॥ ११३ ॥

पुनरुक्तामतास्ताना न्यादि मार्गी क्रमात्पुनः ।
पञ्च स्वराये चत्वारः तत्तानानां चतुःशती ॥ ११४ ॥

अशीत्यभ्यधिका चातुस्वरी षण्णवतिर्भवेत् ।
द्वादश त्रिस्वरद्वंद्वे चत्वारो द्विस्वरद्वये ॥ ११५ ॥

एक एकस्वरस्तानः तेषां पञ्चशतीत्वियम् ।
त्रिनवत्यायुतातानैः अभिन्नारजनीगतैः ॥ ११६ ॥

3

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धैवतादेस्तु पौर्व्याश्चत्वारः षट्स्वराः क्रमात् ।
तत्तानानान्तु साशीतिशताष्टाविंशतिर्मता ॥ ११७ ॥

औडवानां चतुर्णां प्रागुक्ता संख्या चतुःस्वरौ ।
त्रिस्वरौद्विस्वरावेकस्वरः प्रागुक्त संख्यकाः ॥ ११८ ॥

पञ्चविंशति संयुक्ता चतुस्त्रिंशच्छतीत्वियम् ।
तानानां सदृशाकारा स्यात्तानै रौत्तरायतैः ॥ ११९ ॥

इत्येकाशीतिसंयुक्तं सहस्राणां चतुष्टयम् ।
तानानां पुनरुक्तानां पूर्णापूर्णैः सह क्रमैः ॥ १२० ॥

अपनीयेतचेदेषाकूटतानमितिर्भवेत् ।

लक्षत्रयं सप्तदश सहस्राणि शतानि च ।
नवत्रिंशद्युतानीति कूटतानमितिर्भवेत् ॥ १२१ ॥

इति कूटतान प्रकरणम् ।

(93—121) Koota tanas, (ie) tanas formed by notes arranged out of order, and their total number arrived at by calculation.

(சு. 93—121) கூடதானங்களும் (வரிசை மாறிய ஸ்வரங்களால் உண்டானவை) அவைகளின் மொத்தத் தொகையின் கணக்கும்.

संख्याज्ञान प्रकारस्तु सांप्रतंकथयिष्यते ।
अङ्कानेकादि सप्तान्तानूर्ध्वमूर्ध्वं लिखेत्ततः ॥ १२२ ॥

हते पूर्वेण पूर्वेण तेषुचाङ्के परे परे ।
एकस्वरादितानानां संख्या सञ्जायते क्रमात् ॥ १२३ ॥

द्विस्वरं त्रिस्वरं वापि चतुःस्वरमथापिवा ।
क्रमं कंचिद्विलिख्यादौ पूर्वः पूर्वः परादधः ॥ १२४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वरः स्थाप्यः सचेदग्रे तत्पूर्वस्तदधोभवेत् ।
पुरतोऽपि लिखेद्धीमान् स्वरानुपरिवर्तिनः ।
मूलक्रमःक्रमात्पृष्ठे शेषः प्रस्तारईदृशः ॥ १२५ ॥

(122—125) Sankhya or the table of prastara or orderly formulation of the permutation and combination of swaras in tanas.

(சு. 122—125) 'சங்கியை' அல்லது வரிசையாகத் தானங்களை ப்ரஸ்தாரம் செய்யும் வழி.

नष्टोद्दिष्टप्रबोधार्थं खण्डमेरुस्तथोच्यते ।
सप्तकोष्ठानलिखेदाद्यां पङ्क्तिमेकाङ्क कोष्ठतः ॥ १२६ ॥

हीनं तु पूर्वं पूर्वस्मात् पङ्क्तिषट्कमधो लिखेत् ।
आद्यपङ्क्त्यादि कोष्ठेतु लिखेदेकं परेषुखम् ॥ १२७ ॥

द्वितीयपङ्क्त्यामप्येकं आद्यकोष्ठं लिखेद्बुधः ।
परेषु पूर्वपूर्वाङ्ककोष्टसंख्यागुणं न्यसेत् ॥ १२८ ॥

एवमेवलिखेदङ्कमधोधः पङ्क्तिकोष्ठकम् ।
खण्डमेरुरयं प्रोक्तः नष्टोद्दिष्टप्रबोधकः ॥ १२९ ॥

वेद्यतानस्वरमितान् दत्वा शून्येषु लोष्टकान् ।
मूलक्रमं लिखित्वादौ उद्दिष्टं तदधोलिखेत् ॥ १३० ॥

स्वरान्मूलक्रमस्यान्त्यात् पूर्वोयावतिथः स्वरः ।
उद्दिष्टान्त्यस्तावतिथे कोष्ठाधो लोष्टकं क्षिपेत् ॥ १३१ ॥

लोष्टचालनमन्त्यात्स्या लब्धंत्यक्त्वा क्रमोभवेत् ।
समश्चेदन्तिमोऽन्येन सोपित्याज्यः प्रयत्नतः ॥ १३२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१	०	०	०	०	०	०
	१	२	६	१४	१२७	७२०
		४	१२	४८	२४०	१८००
			१८	७२	३९०	२१६०
				९६	४८०	२८८०
					६००	३६००
						४३२०

लोष्टकान्तांकसंयोगात् उद्दिष्टस्यमितिर्भवेत् ।
सङ्ख्यायातु यदारूपे पृष्टे नष्टन्तदुच्यते ॥ १३३ ॥
यैरङ्कैर्नष्टसङ्ख्यास्यात् मौलैकाङ्कसमन्वितः ।
नष्टतानस्वरस्थानं तैर्ज्ञात्वा तं स्वरं लिखेत ॥ १३४ ॥
क्रमोऽत्रापि च कर्तव्यः लब्ध्वात्यागेन पूर्ववत् ।
तत्रैवात्रलिखेच्छिष्टमेवं नष्टोतरं भवेत् ॥ १३५ ॥
तानस्वरोमतोर्ध्वाधः पङ्क्तिगान्त्यांकमिश्रणात् ।
एकस्वरादितानानां सङ्ख्यासंजायते स्फुटम् ॥ १३६ ॥
इति खण्डमेरु नष्टोद्दिष्ट प्रकरणम् । अथ साधारणम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

126—136 Khanda meru or the table for ' Uddishta, or finding the order of any particular tana, and for 'Nashta' or finding the form of a tana of a particular order

(சு. 126-136) 'கண்டமேரு' – அல்லது 'நஷ்டம்' 'உத்திஷ்டம்' என்பவைகளுக்கான வழி. அதாவது தானம் எத்தனையாவது என்று சொல்லி அதன் உருவத்தைக் கண்டு பிடித்தலும், தானத்தின் உருவத்தைச் சொல்லி அது எத்தனையாவது என்று கண்டு பிடித்தலும்.

साधारणं भवेद्द्वेधा स्वरजाति विशेषणात् ।
स्वरसाधारणं तत्र चतुर्धा परिकीर्तितम् ॥ १३७ ॥

काकल्यन्तरषड्जैश्च मध्यमेन विशेषणात् ।
अन्तरस्यापि गमयोरेवं साधारणं मतम् ॥ १३८ ॥

निषादोयदिषड्जस्य श्रुतिमाद्यां समाश्रयेत् ।
ऋषभश्चान्तिमां प्रोक्तं षड्जसाधारणं तदा ॥ १३९ ॥

मध्यमस्यापि गमयोः एवं साधारणं मतम् ।
रागालापनसंयुक्तं जाति साधारणं विदुः ॥ १४० ॥

इति साधारण प्रकरणम् ।

(137—140) Sadharana or common-feaured Swaras and Jatis :—

Swaras :—

(1) antara, (2) Kakali. (3) Shadjasadharana & (4) Madhyama sadharana.

Jatis:—

Mixed jatis, described later.

(சு. 137-140) 'சாதாரணம்' அல்லது ஒன்றுக்கு மேல்பட்ட ஸ்வரங்களின் குணங்களையுடைய ஸ்வரங்களும் ஒன்றுக்கு மேற்பட்ட ஜாதிகளின் குணங்களுடைய ஜாதிகளும் ;—

சாதாரண ஸ்வரங்கள் :— (1) அந்தரம், (2) காகலி, (3) ஷட்ஜ சாதாரணம், மத்யம சாதாரணம்.

சாதாரண ஜாதிகள் :— பிந்தி விவரிக்கப் பட்டிருக்கின்றன.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गानक्रियोच्यते वर्णः सचतुर्धानिरूपितः ।
स्थाय्यारोह्यवरोही च संचारीचाथलक्षणम् ॥ १४१ ॥

स्थित्वास्थित्वा प्रयोगः स्यात् एकैकस्य स्वरस्ययः ।
स्थायी वर्णः सविज्ञेयः परावन्वर्थ नामकौ ॥

एतत्संमिश्रणाद्वर्णः सञ्चारी परिकीर्तितः ।
अथवा । यत्रोपविशतेरागः स्वरःस्थायी स कथ्यते ॥ १४२ ॥

इति स्थाय्यादिवर्णलक्षणम् ।

(141—142) 'Varna' or musical effort. 4 in numbers: as cent, descent, going up & down and staying in a note-

(சு, 141-142) 'வர்ணம்' அல்லது கானக்ரியை. இது 4 வகை :— ஆரோகி, அவரோகி, சஞ்சாரி, ஸ்தாயி— அதாவது ஏறுதல், இறக்குதல், மேலும் கீழும் செல்லுதல், ஒரே இடத்தில் நிற்றல்.

गीताद्दौस्थापितो यस्तु सग्रहस्वर उच्यते । इति ग्रहस्वरः ।
न्यासस्वरस्तु विज्ञेयः यस्तु गीतसमापकः । इति न्यासस्वरः ।
बहुलत्वं प्रयोगेषु सअंशस्वर उच्यते ॥ १४३ ॥ इति अंशस्वरः ।

143— 'Graha' or the note with which tune starts. Nyasa' or the 'finale'; and 'Amsa' or the dominant note of the tune, or the note most freeuenthy used.

(சு. 143) 'க்ரஹ ஸ்வரம்' அல்லது ராகம் ஆரம்பிக்கும் ஸ்வரம்; 'நியாஸ ஸ்வரம்' அல்லது ராகம் முடியும் ஸ்வரம்; அம்ச ஸ்வரம்' அல்லது ராகத்தின் முக்கிய ஸ்வரம் அல்லது ராகத்தில் அடிக்கடி உபயோகிக்கப்படும் ஸ்வரம்.

विशिष्टवर्णसन्दर्भमलङ्कारं प्रचक्षते ।
एकैकस्यां मूर्छनायां त्रिषष्टिरुदिताबुधैः ॥ १४४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ अलङ्कारप्रस्तारः। सरि सरिग रिग रिगम गम गमप।

मप मपध पध पधनि धनि धनिस इति प्रथमः।

सस रिरि गग मम पप धध निन सस इतिद्वितीयः ॥ १४५ ॥

इति अलङ्कारलक्षणम्।

(144—145) Alankaras or graceful variety in the four forms of musical effort.

சு. (144—145) 'அலங்காரங்கள்' அல்லது வர்ணங்களின் அழகிய வகைகள்.

ग्रहांशतारमन्द्राश्च न्यासापन्यासकौतथा।

अपि सन्यासविन्यासौ बहुत्वं चाल्पताततः ॥ १४६ ॥

इति राग लक्षणं

146. The function of swaras in the formaton of Ragas :—

Graha (Initial note) Amsa (Dominant note) Tara-Highest note) Mandra (Lowest note) Nayasa (Final note) Apanyas (notes for Staying) Sanyasa & Vinyasa (notes for beginning & ending of parts of a musical piece)

(சு. 146) ராகத்தின் முக்கிய ஸ்வரங்கள் ;—

கிரஹம் (ஆரம்பிக்கும் ஸ்வரம்,) அம்சம் (முக்கிய ஸ்வரம்,) தாரம் (ராகத்தின் மேல் கோடி,) மந்த்ரம் (கீழ் கோடி.) நியாஸம் (முடிக்கும் ஸ்வரம்,) அபந்நியாஸம் (இடையே நிற்கும் ஸ்வரம்,) ஸந்நியாஸ, விந்நியாஸம் (ராகப் பகுதிகளின் ஆரம்பம், முடிவு).

अथ स्वरा उच्यन्ते।

श्रुतिभ्यः स्युः स्वराः षड्जऋषभगान्धारमध्यमाः।

पञ्चमोधैवतश्चेति निषाद इति सप्तते।

तेषां संज्ञासरिगम पधनीत्यपरामताः ॥ १४७ ॥

षड्जं वदति मयूरः स्वरमृषभं चातको ब्रूते।

गान्धाराख्यं छागो निगदति पक्षी मध्यमं क्रौञ्चः ॥ १४८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गदति पञ्चममंचितवाक् पिकोरटति धैवतमुन्मददर्दुरः ।
सृणिसमाहतमस्तक कुन्जरो गदति नासिकयाखरमन्तिमम् ॥
मयूरचातक छाग क्रौञ्च कोकिल दर्दुराः ।
गजश्च सप्तषड्गादीन् क्रमादुच्चारयन्त्यमि ॥ १९० ॥
इति चतुरदामोदरविरचिते सङ्गीतदर्पणे स्वराध्यायः ॥

(147—50) The Seven notes and the corresponding sounds in nature.

(சு 147—150) ஏழுஸ்வரங்களும் அவற்றை ஒலிக்கும் பிராணிகளும்.

अथ रागाध्यायः

योऽयं ध्वनिविशेषः स्यात् स्वरवर्णविभूषितः ।
रञ्जको जनचित्तानां सराग: कथितो बुधैः ॥ १९१ ॥
अथ रागाङ्ग-भाषाङ्ग-क्रियाङ्गोपाङ्गनिर्णयः ।
रागछायानुकारित्वात् रागाङ्गमिति कथ्यते ॥ १९२ ॥
भाषांगं भाषाच्छाया(या) भाषांगस्थेन हेतुना ।
करुणोत्साहसंयुक्तः क्रियांगस्तेनहेतना ॥ १९३ ॥
इतिरागांग भाषां गक्रियां गविवेकः ।

(151-153) "Raga", its definition and its kinds, namely (1) Raga (2) Bhasha (3) Raganga (4) Bhashanga and Kriyanga.

(சு. 151-153) "ராகம்" என்றால் என்ன ?
அதன் வகைகள் :— (1) ராகம் (2) பாஷை (3) ராகாங்கம் (4) பாஷங்கம் (5) க்ரியாங்கம்.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

काण्डारणातुकथिता तारस्थानेतिशीघ्रता ।
गमकैर्विविधैर्युक्ता कौशल्यसहिता मता ॥ १५४ ॥

इति काण्डरणा ।

(154) "Kandarana" or the the tremulo and other graces in the higher octaves.

(சு. 154) "காண்டாரணா" அல்லது மேல் ஸ்தாயியில் கமகங்கள் நிறைந்த துரித சஞ்சாரம்.

अथ मतङ्गमतेन रागाणां त्रैविध्यं दर्शयति ।
शुद्धाः छायालगाः प्रोक्ताः सङ्कीर्णाश्च तथैव च ॥ १५५ ॥

तत्र शुद्धरागत्वं नाम शास्त्रोक्तनियमाद्रंजकत्वं भवति ।
छायालगरागत्वं नाम अन्यछायानुलगत्वेन रक्तिहेतुत्वम् ।
सङ्कीर्णरागत्वं नाम शुद्धछायालगमुख्यत्वेन रक्तिहेतुत्वम् ॥ १५६ ॥

इति कल्लिनाथोक्तं लिखितम् ।

(155—156) The 3 kinds of Ragas according to Matanga :—Suddha, Chhayalaga, and Sankirna.

The 1st kind follows the classical rules of the ancient texts.

The 2nd kind makes a slight deviation while following, in the main, the path of the Suddha ragas.

The 3rd kind is formed with the help of the ragas of the 1st and 2nd kind.

(சு. 155—156) மதங்கர் சொல்லியபடி ராகங்களின் வகை:—

(1) சுத்தம் (சாஸ்திரப்படி அமைந்தவை.)

(2) சாயாலகம் (சிறிது மாறியவை.)

(3) சங்கீர்ணம் (முதல் இரண்டு வகையும் கலந்தவை.)

4

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

औडवः पञ्चभिः प्रोक्तः स्वरैः षड्भिस्तु षाडवः ।
सम्पूर्णः सप्तभिर्ज्ञेयस्त्वेवं रागस्त्रिधामतः ॥ १९७ ॥

(157) Classification according to the no. of swaras occurring in the raga :—

(1) Sampurna (7 swaras.)
(2) Shadava (6 swaras.)
(3) Oudava (5 swaras.)

(சு. 157) ராகங்களிலுள்ள ஸ்வரங்களின் எண்ணிக்கையைப் பொறுத்து ராகங்களின் வகை :—

(1) ஸம்பூர்ணம் (7 ஸ்வரங்கள்.)
(2) ஷாடவம் (6 „ .)
(3) ஔடவம் (5 „ .)

श्रीराग नट्टौ बङ्गालो भासमध्यम षाडवौ ।
रक्तहंसः कोह्लहासः प्रसभो भैरवध्वनिः ॥ १९८ ॥

मेघरागः सोमरागः काम्बोदश्चाम्रपञ्चमः ।
स्यातां कन्दर्पदेशाख्यौ ककुभान्तश्च कैशिकः ।
नट्टनारायणश्चेति रागविंशतिरीरिताः ॥ १९९ ॥

* (158-59) The well known classical Ragas 20 in number.

(சு. 158-59) 20 பழைய பிரசித்த ராகங்கள்.

अथ रागरागिणीमतम् ।

शिवशक्तेः समायोगात् रागाणां सम्भवोभवेत् ।
पञ्चास्यात् पञ्चरागाःस्युः षष्ठस्तु गिरिजामुखात् ॥ १६० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सद्योवक्त्रात्तु श्रीरागो वामदेवाद्वसन्तकः ।
अघोराद्भैरवो जातः तत्पुरुषात्तु पञ्चमः ॥ १६१ ॥

ईशानाख्यान्मेघरागो नाट्यारम्भे शिवादभूत् ।
गिरिजाया मुखाल्लास्ये नट्टनारायणोऽभवत् ॥ १६२ ॥

"केरागाः काश्चरागिण्यः कावेला ऋतवश्चके ।
किंरूपं कथमुद्धारः वद देव प्रसादतः" ॥ १६३ ॥

श्रीरागोऽथ वसन्तश्च भैरवः पञ्चमस्तथा ।
मेघरागो बृहन्नाटः षडेते पुरुषाह्वयाः ॥ १६४ ॥

इति षड्पुरुषरागाः ।

अथरागिण्यः ।

मालवी त्रिवणी गौडी केदारी मधुमाधवी ।
ततः पाहाडिकाज्ञेया श्रीरागस्य वराङ्गनाः ॥ १६५ ॥

देशी देवगिरी चैव वराटी टोडिकातथा ।
ललिताचाथ हिन्दोली वसन्तस्य वराङ्गनाः ॥ १६६ ॥

भैरवी गुर्जरीचैव रेवा गुणकरी तथा ।
बङ्गाली बहुलीचैव भैरवस्य वराङ्गनाः ॥ १६७ ॥

विभासश्चाथ भूपाली कर्णाटी बडहंसिका ।
मालवश्रीपढमञ्जर्या सहैताः पञ्चमाङ्गनाः ॥ १६८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मल्हारी सोरटी चैव सावेरी कौशिकी तथा ।
गान्धारि हरिशृङ्गारा मेघरागस्य योषितः ॥ १६९ ॥

कामोदीचैव कल्याणी आभेरी नाटिका पुनः ।
सालङ्गीनट्टहंजी(वी)रा नटनारायणाङ्गनाः ॥ १७० ॥

इति षड्त्रिंशद्रागिण्यः ।

(160-170) Classification of Ragas into masculine and femminine :—

(1) Someswara's Classification :— 6 'Ragas' or masculine tunes, each having 6 'Raginis' or consorts.

(சு. 160-170) ராகங்களின் பாகுபாடு :—

(1) ஸோமேசுவரரின் மதப்படி புருஷ ராகங்கள் 6ம், ஒவ்வொன்றுக்கும் 6 ஸ்திரீகளாகிய ராகிணிகளும்.

अथरागवेळा ।

मधुमाधवीच देशाख्या भूपाली भैरवी तथा ।
वेलावलीच मल्हारी वङ्गाली साम गुर्जरी ॥ १७१ ॥

धनाश्री मालवश्रीश्च मेघरागश्च पञ्चमः ।
देशकारो भैरवश्च ललितश्च वसन्तकः ॥ १७२ ॥

एते रागाः प्रगीयन्ते प्रातरारभ्यनित्यशः ।
गुर्जरी कौशिकश्चैव सावेरी पढमञ्जरी ॥ १७३ ॥

रेवा गुणकरी चैव भैरवी रामकर्यपि ।
सोरटी च तथा गेया प्रथमप्रहरोत्तरम् ॥ १७४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वैराटी टोडिकाचैव कामोदीच कुडायिका ।
गान्धारी नागशब्दीच तथादेशी विशेषतः ॥ १७५ ॥

शङ्कराभरणो ज्ञेयो द्वितीयप्रहरात्परम् ।
श्रीरागोमालवाख्यश्च गौडी त्रिवणसंज्ञकः ॥ १७६ ॥

नटकल्याण संज्ञश्च सालङ्गं नट्टकं तथा ।
सर्वे नाटाश्च केदारी कर्णाट्याभीरिका तथा ॥ १७७ ॥

वडहंसी पहाडीच तृतीय प्रहरात्परम् ।
अर्धरात्रावधिर्गेया रागा एते सुखप्रदाः ॥ १७८ ॥

यथोक्तकाल एवैते गेयाः पूर्व विधानतः ।
राजाज्ञया सदागेया नतु कालं विचारयेत् ॥ १७९ ॥

इति रागवेळा ॥

श्रीरागो रागिणीयुक्तः शिशिरे गीयते बुधैः ।
वसन्तस्स्वसहायैस्तु वसन्ततौ प्रगीयते ॥ १८० ॥

भैरवः स्वसहायैस्तु ऋतौ ग्रीष्मे प्रगीयते ।
पञ्चमस्तु तथागेयो रागिण्या सह शारदे ॥ १८१ ॥

मेघरागो रागिणीभिः युक्तोवर्षासुगीयते ।
नट नारायणोरागो रागिण्यासहहेमके ।
यथेच्छया वा गातव्याः सर्वर्तुषु सुखप्रदाः ॥ १८२ ॥

इति ऋतुवेला ।

—इति सोमेश्वरमतम् ।

(171-182) The proper time of the day and the season for particular Ragas.

(சு. 171-182) ராகங்களுக்குத் தகுதியான வேளையும் ருதுவும்

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ हनूमन्मतम् ।

भैरवो कौशिकश्चैव हिन्दोलो दीपकस्तथा ।
श्रीरागो मेघरागश्च षडेते पुरुषाह्वयाः ॥ १८३ ॥

मध्यमादिर्भैरवी च बङ्गाली च वराटिका ।
सैन्धवी च पुनर्गेया भैरवस्य वराङ्गनाः ॥ १८४ ॥

टोडी खभावती गौडी गुणक्री ककुभा तथा ।
रागिण्यो रागराजस्य कौशिकस्य वराङ्गनाः ॥ १८५ ॥

वेलावली रामकरी देशाख्या पढमञ्जरी ।
ललिता सहिता एता हिन्दोलस्य वराङ्गनाः ॥ १८६ ॥

केदारी कानडा देशी कामोदी नाटिका पुनः ।
दीपकस्य प्रियाः पञ्च ख्याता रागविशारदैः ॥ १८७ ॥

वसन्ती मालती चैव मालश्रीश्च धनाश्रिका ।
असावेरीति विज्ञेयाः श्रीरागस्य वराङ्गनाः ॥ १८८ ॥

मल्लारी देशकारी च भूपाली गुर्जरी तथा ।
टक्कश्च पञ्चमीभार्या मेघरागस्य योषितः ॥ १८९ ॥

इति हनुमन्मते रागरागिण्यः ।

(183-189) Classification according to Hanuman:— 6 masculine Ragas, each having 5 consorts or Raginis.

(சு. 183-189) ஹனுமத் பரதம் என்னும் நூலில் சொல்லப் பட்டிருக்கும் பிரிவினை :—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

6 புருஷ ராகங்களும் ஒவ்வொன்றுக்கும் 5 ஸ்திரீகளாகிய ராகிணிகளும்.

अथ रागार्णव मतम् ।

भैरवः पञ्चमो नाटो मल्लारो गौडमालवः ।
देशाख्यश्चेति षड्रागाः प्रोच्यन्ते लोकविश्रुताः ॥ १९० ॥

वङ्गालीयं गुणकरी मध्यमादिर्वसन्तकः ।
धनाश्रीश्चेति पञ्चैते रागा भैरवसंश्रयाः ॥ १९१ ॥

ललितागुर्जरीदेशी वराटी रामकृत्तथा ।
मता रागार्णवे रागाः पञ्चैते पञ्चमाश्रयाः ॥ १९२ ॥

नटनारायणः पूर्वगान्धारः सालगस्तथा ।
ततः केदारकर्णाटौ पञ्चैते नाटसंश्रयाः ॥ १९३ ॥

मेघमल्लारिका मालकौशिकः पढमञ्जरी ।
असावेरीति विज्ञेयाः रागा मल्लारिसंश्रयाः ॥ १९४ ॥

हिन्दोल स्त्रवणांधारी गौडी च पडहंसिका ।
पञ्चैते रागनामानं गौडमाश्रित्य संस्थिताः ॥ १९५

भूपालीच कुडायीच कामोदी नाटिका तथा ।
वेलावलीति विज्ञेया रागादेशाख्यसंश्रयाः । इति रागार्णवमतम् ।
न तालानां न रागाणां अन्तः कुत्रापि विद्यते ॥ १९६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

* (190-196) Classification according to Ragarnava:- 6 principal ragas, and 5 subordinate ragas attached to each of the principal ones.

(சு. 190-196) ராகார்ணவ மதப்படி ராகங்களின் பிரிவினை:- 6 முக்ய ராகங்களும் ஒவ்வொரு முக்ய ராகத்துக்கும் சார்பு ராகங்கள் 5ம்.

इदानीं राग रागिण्युदाहरणं प्रारभ्यते ॥

धैवतांश ग्रहन्यासो रिपहीनोथ मागतः ।
भैरवस्सतु विज्ञेयः धैवतादिक मूर्छनः ।
धैवतो विकृतोयत्न औडवः परिकीर्तितः ॥ १९७ ॥

उदाहरणम् ।

गङ्गाधरः शशिकलातिलकस्त्रिनेत्रः
सर्पैर्विभूषिततनुर्गजकृत्तिवासाः ।
भास्वत्त्रिशूलकर एष नृमुण्डधारी
शुभ्राम्बरोजयति भैरव आदिरागः ॥ १९८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धनि सगमधनि । इति भैरवः ॥ १ ॥

(197-198) Bhairava raga lakshana.
(சு. 197-198) 'பைரவ' ராக லக்ஷணம்.

मध्यमादिश्चरागांगा ग्रहांशन्यास मध्यमा ।
सप्तस्वरैस्तु गातव्या मध्यमादिक मूर्छना ।
सम्पूर्णा कथिता तद्ज्ञैः रिधहीना क्वचिन्मता ॥ १९९ ॥

उदाहरणम् ।

पत्या सहासं परिरभ्य कामं संचुम्बितास्या कमलायताक्षी ।
स्वर्णच्छविः कुङ्कुमलिप्तदेहा सामध्यमादिः कथिता मुनीन्द्रैः ॥२००॥
पधमनी सरिगमा अथवा मम पम पनि सनिगम, ।

इति मध्यमादिः ॥ २ ॥

(199-200) Raga Madhyamadi lakshana.
(சு. 199-200) 'மத்யமாதி' ராக லக்ஷணம்.

सम्पूर्णा भैरवी ज्ञेया ग्रहांशन्यास मध्यमा
सौवीरीमूर्छना ज्ञेया मध्यमग्रामचारिणी ।
केचिदेनां भैरववत् स्वरैर्ज्ञेया विचक्षणैः ॥ २०१ ॥

उदाहरणम् ।

स्फटिकरचितपीटे रम्यकैलासशृङ्गे
त्रिकचकमलपत्रैरर्चयन्तीमहेशम् ।
करधृतघनवाद्या पीतवर्णायताक्षी
सुकविभिरियमुक्ता भैरवी भैरवस्त्री ॥ २०२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मपधनि सरि गम अथवा धनि सगम धप ॥ इति भैरवी ॥ ३ ॥

(201-202) 'Bhairavi' lakshana.
(ஃ. 201-202) 'பைரவி' லக்ஷணம்.

वङ्गाली औडवाज्ञेया ग्रहांशन्यासषड्जभाक् ।
रिध हीना च विज्ञेया मूर्छना प्रथमा मता ।
पूर्णा वा मत्रयोपेता कल्लिनाथेन भाषिता ॥ २०३ ॥

उदाहरणम् ।

कक्षे निवेशितकरंण्डधरस्तपस्वी
भास्वत्त्रिशूल परिमण्डितवामहस्तः ।
भस्मोज्ज्वलो निबिडबद्धजटाकलापः
बङ्गाल इत्यभिहितस्तरुणार्कवर्णः ॥ २०४ ॥

सगम पनि स अथवा मपधनि सरि गम । इति वङ्गाली ॥४॥

(203-204) 'Bangali' lakshana.
(ஃ. 203-204) 'பங்காளி' லக்ஷணம்.

षड्जग्रहांशकन्यासा वराटी कथिता बुधैः ।
प्रथमा मूर्छना यस्यां सम्पूर्णा कीर्तिवर्धनी ॥ २०५ ॥

उदाहरणम् ।

विनोदयन्ती दयितं सुकेशी सुकङ्कणा चामरचालनेन ।
कर्णे दधाना सुरवृक्षपुष्पं वराङ्गनेयं कथिता वराटी ॥ २०६ ॥

सरिगम पधनिस । इति वराटी ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(205-206) 'Varati' lakshana.
(205-206) 'வராடி' (வராளி) லக்ஷணம்.

षड्जग्रहांशकन्यासा सम्पूर्णा सैन्धवी मता ।
मूर्छनोत्तरमन्द्राद्या कैश्चित् षाडविका मता ।
रिहीना तु भवेन्नित्यं रसे वीरे प्रयुज्यते ॥ २०७ ॥

उदाहरणम् ।

त्रिशूलपाणिः शिवभक्तियुक्ता रक्ताम्बरा-धारितबंधुजीवा ।
वीरे रसे गायकगीतवर्णा सा सैन्धवी भैरवरागिणीयम् ॥२०८॥

सरिगम पधनिस अथवा सगमपधनिस इति । सैन्धवी ॥ ६ ॥
इति पंचभार्यासहितोभैरवः ।

(207-208) 'Saindhavi' lakshana.
(சு. 207-208) 'ஸைந்தவி' லக்ஷணம்.

षड्जग्रहांशकन्यासः सम्पूर्णः कौशिको मतः ।
मूर्छना प्रथमा ज्ञेया काकलीस्वरसम्मतः ॥ २०९ ॥

उदाहरणम् ।

आरक्तवर्णो धृतगौरयष्टिः वीरः सुवीरेषु कृतप्रवीरः ।
वीरैर्वृतो वैरिकपोलमालामाली मतो मालवकौशिकोयम् ॥२१०॥

सरिगमपधनिस सनिधपमगरिस । इति मालव कौशिकः ॥७॥

(209-210) 'Malava Kausika' lakshana.
(சு. 209-210) 'மாளவ கௌசிக' லக்ஷணம்.

मध्यमांश ग्रहन्यासा सौवीरी मूर्छना मता ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सम्पूर्णा कथिता तज्ज्ञैः टोडी स्त्री कौशिके मता ।
ग्रहांशन्यासषड्जश्च केचिदत्र प्रचक्षते ॥ २११ ॥

उदाहरणम् ।

तुषार कुन्दोज्ज्वल देहयष्टि:काश्मीर कर्पूर विलिप्तदेहा ।
विनोदयन्ती हरिणं वनान्ते वीणाधरा राजति टोडिकेयम् ॥२१२॥
मपधनि सरिगम अथवा सरिगम पधनिस । इति टोडी ॥८॥

(211-212) 'Todi' lakshana,
(சு. 211-212) 'டோடி' (தோடி) லக்ஷணம்.

धैवतांश ग्रहन्यासा षाडवा त्यक्तपञ्चमा ।
खंभावतीच विज्ञेया मूर्छना पौरवी मता ॥ २१३ ॥

उदाहरणम् ।

खंभावतिः स्यात् सुखदा रसज्ञा सौन्दर्यलावण्य विभूषिताङ्गी ।
दानप्रिया कोकिल तुल्यनादा प्रियं वदा कौशिकरागिणीयम् ॥२१४॥

धनि सरि गमध । इति खंभावती ॥ ९ ॥

(213-214) 'Khambhavati lakshana.
(சு. 213-214) 'கம்பாவதி' லக்ஷணம்.

ग्रहांशन्यासषड्जास्या द्विपवर्जा सुखप्रदा ।
मूर्छना प्रथमा ज्ञेया गौरी सर्वाङ्गसुन्दरी ॥ २१५ ॥

उदाहरणम् ।

निवेशयन्ती श्रवणेवतंसमाम्राङ्कुरं कोकिलनादरम्या ।
श्यामा मधुस्यन्दितसूक्ष्मनादा गौरीयमुक्ता किल कोहलेन ॥२१६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सगमधनिस सनिधमगम । इति गौरी ॥ १० ॥

(215-216) 'Gouri' lakshana.
(ஸ. 215-216) 'கௌரி' லக்ஷணம்.

रिधहीना गुणकरी चौडवा परिकीर्तिता ।
निग्रहांशा तुनिन्यासा कैश्चित् षड्जत्रयामता ॥
रजनी मूर्छना चात्र मालवाश्रयणी तु सा ॥ २१७ ॥

उदाहरणम् ।

शोकाभिभूतनयनारुणदीनदृष्टिः
नम्रानना धरणिधूसरगात्रयष्टिः ।
आमुक्तचारुकवरी प्रियदूरवर्ती
संकीर्तिता गुणकरी करुणे कृशाङ्गी ॥ २१८ ॥

निसगमपनि निपमगसनि अथवा सगमपनिस । इति गुणकरी ॥ ११ ॥

(217-218) 'Gunakari' lakshana.
(ஸ. 217-218) 'குணகரி' லக்ஷணம்.

धैवतांशग्रहन्यासा सम्पूर्णा ककुभामता ।
तृतीयमूर्छनोत्पन्ना श्रृङ्गाररसमण्डिता ॥ २१९ ॥

उदाहरणम् ।

सुपोषिताङ्गी रतिमण्डिताङ्गी चन्द्रानना चम्पकदामयुक्ता ।
कटाक्षिणी स्यात् परमा विचित्रनादेन युक्ता ककुभा मनोज्ञा ॥

धनिसरिगमपध इति ककुभा ॥ इति पञ्चभार्यासहितो
मालव कौशिकः ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(219-220) 'Kakuba' lakshana.
(219 220) 'ககுபா' லக்ஷணம்.

हिन्दोलको रिधत्यक्तः सत्रयः कथितो बुधैः ।
मूर्छना शुद्धमध्या स्यात् औडवः काकलीयुतः ॥ २२१ ॥

उदाहरणम् ।

नितम्बिनीमन्दतरङ्गितासु दोलासु खेलासुखमादधानः ।
खर्वःकपोतद्युतिकामयुक्तो हिन्दोलरागः कथितोमुनीन्द्रैः ॥ २२२ ॥

सगम पाने मपस । इति हिन्दोलः ॥ १३ ॥

(221-222) 'Hindola' lakshana.
(சு. 221-222) 'ஹிந்தோளா' லக்ஷணம்.

धैवतांशग्रहन्यासा पूर्णा वेलावली मता ।
पौरवीमूर्छना ज्ञेया रसेवीरे प्रयुज्यते ॥ २२३ ॥

उदाहरणम् ।

सङ्केतदीक्षां दयिते च दत्वा त्रितन्वती भूषणमङ्गकेषु ।
मुहुः स्मरन्ती स्मरमिष्टदेवं वेलावली नीलसरोजकान्तिः ॥२२४॥

धनि सरि गम पध । इति वेलावली ॥ १४ ॥

(223-224) 'Velavali' lakshana.
(சு. 223-224) 'வேளாவளி' லக்ஷணம்.

षड्जग्रहांशकन्यासा पूर्णा रामकरी मता ।
मूर्छना प्रथमा ज्ञेया करुणे सा प्रयुज्यते ॥ २२५ ॥

रिधत्यक्ता तु केचित्तु केचित्पञ्चमवर्जिता ।
षाडवा औडवा ज्ञेया सम्पूर्णा च त्रिधा मता ॥ २२६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उदाहरणम् ।

हेमप्रभाभासुरभूषणा च नीलं निचोलं वपुषा वहन्ती ।
कान्ते समीपे कमनीयकण्ठा मानोन्नता रामकरी मतेयम् ॥ २२७ ॥

सगमपनिस अथवा सरिगमपधनिस अथवा सरिगमधनि स । इतिरामकरी॥

(225-227) 'Ramakari' lakshana.
(ஸ. 225-227) 'ராமகரி' லக்ஷணம்.

देशाख्या षाडवा ज्ञेया गत्रयेण विभूषिता ।
ऋषभेण वियुक्ता सा शार्ङ्गदेवेन कीर्तिता ॥
मूर्छनाहरिणाश्वा च सम्पूर्णा केचिदूचिरे ॥ २२८ ॥

उदाहरणम् ।

वीरे रसे व्यंजितरोमहर्षा निरुध्य सम्वद्धविलासबाहुः ।
प्रांशुः प्रचण्डा किल सुंदराङ्गी देशाख्यारागः कथितो मुनीन्द्रैः ॥ २२९ ॥

[हिन्दोलकान्ताकिल देशकारः । इति वापाठः] ॥ गमपधनिसग अथवा गमपधनिसरिग इति देशाख्या ॥ १६ ॥

(228-229) 'Desakhya' lakshana,
(ஸ, 228-229) 'தேசாக்யா' (தேசாக்ஷி) லக்ஷணம்,

पञ्चमांश ग्रहन्यासा पूर्णा स्यात्पटमञ्जरी ।
हृष्यका मूर्छना ज्ञेया रसिकानां सुखप्रदा ॥ २३० ॥

उदाहरमम् ।

वियोगिनी कान्तविशीर्णनेत्रा स्रजं वहन्ती वपुषा च शुक्लाम् ।
आश्वास्यमाना प्रियया च सख्या सुघूसराङ्गी पटमञ्जरीयम् ॥

(230--231) 'Patamanjari' lakshana,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प ध निस रीगमप । इति पटमञ्जरी ॥ १७ ॥

(க. 230—231) படமஞ்சரி லக்ஷணம்.

रिपवर्जा च ललिता औडवा सत्रया मता ।
मूर्छनाशुद्धमध्या स्यात् संपूर्णां केचिदूचिरे ॥
धैवतत्रयसंयुक्ता द्वितीयललिता मता ॥ २३२ ॥

उदाहरणम् ।

प्रफुल्लसप्तच्छदमाल्ययुक्ता गौरी कृशाङ्गी तरुणी चलाक्षी ।
विनिश्वसत्सादवशात् प्रभाते विलासवेशा ललितोपदिष्टा ॥ २३३ ॥

सगमधनिस अथवा धनि सगमध । इति ललिता ॥ १८ ॥

इति पञ्च भार्यासहितो हिन्दोलकः ॥

(232—233) 'Lalita' lakshana

(க. 232—233) லலிதா லக்ஷணம்,

षड्जग्रहांशकन्यासः सम्पूर्णो दीपको मतः ।
मूर्छना शुद्धमध्यास्यात् गातव्या गायनै सदा ॥ २३४ ॥

उदाहरणम् ।

बाला रतार्थे प्रविलीनदीपे गृहेन्धकारे सुभगी प्रवृत्ता ।
तस्याः शिरोभूषणरत्नदीपैः लज्जां तदानीं कृतवान्प्रदीपः ॥ २३५ ॥

स रि ग म प ध नि स । इति दीपकः ॥ १९ ॥

(234-235) 'Dipaka' lakshana.

(க. 234-235) 'தீபக' லக்ஷணம்.

केदारी रिधहीनास्यात् औडवा परिकीर्तिता ।
नित्रया मूर्छनामार्गी काकलीस्वरसम्मिता ॥ २३६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उदाहरणम् ।

जटांदधानः सितचन्द्रमौलिः नागोत्तरीयो धृतयोगपीठः ।
गङ्गाधरो ध्याननिमग्नचित्तः केदाररागः कथितस्तपस्वी ॥ २३७ ॥

[विरहविधुरचित्ता पाण्डुगण्डा कृशाङ्गी
मलयजरसपूरैः सिच्यमाना सखीभिः ।
सरसकमलपत्रैः क्लृप्तशय्यानिविष्टा
हिमकरसितवस्त्रा भाति केदारिकेयम् ॥ २३८ ॥]

नि स ग ग प नि नि प म ग स नि । इति केदारी ॥ २० ॥

(236-238) 'Kedari' lakshana.
(ஃ. 236-238) 'கேதாரி' லக்ஷணம்.

त्रिनिषादोऽथ संपूर्णः निषादो विकृतो भवेत् ।
मार्गीयं मूर्छना ज्ञेया कर्णाटीयं सुखप्रदा ॥ २३९ ॥

उदाहरणम् ।

कर्णाटी कमलेक्षणा सुरतरोर्मूले वसन्ती मुहुः
श्वासोच्छ्वासविभिन्नमोदमभितः सम्पूरयन्ती दिशः
कीरं नीलनिचोलजुष्टमभितः स्वर्णमया बिभ्रती ।
कान्तारे पिककूजिते स्वदयितं साङ्केतिके पश्यति ॥ २४० ॥

निसरिगमपधनि । इति कर्णाटी ॥ २१ ॥

(238-240) 'Karnati' lakshana.
(ஃ. 238-240) 'கர்ணாடீ' லக்ஷணம்.

देशी पञ्चमहीना स्यात् ऋषभत्रयसंयुता ।
कलोपनतिका ज्ञेया मूर्छना विकृतर्षभा ॥ २४१ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उदाहरणम् ।

निद्रालसं सा कपटेन कान्तं विबोधयन्ती सुरतोत्सुकेन ।
गौरी मनोज्ञा शुकपुच्छवस्त्रा ख्याताच देशी रसपूर्णचित्ता ॥ २४२ ॥

रिगमधनिसरि इति देशी ॥ २२ ॥

(240-242) 'Desi' lakshana.
(ஸ். 240-242) 'தேசி' லக்ஷணம்.

धांशन्यासग्रहा पूर्णा पौरवी मूर्छना मता ।
मल्लारनिकटे गेया कामोदी च निगद्यते
शिवभूषणकेदारयुक्ता सर्वसुखप्रदा ॥ २४३ ॥

उदाहरणम् ।

पीतंवसाना वसनं सुकेशी वने रुदन्ती पिकनाददूना ।
विलोकयन्ती विदिशोऽतिभीता कामोदिकाकान्तमनुसरन्ती ॥

धनिसरिगमपध । इति कामोदी ॥ २३ ॥

(242-244) 'Kamodi' lakshana.
(க. 242-244) 'காமோதி' லக்ஷணம்.

ग्रहांशन्यासषड्जा स्यात् सम्पूर्णा नाटिका मता ।
प्रथमा मूर्छना ज्ञेया गमकैर्बहुधा मता ॥ २४५ ॥

उदाहरणम् ।

उद्यद्भानुसुहृच्छवि विकसितं पङ्केरुहं पाणिना
स्पृश्यन्ती मधुपानघूर्णनयना तन्वी तमालद्युतिः ।
ताम्बूलाहरणच्छलेन दयितं सङ्केतयन्ती निजं
क्रीडाकुञ्जगृहे लवङ्गलतिकामोदानिले कामिनी ॥ २४६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जपाकुसुमसङ्काशां निचोलं पीतवाससम् ।
वहन्ती वपुषा तन्वी नाटिका रक्तकञ्चुकी ॥ २४७ ॥

सरिगमपधनिस सनिधपमगरिस । इति नाटिका ॥ २४ ॥

इति पञ्चभार्यासहितो हिन्दोलः ।

(244-246) 'Natika' lakshana.
(ஸ, 244-246) 'நாடிகா' லக்ஷணம்.

श्रीरागः सचविख्यातः सत्रयेण विभूषितः ।
पूर्णः सर्वगुणोपेतः मूर्छना प्रथमा मता ॥
केचित्तु कथयन्त्येनं ऋषभत्रयसम्मतम् ॥ २४८ ॥

उदाहरणम् ।

अष्टादशाब्दः स्मरचारुमूर्तिः धीरोल्लसत्पल्लवकर्णपूरः ।
षड्जादिसेव्योऽरुणवस्त्रधारी श्रीरागराजः क्षितिपालमूर्तिः॥ १४९॥

सरिगमपधनिस अथवा रिगमपधनिस इति श्रीराग. ॥ २९ ॥

(247-249) 'Sriraga' lakshana
(ஸ. 247-249) 'ஸ்ரீராக' லக்ஷணம்.

वसन्ता स्यात्तु संपूर्णा सत्रया कथिता बुधैः ।
श्रीरागमूर्छनैवात्र गेया रागविशारदैः ॥ २५० ॥

उदाहरणम् ।

शिखण्डिबर्हाच्चयबद्धपीडा कर्णावतंसा स्फुरदाम्रपत्रा ।
इन्दीवरश्यामतनुर्मनोज्ञा वसन्तिका स्यादलिमञ्जुलश्रीः ॥ २५१

सरिगमपधनिस इति वसन्तिका ! ॥ २६ ॥

(249-251) 'Vasantika' lakshana.
(ஸ. 249-251) 'வஸந்திகா' (வஸந்தா) லக்ஷணம்.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मालवी चौडवा ज्ञेया नित्रया प, रि, वर्जिता ।
रजनी मूर्छना ज्ञेया काकलीस्वरमण्डिता ॥ २९२ ॥

उदाहरणम् ।

नितम्बिनीचुम्बितवक्त्रपद्मः शुकद्युतिः कुण्डलवान्प्रमत्तः ।
सङ्गीतशालां प्रविशन्प्रदोषे मालाधरो मालव एष रागः ॥२५३॥

निसपमगनि । इति माळवी ।

[निसरिमगनि इति वा पाठः] ॥ २७ ॥

(252-253) 'Malavi' lakshana.
(ஸ. 252-253) 'மாளவி' லக்ஷணம்.

मालवश्रीश्चरक्ताङ्गी पूर्णा सत्रयमूषिता ।
मूर्छनोत्तरमन्द्रा स्यात् शृङ्गाररसमण्डिता ॥ २९४ ॥

उदाहरणम् ।

रक्तोत्पलं हस्ततले नियुक्तं विभावयन्ती तनुदेहवल्ली ।
रसालवृक्षस्थतले निषण्णा स्तोकस्मिता साकिल मालवश्रीः ॥

सरिगमपधनिस । इति माळवश्रीः ॥ २८ ॥

(254—255) 'Malavasri' lakshana.
(ஸ, 254—255) 'மாளவஸ்ரீ' லக்ஷணம்

सत्रया हीनऋषभा षाडवा च धनासिरी ।
मूर्छना प्रथमा ज्ञेया रसे वीरे प्रयुज्यते ॥ २९६ ॥

उदाहरणम् ।

दूर्वादलश्यामतनुर्मनोज्ञा कान्तं लिखन्ती विरहेण दूना ।
श्वेते कपोले नयनारविन्दनिष्यन्दनिर्धूतकुचा धनाश्रीः ॥

सगमपधनिस । इति धनाश्रीः ॥ २९ ॥

(256-257) 'Dhanasri' lakshana.
(ஸ, 256-257) 'தனாஸ்ரீ' லக்ஷணம்,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

असावरी गरित्यक्ता पग्रहां शांत(?) औडवा ।
न्यासस्तु धैवतोज्ञेयः करुणारसनिर्भरा ॥ २५८ ॥ अथवा

उदाहरणम् ।

ककुभाद्धैवतोत्पन्ना धैवतांशग्रहामता ।
पञ्चमेनैव रहिता षाडवा च निगद्यते ॥ २५९ ॥

श्रीखण्डशैलशिखरे शिखिपुच्छवस्त्रा
मातङ्गमौक्तिककृतोत्तमहारवल्ली ।
आकृष्य चन्दन तरोरुरगं वहन्ती
सासावरीति कथितोज्वल नीलकान्तिः ॥ २६० ॥

धनिसमपध । अथवा मधनिसरिगधगरिसनिध । इति सावेरी ॥ ३० ॥

(257-259) 'Asavari' (Saveri) lakshana.

(ஃ. 257-259) 'ஆஸாவரி' (ஸாவேரி) லக்ஷணம்,

इति पञ्चभार्यासहितः श्रीरागः ॥

मेघः पूर्णो धत्रयःस्यात् उत्तरायतमूर्छनः ।
विकृतो धैवतो गेयः श्रृङ्गाररसपूरकः ॥ २६१ ॥

उदाहरणम् ।

नीलोत्पलाभवपुरिन्दुसमानचैलः पीताम्बरस्तृषितचातकयाच्यमानः
पीयूषमन्दहसितोद्यमममध्यवर्ती वीरेषु राजति युवा किल मेघरागः

धनिसरिगमपध इति मेघरागः ॥ ३१ ॥

(260-261) 'Megharaga lakshana.

(ஃ. 260-261) 'மேகராக' லக்ஷணம்,

मल्लारी सपहीनास्यात् ग्रहांशन्यासधैवता ।
औडवा पौरवी ज्ञेया वर्षासु सुखदा सदा ॥ २६२ ॥

---

1. 'Asavari' and 'saveri' are both indifferently used for the raga in older texts also.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गौरी कृशा कोकिलकण्ठनादा गीतछलेनात्मपतिं स्मरन्ती ।
आदाय वीणां मलिना रुदन्ती मल्लारिका यौवन दूनचित्ता ॥२६३

धनिरिगमध इति मल्लारिका ॥ ३२ ॥

(262-263) 'Mallari' lakshana.
(ச. 262-263) 'மல்லாரி' லக்ஷணம்.

देशकारी तु सम्पूर्णा षड्जन्यास महांशका ।
मूर्छना प्रथमा ज्ञेया वराटीमिश्रिताभवेत् ॥ २६४ ॥

उदाहरणम् ।

भर्त्रासमं केलिरसं सुकेशी सर्वाङ्गपूर्णा कमलायताक्षी ।
पीनस्तनी रुक्मतनुः सुवेशा संपूर्णचन्द्राानन देशकारी ॥

सरिगमपधनिस इति देशकारी ॥ ३३ ॥

(263-264) 'Deshakari' lakshana.
(ச. 263-264) 'தேசகாரி' லக்ஷணம்.

षड्जग्रहांशकन्यासा भूपाली कथिता बुधैः ।
मूर्छना प्रथमा यत्र सम्पूर्णा शान्तिके रसे
कैश्चित्तुरीयहीनेयं औडवा परिकीर्तिता ॥ २६६ ॥

गौरद्युतिः कुङ्कुमलिप्तदेहा तुङ्गस्तनी चन्द्रमुखा मनोज्ञा ।
भर्तुः स्मरन्ती विरहेण दूना भूपालिकेयं रसशान्तियुक्ता ॥

सरिगमपधनिस इति भूपाली ॥ ३४ ॥

(266-267) 'Bhupali' lakshana.
(ச. 266-267) 'பூபாளி' லக்ஷணம்.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ग्रहांशन्यास ऋषभा सम्पूर्णा गुर्जरी मता ।
सप्तमी मूर्छना तस्यां वहुन्यास विमिश्रिता ॥ २६७ ॥

उदाहरणम् ।

श्यामा सुकेशी मलयद्रुमाणां मृदूल्लसत्पल्लव तल्पमध्ये ।
श्रुतिस्वराणां दधतीवभागं तन्त्रीमुखाद्दक्षिणगुर्जरीयम् ॥

रिगमपधनिसरि इति गुर्जरी ॥ ३५ ॥

(268-269) 'Gurjari' lakshana.
(க. 268-269) 'குர்ஜரி' லக்ஷணம்.

टक्कःस्यात्तु त्रिधाषड्जः सम्पूर्णश्चादि मूर्छनः ।

उदाहरणम् ।

शय्यासु सुप्तां नलिनीदळानां वियोगिनीं वीक्ष्य विषण्णचित्तां ।
सुवर्णवर्णग्रहमागतःसन् सम्भाषते तां किल टक्कसंज्ञः ॥

सरिगमपधनिस इति टक्कः । इति पञ्चभार्यासहितो मेघरागः ॥ ३६ ॥

(270) 'Takka raga' lakshana
(க270) 'டக்க ராக' லக்ஷணம்

कल्याणनाटो विज्ञेयः सम्पूर्णो रित्रयोमतः ।
षड्जत्रयोपि कैश्चित्तु सम्प्रदिष्टो मनीषिभिः ॥ २७१ ॥

उदाहरणम् ।

कृपाणपाणिस्तिलकं ललाटे सुवेषवेषः समरे प्रचण्डः ।
स्मरत्प्रविष्टः किल रक्तवर्णः कल्याणनाटः कथितोमुनीन्द्रैः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रिगमपधनिसरिअथवा सरिगगपधनिस, इति कल्याणनाटः ॥ ३७ ॥

(271-272) ' Kalyana nata
(க 271-272) 'கல்யாணநாட்ட' லக்ஷணம்

सारङ्गनाटः सम्पूर्णः सत्रयोत्तरमन्द्रजः ।

उदाहरणम् ।

वीणांदधाना दृढवद्धवेणी
सख्यासमं मञ्जुलवृक्षमूले ।
जाम्बूनदाभा च निषण्णदेहा
सारङ्गनाटा कथिता सुवेषैः ॥ २७३ ॥ अथवा

करधृतवीणा सख्यामहोपविष्टा च कल्पतरुमूले ।
दृढतरनिबन्द्धकबरी सारङ्गासा सुरङ्गिणी प्रोक्ता ॥ २७४ ॥

सरिगमपधनिस इति सारङ्गनाटः ॥ ३८ ॥

(273—274) 'Saranganata' lakshana
(க, 273—274) சாரங்கநாட்ட (சாலங்கநாட்ட) லக்ஷணம்

देवगिर्याः स्वराः प्रोक्ताः सारङ्गसदृशा मताः ।

उदाहरणम् ।

नितम्बिनी श्यामतनुः प्रवृत्ततुङ्गस्तनी सुन्दरहारवल्ली ।
चित्रांवरा मत्तचकोरनेत्रा मदालसा देवगिरी मतेयम् ॥२७५॥

सरिगमपधनिस इति देवगिरी ॥ ३९ ॥

275— 'Devagiri' lakshana
(க, 275) 'தேவகிரி' லக்ஷணம்

मोरटी षाडवा ज्ञेया पञ्चमलयसम्मता ।
रिहीनाच समाख्याता कैश्चित्षड्जत्रयामता ॥ २७६ ॥

पीनोन्नतस्तनतटोत्तमहारवल्ली
कर्णोत्पलभ्रमरनादविलम्भचित्ता ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यातिं प्रियान्तिक मतिश्लथबाहुवल्ली
सौराष्ट्रिका मदनमूर्तिविचारगौरा ॥ २७७ ॥

पधनि सगमप अथवा सगमपधनिस इति सोरटी ॥ ४० ॥

(276—277) 'Sorati' lakshana
(சு, 276—277) 'ஸோரடி' (சுருட்டி) லக்ஷணம்

त्रिवणा साच विज्ञेया ग्रहांशन्यासधैवता ।
औडवा सा समाख्याता परिहीना प्रकीर्तिता ॥ २७८ ॥

उदाहरणम् ।

रम्भायाः सुतरोर्मूले निषण्णा पीतवर्णभाक् ।
तन्वङ्गी हारसंयुक्ता प्रियेण त्रिवणा मता ॥ २७९ ॥

धनिसगमध । इति त्रिवणा ॥ ४१ ॥

(278-279) 'Trivana' Lakshana
(சு. 278-279) 'த்ரிவணு' லக்ஷணம்

षड्जत्रया पहाडी स्यात् रिपहीना च गौरिवत् ।
छाया तैलङ्गदेशीया आलापे चौडवा मता ॥ २८० ॥

उदाहरणम् ।

वीणोपगायत्यतिसुन्दराङ्गी
रक्ताम्बरा मञ्जुकदम्बमूले
श्रीचन्दनाद्रौ स्थितिकारिणी सा
श्रीरागकान्ता कथिता पहाडी ॥ २८१ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति पहाडी ॥ ४२ ॥

(280-281) 'Pahadi' lakshana
சு (280-281) 'பஹாடீ' லக்ஷணம்.

रागः पञ्चमको ज्ञेयः पहीनः षाडवो मतः ।
प्रथमा मूर्छना यत्र षड्जत्रयविभूषितः ।
केचिद्वदन्ति सम्पूर्णः शृङ्गाररसपूरकः ॥ २८२ ॥

उदाहरणम् ।

रक्ताम्बरो रक्तविशालनेत्रः शृङ्गारयुक्तस्तरुणो मनस्वी ।
प्रभातकाले विजयी च रत्यां सदा प्रियः कोकिलमञ्जुभाषी ॥

सरिगम धनिस अथवा - सरिगमपधनिस इतिपञ्चमरागः ॥ ४३ ॥

(282—283) 'Panchamaraga' lakshana.
(சு. 282—283) 'பஞ்சம ராக' லக்ஷணம்.

वेलावल्याः स्वरैर्युक्तः शङ्कराभरणो मतः ॥ २८४ ॥
इति शङ्कराभरणम् ॥ ४४ ॥

(284) 'Sankarabharana' lakshana.
(சு, 284) 'சங்கராபரண' லக்ஷணம்,

बडहंसे स्वरा ज्ञेयाः कर्णाटे कथिता गुधैः ॥ २८९ ॥
इति बडहंसः ॥ ४५ ॥

(285) 'Badahamsa' lakshana.
(சு, 285) 'படஹம்ஸ' (பலஹம்ம்) லக்ஷணம்,

ललितावद्विभासस्तु रेवा गुर्जरिवत्सदा ॥ २८६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति विभासः । इति रेवा ॥ ४६ ॥

(286) 'Reva' ragalakshana
(சு, 286) 'ரேவா' லக்ஷணம்.

देशाख्यसदृशा गेया कुडाई सर्वसम्मता ॥ २८७ ॥
इति कुडाई ॥ ४७ ॥

(28,7)' Kudayee' lakshana.
(சு287) 'குடாயீ' லக்ஷணம்,

कल्याणसदृशी गेया आभीरी सर्वसम्मता ॥ २८८ ॥
इति आभीरी ॥ ४८ ॥

(288) 'Abhiri' lakshana.
(சு, 288) 'ஆபீரி' லக்ஷணம்,

मालश्री जयतश्रीश्च धानाश्री मारुका तथा ।
एषां श्रुतिस्वरग्रामजात्यादिनियमो न हि
नानादेशगतच्छाया देशी रागास्तु ते स्मृताः ॥ २८९ ॥

(289) 'Malasri' 'Jayatasri' 'Dhanasri' 'Maruka' and other Desi Ragas do not obey the laws of Sruti Swara, Grama, and Jati.

சு (289) மாளஸ்ரீ ; 'ஜயதஸ்ரீ ; தனஸ்ரீ ; 'மாருகா' முதலிய தேசி ராகங்களுக்கு ச்ருதி, ஸ்வர, க்ராம், ஜாதி நியமம் இல்லை

इति श्रीलक्ष्मीधर सुत चतुरदामोतर विरचिते सङ्गीतदर्पणे

'रागाध्यायः' ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'अथ प्रकीर्णकाध्यायः'।

अथ गीतोपयोगित्वादालप्तिगमकादयः ।
निरूप्यन्ते मया सम्यक् लक्ष्यदृष्ट्या तु तत्वतः ॥ २९० ॥

रागालापनमालप्तिः प्रकटीकरणं मतम् ।
सापुनर्द्विविधा रागरूपकाभ्यां विशेषणात् ॥ २९१ ॥

(290-291) 'Alapana or Alapti' or exposition of the 'Raga' or mode defined; and its 2 kinds, namely.

(1) Ragalapti, the expansion of Raga without a composition

(2) Rupakalapti, that is expansion of portions of of a musical piece

(சு 290-291) 'ஆலாபம் அல்லது ஆலப்தி' என்னும் ராக விஸ்தாரம்--அதன் இருவகை;— (1) ராக ஆலப்தி (2) ரூபக ஆலப்தி

स्वस्थानकैश्चतुर्भिर्या क्रियतेरूपकं विना ।
सा रागालप्तिरुदिता रूपकक्षेपणोत्तरा ॥ २९२ ॥

रागोपवेशनं यत्र स स्थायीस्वर उच्यते ।
यश्चतुर्थस्वरस्तस्मात् स च द्व्यर्ध उदीरितः ॥ २९३ ॥

तस्मादधस्तने यत्तु चालनं क्रियते स्वरे ।
मुखचालस्सकथितः स्वस्थानं प्रथमं च तत् ॥ २९४ ॥

द्व्यर्धस्वरे चालयित्वा विन्यसेत्तद् द्वितीयकम् ।
स्थायिस्वरादष्टमस्तु द्विगुणः परिकीर्तितः ॥ २९५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्व्यर्धद्विगुणयोर्मध्ये स्थिता अर्धस्थिताःस्वराः ।
अर्धस्थिते चालयित्वा न्यसनं तु तृतीयकम् ॥ २९६ ॥

द्विगुणं चालयित्वा तु स्थायिन्यासश्चतुर्थकम् ।
एभिस्थानैश्चतुर्भिस्तु रागालप्तिर्विधीयते ॥ २९७ ॥

इदमेवोच्यते गानं अनिबद्धं पुरातनैः ।

(292-297) '**Method of Raga-Alapana; its stages or 'swasthanas'.**

சு. (292-297) ராக ஆலாபனம் செய்யும் முறை; அதில் 4 படிகள் அல்லது 'ஸ்வஸ்தானங்கள்' (சொந்த வீடுகள்).

रूपकस्थेन रागेण तालेन च विधीयते ॥ २९८ ॥

रूपकालप्तिरेषा तु द्विविधा कथिता बुधैः ॥ २९९ ॥
प्रतिग्रहणिकाख्याद्या भञ्जनी संज्ञिकापरा ।
विधाय स्थायमालप्ते रूपकावयवो यदि ॥ ३०० ॥

प्रतिगृह्येत सा प्रोक्ता प्रतिग्रहणिका बुधैः ।
भञ्जनी द्विविधा ज्ञेया स्थायरूपक भञ्जनात् ॥ ३०१ ॥

यदा तत्पदमानेन स्थायरूपकसंश्रयात् ।
नाना प्रकारः क्रियते सा ज्ञेया स्थाय भञ्जनी ॥ ३०२ ॥

तैः पदैस्तेन मानेन समग्रं रूपकं यदि ।
अन्यथा चान्यथा गायेदसौ रूपकभञ्जनी ॥ ३०३ ॥

इदमेवोच्यते लोके नेमशब्देन गायकैः ।

(298-303) **Rupaka Alapti, its 2 kinds :—**

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(1) Pratigrahanika & (2) Bhanjani ; the 2 forms of Bhanjani. (1) Consists in improvising music ending in the particular phrase in the piece; (2) Consists in changing the form of the phrase party or fully maintaining the chhaya or emotion.

(298·303) ரூபக ஆலப்தி—அதன் இருவகை—

(1) ப்ரதிக்ரஹணிகா (ஸ்வரம் பாடுதல்;, (2) பஞ்சனி (சங்கதிபோடுதலும், நிரவலும்)

वर्णालङ्कार सम्पन्ना गमकस्थायचित्रिता ॥ ३०४ ॥

आलप्तिः क्रियते तद्ज्ञैः वहुभङ्गिमनोहरा ।
स्वरस्य कम्पो गमकः श्रोतृचित्त सुखावहः ॥ ३०५ ॥

भेदाः पञ्चदशैवास्य कथितास्तिरिपादयः ।
लघिष्ठडमरुध्वान कम्पानुकृतिसुन्दरः ॥ ३०६ ॥

द्रुततुर्यांशवेगेन तिरिपः परिकीर्तितः ।
यदा द्रुततृतीयांश वेगःस्यात्स्फुरितस्तदा ॥ ३०७ ॥

द्रुतार्धमानवेगेन कम्पितं गमकं विदुः ।
द्रुतवेगेन लीनस्तु कम्पने गमको भवेत् ॥ ३०८ ॥

लघुवेगेन कम्पश्चेत् भवेदान्दोलितस्तदा ।
नाना प्रकारवक्रत्वं स्वरकम्पो यदा भवेत् ॥ ३०९ ॥

वेगाधिकस्तथा प्रोक्तो गमको वलिसंज्ञकः ।
त्रिभिन्नस्तु त्रिषुस्थानेष्वविश्रान्तघनस्वरः ॥ ३१० ॥
कण्ठे तु कोमलः कंम्पः ग्रन्थिलोवलिलक्ष्मयुक् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुरुलो नाम गमकः तदा प्रोक्तो मनीषिभिः ॥ ३११ ॥

स्वरमग्रिममाहत्य निवृत्तिस्त्वाहतो भवेत् ।
उल्लासितः स गमको यस्स्वराननुत्तरोत्तरान् ॥ ३१२ ॥

क्रमाद्गच्छन् भवेत्कम्पो वैचित्र्याद्धृदयङ्गमः ।
प्लावितो गमकः प्रोक्तः प्लुतमानेन कम्पनम् ॥ ३१३ ॥

हृदयङ्गमहुङ्कारो गम्भीरोगुंफितोभवेत् ।
मुखमुद्रणसम्भूतो मुद्रितोगमकोभवेत् ॥ ३१४ ॥
स्वराणां नमनादुक्तो गमको नामितामिधः ।
एतेषामेव भेदानां यदास्यान्मिश्रणान्मिथः ॥ ३१५ ॥

मिश्रितस्स तदा प्रोक्तो गमकःस्याद्विचक्षणैः ।

(304-315) Gamaks or Graces; its 15 forms.
(சு 304-315) கமகங்கள் 15 வகை.

स्थाया अपि भवन्त्यत्र रागस्यावयवात्मना ॥ ३१६ ॥

(316-317) Sthayas or kinds of musical phrases well described in other text-books; hance not dealt with herein.

(சு. 316-317) 'ஸ்தாயங்கள்' அல்லது பிடிகள். மற்ற நூல்களில் கண்டு கொள்க.

प्रसिद्धास्तद्विदां तेतु नोक्ता विस्तरभीतितः ।
रागाभिव्यक्तिशक्तित्वमनभ्यासेपि यध्द्वनेः ॥ ३१७ ॥

तच्छारीरमितिप्रोक्तं शरीरेण सहोद्भवात् ।
तारस्थाने भवेद्यस्य माधुर्यं स्निग्धता तथा ॥ ३१८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गाम्भीर्यं मृदुता रक्तिः पुष्टिः कान्तिरनुध्वनिः ।
तत्सुशारीरमित्युक्तं लक्ष्यलक्षणकोविदैः ॥ ३१९ ॥

अनुध्वानविहीनत्वं रूक्षत्वं त्यक्तरक्तिता ।
निस्सारता विस्वरता काकित्वं स्थानविच्युतिः ॥ ३१० ॥

कार्श्यं कार्कश्यमित्येतत्कुशारीरन्तु दूषणैः ।
विद्यादानेन तपसा भक्त्या वा पार्वतीपतेः ।
प्रभूतभाग्यविभवैः सुशारीरमवाप्यते ॥ ३२१ ॥

(317-321) 'Sarira' or musical voice defined; its good and fad features,

(சு 317 321) 'சாரீரம்' என்றால் என்ன ? அதன் குணங்களும் தோஷங்களும்

एतत्प्रसङ्गतो लक्ष्म गायनादेरथोच्यते ।
लयतालकलाभिज्ञो ग्रामरागादिभेदवित् ।
गीतं गायति यो नाम रञ्जकस्स तु गायकः ॥ ३२२ ॥

सुशारीरो भवेद्यस्तु ग्रहमोक्षविचक्षणः ।
रागरागाङ्गभाषादि भेदज्ञस्तालवित्तमः ॥ ३२३ ॥

प्रबन्धगाननिपुणो विविधालापकोविदः ।
गमकेषु च सर्वेषु स्थानत्रयलसद्गतिः ॥ ३२४ ॥

आयत्तकण्ठवान् शुद्धच्छायालगविशेषवित् ।
जितश्रमस्सावधानः सर्वदोषविवर्जितः ॥ ३२५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुसम्प्रदायो गीतज्ञैः कथ्यतेगायनोत्तमः ।
गुणैः कतिपयैर्हीनो निर्दोषो मध्यमोमतः ॥ ३२६ ॥

(322-326) 4 grades of singers: Gayaka, Gayakotth-ama, Gayaka madhyama, Gayakadhama,
(ஈ 322-326) பாடகர்களின் 4 வகை: காயன, காயகோத்தம காயகமத்தியம, காயகாதமர்கள்

कैश्चिद्गुणैरुपेतोपि सदोषो गायकाधमः ।
सन्दष्टोद्घुष्टभीतादि दोषाः स्युः पञ्चविंशतिः ॥ ३२७ ॥

सन्दश्य दशनं गायेत् असौ सन्दष्ट उच्यते ।
उद्घुष्टो विरसोद्घोषः सीत्कारी सीत्कृतैर्मुहुः ॥ ३२८ ॥

भयान्वितस्तु यो गायेत् स भीतो गायनो भवेत् ।
शङ्कितस्तु बुधैरुक्तः त्वरया यस्तु गायति ॥ ३२९ ॥

कम्पितः कम्पितो ज्ञेयः स्वभावाद्गात्रशब्दयोः ।
करालोद्घट्टितमुखः करालो गायनो भवेत् ॥ ३३० ॥

विकलस्सतु यो गायेत् स्वरान्न्यूनाधिकस्मृतान् ।
काकक्रूरखः काकी विताली तालविच्युतः ॥ ३३१ ॥

दधानः कन्धरं मूर्ध्नि करभोभिहितो बुधैः ।
छागवद्गहनीं कुर्वन् उद्भटोधमगायकः ॥ ३३२ ॥

शिरालफालवदनग्रीवामुखविकारवान् ।
झोंबकः कथितस्तज्ज्ञैर्गायनस्सर्वतोऽधमः ॥ ३३३ ॥

तुम्बकी तुम्बकाकारोत्फुल्लगलस्तु गायनः ।
वक्रीकृत्य तु योग्रीवां गायेद्वक्री स उच्यते ॥ ३३४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गात्रं प्रसार्य यो गायेत् प्रसारी सतु गायनः ।
नेत्रे निमील्य यो गायेत् सतु प्रोक्तो निमीलकः ३३५ ॥

नीरसो रक्तिहीनो यः स प्रोक्तो विरसोऽधमः ।
यस्तुवर्ज्यस्वरं गायेत् सोपस्वर उदाहृतः ॥ ३३६ ॥

अव्यक्तवर्णं यो गायेत् अव्यक्तस्सनिगद्यते ।
स्थानत्रयंनशक्नोति गातुं गानक्रियासु यः ॥ ३३७ ॥

स्थानभ्रष्टस्सकथितो गीतज्ञैर्गायनाधमः ।
शुद्धच्छायालगौ रागौ मिश्रयन्यस्तुगायति ॥ ३३८ ॥

समिश्रकस्तथान्येषां रागाणामपि मिश्रणात् ।
स्थाय्यादिष्ववधानेन निर्मुक्तोऽनवधानकः ॥ ३३९ ॥

(327-339) The 25 Outstanding faults in Singing.
(ச 327-339) பாடுவதில் ஏற்படும் 25 தோஷங்கள்

शिक्षाकारोनुकारश्च रसिको रञ्जकस्तथा ।
भावकश्चेति गीतज्ञाः पञ्चधा गायनं जगुः ॥ ३४०

अन्यूनशिक्षणे दक्षः शिक्षाकारो मतस्सताम् ।
स्वबुध्यातिशयेनान्यच्छायामनुकरोतियः ॥ ३४१ ॥

अनुकारस्सकथितो द्वितीयोगायनो बुधैः ।
स्वयमेवरसाविष्टो रसिकोगायनोभवेत् ॥ ३४२ ॥

गानेन रञ्जयेद्यस्तु श्रोतॄन् गाता स रञ्जकः ।
गीतस्यातिशयोत्थानाद्भावकः परिकीर्तितः ॥ ३४३ ॥

340—343. Four types of singers
(ச. 340—343) நான்குவகைப் பாடகர்கள்.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एकल्यो यमलो वृन्दगायनश्चेति सत्रिधा ।
एक एव तु यो गायेत् असावेकल्यगायनः ॥ ३४४ ॥

सद्वितीयो यमलकः सवृन्दो वृन्दगायकः ।

344— Single double and group singers.

ஃ. 344— ஒருவர், இருவர், பலர் சேர்ந்து பாடும் பாடகர்கள்

रूपयौवन माधुर्यशालित्वमधिकोगुणः ॥ ३४५ ॥

345. The 3 necessary requirements of singers:—
(1) attractive personality (2) youthful stage in life. (3) sweet voice.

ஃ, 345. பாடகர்களுக்கு முக்கியமான 3 குணங்கள்:—
(1) நல்லதோற்றம், (2) வாலிப வயது. (3) இனியகுரல்.

वाग्वर्णसमुदायस्तु मातुरित्युच्यते बुधैः ।
गेयं धातुर्द्वयोः कर्ता प्रोक्तो वाग्गेय कारकः ॥ ३४६ ॥

346— The 2 Component parts of musical Composition:—

(1) 'Matu' (the words) (2) 'Dhathu' (the tune)

ஃ—346— ஸங்கீத ஸாஹித்தியத்தின் 2 அங்கங்கள்:—
(1) 'மாது' (வார்த்தைகள்) (2) 'தாது' (வர்ண மெட்டு)

शब्दानुशासनज्ञान मभिधानप्रवीणता ।
छन्दःप्रभेदवेदित्वं अलङ्कारेषु कौशलम् ॥ ३४७ ॥

रसभावादिविज्ञानं सर्वदेशस्थितिज्ञता ।
लयतालकलाज्ञानं हृद्यशारीरशालिता ॥ ३४८ ॥

संङ्गीतशास्त्रनैपुण्यं प्रतिभाच सभाजयः ।
रागद्वेषपरित्यागः सान्द्रत्वमुचितज्ञता ॥ ३४९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रत्यग्रधातुनिर्माणमनुच्छिष्टार्थकल्पनम् ।
द्रुतगीतविनिर्माणं पाठान्तरविदग्धता ॥ ३९० ॥

इत्यादि गुणसपन्नश्रेष्ठो वाग्गेयकारकः ।

347—350— 'Vak-geya-kara' (the highly qualified Composer of musio) and his qualifications.

(க. 347—350— 'வாக்கேயகாரர்' எனும் உயர்ந்த சாகித்ய கர்த்தாவின் லக்ஷணங்கள்.

धातोरतिशयं कुर्यात् मातुमन्दस्तु मध्यमः ॥ ३९१ ॥

अप्रगल्भः प्रबंन्धेषु भवेत्सोपि च मध्यमः ।
अन्यधातौ मातुकर्ता कुट्टिकारोऽधमोमतः ॥ ३९२ ॥

351—352— The lower ranks of comopsers
(அ. 351—352—) மத்தியம், அதம வாக்கேயகாரர்கள்.

इति श्रीमल्लक्ष्मीधरभट्टसुत चतुरदामोदर विरचिते
संङ्गीतदर्पणे, प्रकीर्णकाध्यायस्तृतीयस्समाप्तः ।

अथ प्रबन्धाध्यायश्चतुर्थः प्रारभ्यते ।

स्वररागादिकं सर्वं गीतोपकरणं ततः ।
निरूपितं प्रधानत्वादथगीतं निरूप्यते ॥ ३५३ ॥

वाग्गेयकारेण कृतं शास्त्रलक्षणसंयुतम् ।
बद्धं धातुभिरङ्गैश्च निबद्धमभिधीयते ॥ ३९४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आलप्तिर्बन्धहीनत्वा दनिबद्धमितीरितम् ।

(353—354) Music of two kinds: (1) Nibaddha or Prabandha (built up by Dhatus and Angas as laid dawn (2) Anibaddha (free expatiation) or Alapa

(சு. 353—355) பாட்டில் இருவகை:— (1) நிபத்தம் அல்லது பிரபந்தம் (தாதுக்கள், அங்கங்கள் என்ற பிரிவுகளால் தொகுக்கப்பட்டது) (2) அநிபத்தம் (இஷ்டப்படி சஞ்சாரம் செய்தல்) அல்லது ஆலாபனை.

प्रबन्धो रूपकं वस्तु तस्य संज्ञात्रयं भवेत् ॥ ३५५ ॥ अथवा ।

गीतं च रूपकं वस्तु प्रबन्धो गेयमित्यपि ।
गीते पञ्चाभिधाः प्रोक्ताः लक्ष्यदृष्ट्या विचक्षणैः ३५६ ॥

चतुर्भिर्धातुभिश्चाङ्गैः यस्मादेष प्रयुज्यते ।
तस्मात्प्रबन्धः कथितः गीतज्ञैस्तालकोविदैः ॥ ३५७ ॥

धातुः प्रबन्धावयवः सचोद्ग्राहादिभेदतः ।
चतुर्धा कथितो भागस्त्वाद्य उद्ग्राहसंज्ञकः ॥ ३५८ ॥

आदावुद्गृह्यतेगीतं येनोद्ग्राहस्तदाभवेत् ।
मेलापको द्वितीयस्तूद्ग्राहध्रुवकमेलनात् ॥ ३५९ ॥

ध्रुवत्वाद्ध्रुवसंज्ञस्तु तृतीयो भाग उच्यते ।
आभोगस्त्वन्तिमो भागो गीतपूर्णत्वसूचकः ॥ ३६० ॥

355—360 The 4 dhatus or parts of a Prabandha: — 'Udgraha' (the beginning) (2) 'Melapaka' (Joining the 1st and 3rd dhatus) (3) 'Dhruva' (the certain or indispensable part) and (4) Abhoga (end)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(சூ. 355—360) பிரபந்தத்தின் 4 தாதுக்கள் அல்லது பகுதிகள்:— (1) உத்க்ராஹம் (எடுப்பு) (2) மேளாபகம் (முதலாவது 3வது, பகுதிகளைச்சேர்ப்பது) (3) த்ருவம் (நிச்சயமான பகுதி) (4) ஆபோகம் (முடிவு).

ध्रुवाभोगान्तरे कैश्चित् धातुरुक्तोन्तराभिधः ।
सतु सालगसूडस्थरूपकादिषु दृश्यते ॥ ३६१ ॥

361— The 5th Dhatu called 'Antara' (in between) is found in certain prabandhas like Salagasudas between the 3 rd and 4th Dhatus.

(சூ. 361) 'அந்தரா' (இடையே) என்ற 5வது பகுதி 'சாலகசூடம்' முதலிய பிரபந்தங்களில் 3வது 4வது பகுதிகளுக்கிடையே வருகிறது.

चतुर्धातुस्त्रिधातुश्च द्विधातुरिति स त्रिधा ॥ ३६२ ॥

मेलापकाभोगयोस्तु क्वचित्क्वचिदभावतः ।

362— The 3 kinds of prabandhas with 4, 3 and 2 Dhatus respectively.

(சூ- 362) 3 வகை பிரபந்தங்கள்:— 4. 3. 2. தாதுக்கள் கொண்டவை.

तालस्वरौ तु तत्पादौ शब्दस्तेनेति तेनकः ।
प्रकाशको मङ्गलस्य पदमर्थप्रकाशकम् ॥ ३६३ ॥

पाटो वाद्योद्भवश्शब्दः बिरुदं तु गुणाभिधा ।
तालश्चचत्पुटादिः स्यात् स्वरास्सरिगमादिकाः ॥ ३६४ ॥

तत्तत्कार्यानुरूपेण तत्तत्स्थाने निवेशनम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

362—364 The six ' angas ' or constituent elements of a prabandha-— (1) Swara (notes), (2) Biruda (panegyric) (3) Pada (words) (4) Tenaka (Syllable ' Tena ') (5) Pata (sounds of instruments) (6) Tala (syllables for time-measure)

சு. (362—364) ப்ரபந்தத்தின் 6 அங்கங்கள்:— (1) ஸ்வரம், (2) பிருதம் (விருது) (3) பதம் (வார்த்தைகள்) (4) தேநகம் ('தேந' என்ற சொல்) (5) பாடம் (வாத்திய ஒலிகள்) (6) தாளம் (சொல்லுக்கட்டுகள்)

प्रवन्धजातय: पञ्च कथ्यन्ते ता: क्रमेणतु ॥ ३६५ ॥

षड्भिरङ्गैर्मेदिनी स्यात् नन्दिनी पञ्चभिर्भवेत् ।
चतुर्भिर्दीपिनी प्रोक्ता त्रिभिरङ्गैस्तु पावनी ॥ ३६६ ॥

द्वाभ्यां तारावली जातिरङ्गाभ्यामुपजायते ।

365—366— Names of the 5 kinds of prabandhas classified according to the number of angas they have, 6, 5, 4, 3, or 2, respectively,

சு. 365—366 2. 3. 4, 5, 6, அங்கங்கள் உள்ள ஐந்து வகை ப்ரபந்தங்களின் பெயர்கள்

छन्दस्तालादिनियमात् निर्युक्तस्यादतोन्यथा ॥ ३६७ ॥

अनिर्युक्त इति द्वेधा प्रवन्ध: परिकीर्तित: ।

367 - 2 kinds of prabandhas:— (1) with definite rules as to tala and meter (2) without such rules.

(சு. 367) இருவித பிரபந்தங்கள்:— குறிப்பிட்ட சந்தம், தாளம் உடையவை (2) சந்தம் தாளம் குறிப்பிடப் படாதவை.

तत्र गीतप्रयोगित्वात् गणवर्गादि कथ्यते ॥ ३६८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्रिगुरुर्मगणो भूमिर्देवता श्रीप्रदो नृणाम् ।
य आप्यो वृद्धिकृल्लाद्यो रो लमध्यो मृतिप्रदः ॥ ३६९ ॥

आग्नेयस्सोन्तगः स्थानभ्रंशकृद्वायुदैवतः ।
तोन्तलोम्बरदैवत्यो निर्धनत्वकरो नृणाम् ॥ ३७० ॥

मध्यगो जस्तु सूर्यो रुक्प्रदः सौम्यस्तु कीर्तिकृत् ।
गादिर्भस्त्रिलघुर्नस्यात् आयुष्कृद्दैववासवः ॥ ३७१ ॥

368—371)— Ganas or metrical formuals of three syllables.

Name	—Syllables —	Devata—	effect. —
(1) 'Ma'-gana	3 long	Earth	wealth.
(2) 'ya' gana	1st short.	water	Prosperity
(3) 'Ra' gana	middle short	fire	Death
(4) 'Sa' gana	last long	Air	unseating
(5) 'Ta' gana	last short	Earth	Poverty
(6) 'Ja' gana	middle long	Sun	Illness
(7) 'Bha' gana	first long	Moon	Fame
(8) 'Na' gana	3rd short	Indra.	long life

சு. (368—371) -- 'கணங்கள்' அல்லது சீர்களின் வகைகள் (மூன்று உயிரெழுத்துக்கள் உள்ளவை)

கணம்—	குறில் நெடில்—	தேவதை—	பலன்—
(1) 'ம' கணம்	3 நெடில்	பூமி.	தனம்.
(2) 'ய' ,,	முதல் குறில்	அப்பு	விருத்தி
(3) 'ர' ,,	நடுக்குறில்	அக்னி	சாவு
(4) 'ஸ' கணம்.	கடைநெடில்	வாயு	இடமாறல்
(5) 'த' ,,	கடைக்குறில்	ஆகாயம்	வறுமை
(6) 'ஜ' ,,	இடைநெடில்	சூரியன்	வியாதி
(7) 'ப' ,,	முதல் நெடில்	சந்திரன்	கீர்த்தி.
(8) 'ந' ,,	3 குறில்	இந்திரன்	ஆயுள்.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अकचटतपयशवर्गास्तेषामेतास्तु देवताः क्रमशः ।
सोमो भौमः सौम्यो जीवश्शुक्रश्शनीरवी राहुः ॥ ३७२ ॥

आयुः कीर्तिं कुरुते तत्राद्योऽन्यस्सदायशःकारी ।
संपद्माविष्कुरुते तृतीयक ष्टस्तु सौभाग्यम् ॥ ३७३ ॥

तः कीर्तिं, पो मांद्यं, मृत्युं यः शून्यतां शस्तु ।
स्तुत्यस्य श्लोकगीतादौ प्रयोगो गणवर्गयोः ॥ ३७४ ॥

374—The Devatas and effects of initial letters of musical compositions on the subjects:

Letter—		Devatas	Effects
A		Moon	Long life
Kavarga		Mars	Fame
Cha	,,	Mercury	wealth
Ta(ट)	,,	Jupiter	good luck
Ta(त)	,,	Venus	Fame
Pa	,,	Saturn	Dullness
Ya	,,	Sun	Death
Sa(श)	,,	Rahu	Emptiness

(சு—374) முதல் எழுத்துக்களின் தேவதைகளும் பலன்களும்

எழுத்து		தேவதை	பலன்
அ—		சந்திரன்	ஆயுள், கீர்த்தி
கவர்க்கம்—		செவ்வாய்	கீர்த்தி
ச்ச	,,	புதன்	சம்பத்து
ட	,,	குரு	அதிர்ஷ்டம்
த	,,	சுக்கிரன்	கீர்த்தி
ப	,,	சனி	மந்தம்
ய	,,	சூரியன்	சாவு
ச	,,	ராகு	சூன்யம்

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

फलान्येतानि जायन्ते तस्मादेतान्विचारयेत् ।
क्वचिदन्योऽपि कथितः विशेषस्सोऽभिधीयते ॥ ३७५ ॥

नकारो नाशयेल्लक्ष्मीं हकारस्तु हरेद्यशः ।
मकारस्सर्वहृत्तस्मात् गीतादौ तान्परित्यजेत् ॥ ३७६ ॥

376— Some special effects according to certain authorities :—

(1) Na	destroys wealth	
(2) Ha	,,	fame
(3) Ma	,,	every thing

These 3 letters must, therefore, be avoided in the beginning of compostions.

(சு. 736) வேறு சில பலன்கள்

(1) 'ந'	தன நாசம்
(2) 'ஹ'	கீர்த்தி நாசம்
(3) 'ம'	ஸர்வ நாசம்

ஆகையால் இந்த எழுத்துக்களை பாட்டுக்களின் முதல் எழுத்துக்களாக உபயோகிக்கக் கூடாது.

उद्ग्राहे तु दकारश्च भकारश्चान्तरे तथा ।
आभोगे तु वकारश्च त्रयं लक्ष्मीफलप्रदम् ॥ ३७७ ॥

(377) Beneficial initials :—

1 Da in udgraha
2 Bha in Antara
3 Va in Abhogdea

} give wealth

(சு. 377) லக்ஷ்மி விலாஸமுள்ள முதலெழுத்துக்கள்:—

1. த (द) உத்க்ராகத்தில்
2. ப (भ) அந்தராவில்
3. வ ஆபோகத்தில்

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्विजवर्णोऽकवर्गाभ्यां चटाभ्यां क्षत्रियो भवेत् ।
तपाभ्यां वैश्यवर्णश्च यशाभ्यां शूद्रसंज्ञकः ॥ ३७८ ॥

378 Letters and Castes :—

A and Ka—	Brahmin
Cha and Ta—	Kshatriya
Ta and Pa—	Vaisya
Ya and Sa—	Sudra

(சு. 378) எழுத்துக்களும் ஜாதிகளும் :—

அ, க—	பிராம்ஹண
ச்ச, ட—	க்ஷத்ரிய
த, ப—	வைசிய
ய, ச—	சூத்ர

एलाकरण ढेङ्कीमि वर्तन्या झोम्बडेनच ।
लम्भरासैकतालीभिः शुद्धसूडोष्टभिःस्मृतः ॥ ३७९ ॥

379. The descriphon of the well-known prabandhas or musical compositions:—(1) 'Sudha Sooda' and its Component elements: Ela, karana, Dhenki, vartani Jhombada, Lambha, Rasa & Ekatali.

சு. 379 ப்ரபந்தங்களின் விபரம்:— 1.' சுத்த சூடம் ', அதன் எட்டு அங்கங்களும் :—

ஏலா, கரணம், டேங்கி, வர்த்தனி, ஜோம்பட, லம்ப, ராஸ, ஏகதாளி

तत्रैलाप्रथमे पादे कार्यं खण्डद्वयं बुधैः ।
सानुप्रासं तदैकेन धातुना भिन्नमातृकम् ॥ ३८० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गमकाख्यः प्रयोगश्चेत् तदा रूढपदान्वितः । – [' रुद्रपदान्वितः '
इति पाठांतरम्]

प्रभुनाःमाङ्कितोमध्ये विलम्बितपदत्रयः ॥ ३८१ ॥.

ध्रुवो भवेत्तत्र पूर्वं एकधातु पदद्वयम् ।
तृतीयं भिन्नधातुस्यात् आभोगस्तदनन्तरम् ॥ ३८२ ॥

कार्यो वाग्गेयकारेण स्वाभिधानविभूषितः ।
पुनर्गानं विधायास्य न्यासस्तु ध्रुवके भवेत् ॥ ३८३ ॥

मण्ठद्वितीयकंकाळप्रतितालेषु कश्चन ।
तालोत्र विनियोक्तव्यः ग्रहस्तु विषमो भवेत् ॥ ३८४ ॥

प्रबन्धेस्मिन् प्रभोः कार्यं शौर्यधैर्यादिवर्णनम् ।
सामान्यप्रतिपत्यर्थं एलासामान्यलक्षणम् ॥ ३८९ ॥

कथितं ये विशेषास्तु ज्ञेयाग्रन्थान्तराद्बुधैः ।
षट्पञ्चाशद्युतं प्रोक्तं तत्रैलानां शतत्रयम् ॥ ३८६ ॥

तथाच रत्नाकरः

अङ्घ्रौखण्डद्वयं सानुप्रासमेकेन धातुना ।
ततः प्रयोगस्तदनु पल्लवाख्यं पदत्रयम् ॥ ३८७ ॥

द्वेस्तोविलम्बिते तत्र तृतीया द्रुतमानतः ।
एवं पादत्रय गेयं उद्ग्राहे तुल्यधातुकम् ॥ ३८८ ॥

केवलं तु तृतीयेङ्घ्रौ सम्बोधनपदान्वितः ।
प्रयोगोऽन्यो विधातव्यो नपल्लवपदस्थितिः ॥ ३८९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अमु प्रयोगं मेलापं प्राहुः सोमेश्वरादयः ।
स्तुत्यनामाङ्कितोमध्ये विलम्बितपदत्रयः ॥ ३९० ॥

ध्रुवोभवेत्तत्र पूर्वं एकधातुपदद्वयम् ।
तृतीयं भिन्नधातु स्यादाभोगस्तदनन्तरम् ॥ ३९१ ॥

गेयो वाग्गेयकारेण स्वाभिधानविभूषितः ।
पुनर्गीत्वा ध्रुवे न्यासो ग्रहस्तु त्रिषमोभवेत् ॥ ३९२ ॥

एलासामान्यलक्ष्मैतत्पूर्वाचार्यैरुदीरितम् ।
मण्ठद्वितीय कंकाल प्रतितालेषु कश्चन ॥ ३९३ ॥

तालोस्यांत्यागसौभाग्य शौर्यधैर्यादिवर्णनम् ।
॥ इत्येलालक्षणम् ॥

(380—393). Prabandha called 'Ela' described; the w ords' and 'music' of the 4 parts of 'Ela' detailad.

சு. (380—393), 'ஏலா' என்னும் ப்ரபந்தத்தின் 4 பகுதிகளுக்குமுள்ள அக்ஷரம், வர்ணமெட்டு இவைகளின் விவரம்.

सामान्यलक्षणं नास्ति करणानामतो मया ॥ ३९४ ॥

विशेषलक्षणं तेषां प्रत्येकमभिधीयते ।
उद्ग्राहंध्रुवकौयस्य स्वरबद्धौ पदैर्भवेत् ॥ ३९५ ॥

आभोगस्तत्र नामस्या द्वातृनेत्रोर्ग्रहःपुनः ।
इष्टस्वरे तु कर्तव्यो न्यासःस्यादंशके स्वरे ॥ ३९६ ॥

रासकस्तत्र तालःस्याल्लयश्चात्रद्रुतो भवेत् ।
स्वराद्यं करणं चैतत् कथितं पूर्वसूरिभिः ॥ ३९७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वरैश्चहस्तपाटैश्च स्यात्पाटकरणं परम् ।
क्रमव्यत्यासभेदात्तद्द्विविधं स्वरपाटयोः ॥ ३९८ ॥

स्वरैर्मुरजपाटैर्यत् तद्बन्धकरणं मतम् ।
स्वरैः पदैश्चयद्बद्धं करणं तत्पदादिमम् ॥ ३९९ ॥

यत्स्वरैर्विरुदैर्बद्धं करणं बिरुदादि तत् ।
स्वरैश्चतेनकैर्बद्धं करणं तेनकादि तत् ॥ ४०० ॥

स्वरैश्च करपाटैश्च निबद्धं मुरजाक्षरम् ।
पदैश्च चित्रकरणं तदुक्तं भरतादिभिः ॥ ४०१ ॥

स्यान्मिश्रकरणं बद्धं स्वरैःपाटैस्सतेनकैः ।
हस्तपाटादिमात्रेण पूर्वं स्याद् भेद ईदृशः ॥ ४०२ ॥

स्वरादिकरणस्यैव शिष्टमेषां तु लक्षणम् ।
नवानां मार्गभेदेन त्रैविध्यात्सप्तविंशतिः ॥४०३॥ इति करणम् ।

394—403. Prabandha called 'Karana' described.

௯. (394—403) 'கரணம்' என்னும் ப்ரபந்தத்தின் விவரம்.

यत्रोद्ग्राहस्य पूर्वार्धे गीयते द्विरनन्तरम् ।
उत्तरार्धं सकृत्पश्चात् प्रयोगात्माभवेत्तच ॥ ४०४ ॥

मेलापकस्तु गातव्यावतालौ तावुभावपि ।
अथवा ढेङ्किकाताले कङ्कालेवाविलम्बिते ॥ ४०५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तालेनान्येन गातव्यौ ध्रुवाभोगौ लयान्तरे ।
ध्रुवस्त्रिखण्डःखण्डेद्व गीयेते समधातुना ॥ ४०६ ॥

तृतीयमुच्चमीपन्द्विराभोगस्तु सकृत्ततः ।
पुनर्गीत्वा ध्रुवेन्यासो यस्यां सा ढेङ्किकामता ॥ ४०७ ॥

सामान्यलक्षणं चैतत् ढेङ्किकायाः प्रकीर्तितम् ।
ग्रन्थान्तरेविशेषेण त्रिंशद्ढेङ्क्यःप्रकीर्तिताः ॥४०८॥ इतिढेङ्की ।

(404—408) Prabandha Called 'Dhenki, described,

(404—408) 'டேங்கி' என்னும் பிரபந்தத்தின் விவரம்

यल्लक्षणं स्वराद्यस्य करणस्योदितंमया ।
वर्तन्यामपितत्सर्वं तालोन्योरासकाद्भवेत् ॥ ४०९ ॥

विलम्बितो लयश्चात्र द्विरुद्ग्राहस्तुगीयते ।
ध्रुवाभोगौसकृद्गायेत् मोक्षस्तु ध्रुवके भवेत् ॥ ४१० ॥

कङ्कालताले प्रतितालकेवा कुडुक्ककेवा प्रतिमण्ठकेवा ।
विनिर्मिताचेदिहवर्तनीयं निवर्तनीतिप्रथिता तदानीम् ॥ ४११ ॥

(409—411) The Prabandha called 'Vartani' discribed.

(சு. 409—411) 'வர்த்தனீ' என்னும் பிரபந்தத்தின் விவரம்.

यस्मिन्नुद्ग्राहपूर्वार्धे गीयते द्विस्सकृत्ततः ।
उत्तरार्धे प्रयोगाढयो भवेन्मेलापकोनवा[1] ॥ ४१२ ॥

---

(1) मेलापकस्तदा इति पाठान्तरम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्विर्गीत्वा ध्रुवमाभोग सकृन्न्यासो ध्रुवे भवेत् ।
यत्रासौ झोंबडोनाम ताले निस्सारुके भवेत् ॥ ४१३ ॥

कुडुक्के त्रिपुटेवापि प्रतिमण्ठे द्वितीयके ।
यतितालङ्डुताल्यैक तल्या गारुगिरासयोः ॥ ४१४ ॥

सङ्ख्याता झोंबडाभेदै विंग्रच्चन्द्रशराभयः ।

(३९१०) इति झोंबडा

(414) The Prabandha called 'Jhombada' described

(சு—414) 'ஜோம்படம்' என்னும் பிரபந்தம் விவரிக்கப்பட்டது.

एकखण्डो द्विखण्डो वा यस्योद्ग्राहो भवेदिह ।
गीयतेऽसौ सकृद्द्विर्वा ध्रुवोयत्रभवेत्पुनः॥
द्विराभोगो भवेन्मुक्तिः [1]प्रबंधस्सतु लंभकः ॥ ४१५ ॥

(415) Prabandha called 'Lamabhaka'

(சு—415) 'லம்பகம்' என்னும் பிரபந்தம்

यो झोंबडगतं लक्ष्म गमकस्थानकैर्विना ।
भजते रासकस्सोऽयं रासतालेन गीयते ।

मातृकास्ते त्रिपञ्चाशत् वर्णजाः पञ्चविंशतिः ॥ ४१६ ॥

इति रासः ॥

(416) 'Prabandha' called 'Rasaka'

---

1 'ध्रुवेमुक्तिः' इति वा पाठः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(க. 416) 'ராஸகம்' என்னும் பிரபந்தம்.

द्विरुद्गाहो ध्रुवोऽपिद्विः आभोगध्रुवकौ ततः ।
गीत्वा न्यासो यत्र सा स्यात् एकताल्यैकतालिका ॥ ४१७ ॥

इति शुद्धसूडलक्षणम्

(417) Prabandha 'called 'Ekatalee'. Here end the 8 kinds of Prabandhas included in 'Suddhasuda' variety.

(க. 417) 'ஏகதாளீ' என்னும் பிரபந்தம். இதுவரை 'சுத்த ஸூடம்' என்னும் வகையில் அடங்கிய 8 பிரபந்தங்களின் விவரம் முற்றுப்பெற்றது.

वर्णो वर्णस्वरो गद्यं कैवाड ध्याङ्कचारिणी ।
कन्दस्तुरङ्गलीलाच गजलीला द्विपद्यपि ॥ ४१८ ॥

चक्रवालः क्रौञ्चपदः स्वरार्थो ध्वनि कुट्टनी ।
आर्या गाथा द्विपथगः कलहंसोऽथतोटकः ॥ ४१९ ॥

घटोवृत्तं मातृकाच तथा रागकदंबकः ।
पञ्चतालेश्वर स्तालार्णव इत्यालिसंज्ञिकाः ॥ ४२० ॥

श्रीरङ्गः श्रीविलासस्तु पञ्चभङ्गिरतः परम् ।
पञ्चाननोमातिलकौ द्विपदीचचतुष्पदी ॥ ४२१ ॥

षट्पदी वस्तुसंज्ञश्च विजयस्त्रिपथस्तथा ।
चतुर्मुखस्सिंहलीलो हंसलीलोऽथदण्डकः ॥ ४२२ ॥

झोंबडः कन्दुकः स्यात्त्रिभङ्गी हरिविलासकः ।
सुदर्शनः स्वराङ्कः श्रीवर्धनो रा[1]गवर्धनः ॥ ४२३ ॥

---

1. 'हर्षवर्धनः' इतिवा पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वदनं चच्चरी चर्या पद्धडी राहडी तथा ।
वीरश्रीमङ्गलाचारौ धवलो मङ्गलस्तथा ॥ ४२४ ॥

ओवी लोली ढोल्लरीच दन्तीषट्त्रिंशदित्यमी ।
प्रबंधा विप्रकीर्णाख्याः सालगास्तु ध्रुवादयः ॥ ४२५ ॥

(418-425) The variety of Prabandhas known as 'Aali', 24 number; 'Viprakeerna' or miscellaneous varaieties of Prabandhas, 36 in number.

(சு. 418-425) 'ஆளி' என்ற வகையைச்சேர்ந்த 24 பிரபந்தங்கள்; 'விப்ரகீர்ணம்' அல்லது பலவகை பிரபந்தங்கள் 36

आद्यो ध्रुव स्ततो मण्ठः प्रतिमण्ठो निसारुकः ।
अड्डताल स्ततो रासः एकतालीति सप्त ते ॥ ४२६ ॥

शार्ङ्गदेवेन कथिताः मिलिताः पञ्चसप्ततिः ।

(425-426) 'Salaga suda', its seven constituent elements in the seven talas:— Dhruva, Mantha, Pratimantha, Nisaruka, Adda, Rasa and Ekatali. Here end the 75 Prabandhas according to Sarngadeva in Sangeeta-ratnakara.

(சு. 425-426) 'ஸாலக ஸூடம்' என்னும் பிரபந்தத்தில் அடங்கிய ஏழு வகையும், அவற்றின் தாளங்களும் :—

த்ருவம், மண்டம், ப்ரதி மண்டம், நிஸாருகம், அட்ட, ராஸ, ஏகதாளீ; இதனுடன் ஸங்கீத ரத்னாகரத்தில் சார்ங்க தேவரால் விவரிக்கப்பட்ட 75 பிரபந்தங்கள் முற்றுப்பெற்றன,

केचिदेषु प्रसिद्धाये तल्लक्षण मिहोच्यते ॥ ४२७ ॥

कर्णाट भाषयाबद्धो बिरुदै र्वर्णतालतः ।
वर्णसंज्ञः प्रबंधोऽयं त्रिविधस्तालभेदतः ॥ ४२८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति वर्णः

(427-428) Prabandhas in practice at the present day ((i-e) of the author):— (1) Varna.

(சு. 427-428) பிற்காலத்தில் பிரசித்தமான பிரபந்தங்கள்:-
(1) வர்ணம்.

स्वरैः पाटैः पदै स्तेनै रचिता वाञ्छितः क्रमात् ।
न्यासस्तु तेनकैरेव स वर्णस्वर उच्यते ॥ ४२९ ॥

इति वर्णस्वरः

(429) (2) 'Varnasvara.'

(சு. 429) (2) வர்ணஸ்வரம்,

गद्यं निगद्यते छन्दोहीनं पदकदंबकम् ।
तस्य भेदास्तु बहवो ज्ञेया ग्रंथान्तराद्बुधैः ॥ ४३० ॥

इति गद्यम्

(430) (3) 'Gadya' (Prose).

(சு. 430) (3) 'கத்யம்' (உரை நடை).

उद्ग्राहध्रुवकौ यस्य पाटैरेव विनिर्मितौ ।
सार्थकै रर्थहीनैर्वा न्यसनन्तु ध्रुवे भवेत् ॥ ४३१ ॥

स कैवाडः शुद्धमिश्रपाटभेदाद्विधा मतः ।

इति कैवाडः

(431) (4) 'Kaivada.'

(சு. 431) (4) 'கைவாடம்.'

पूर्वपूर्वाक्षरत्रा[1]तो योऽन्त्योवर्णचय स्सचेत् ।

---

1. 'क्रान्तौ' इतिवा पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उत्तरोत्तरवाक्यादौ चक्रवालस्तदा भवेत् ॥ ४३२ ॥
गद्यपद्यप्रभेदेन द्विविधः परिकीर्तितः ।

इति चक्रवालः

(432) (5) 'Chakravala'
(432) (5) 'சக்ரவாளம்.'

पदैः स्वरैः क्रौञ्चपदः प्रतितालेन गीयते ॥ ४३३ ॥

स्वरे न्यासः स तन्नाम्ना छन्दसा मुक्तकोऽथवा ॥ ४३४ ॥

इति क्रौञ्चपदः

(434) (6) 'Kraunchapada'.
(சு. 434) (6) 'க்ரௌஞ்ச பதம்.

यत्र स्वराक्षरैरेव वाञ्छितार्थोऽभिधीयते ।
स स्वरार्थो द्विधा शुद्धो मिश्रस्तैः शुद्धमिश्रितैः ॥ ४३५ ॥

न्यासो ग्रहस्वरेचास्य सप्तम्येकादिकैः स्वरैः ।
क्रमात् क्रमाभ्यां बहुशः भिद्यन्ते द्विस्वरादयः ॥ ४३६ ॥

इति स्वरार्थः

435—436 (7) 'Svarartha'.
(சு. 435—436) (7) 'ஸ்வரார்த்தம்.'

एकैकमातृकावर्णपूर्वकाणि पदानिचेत् ।
क्रमेण परिगीयन्ते तदासौ मातृका मता ॥ ४३७ ॥

मातृकावर्णपूर्वाणि केचिद्वाक्यानि मन्वते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यातु संस्कृतया वाचा मार्गतालैश्च गीयते ॥ ४३८ ॥

सा दिव्या प्राकृता गीता देशीतालैश्च मानुषी ।
उभयो र्मिश्रणादुक्ता मातृका दिव्यमानुषी ॥ ४३९ ॥

अनिबद्धा गद्यजा सा निबद्धा पद्यजा मता ।
सर्वमन्त्रमयी ह्येषा सर्वसिद्धिप्रदायिनी ॥ ४४० ॥

इति मातृका ।

(437-440) (8) 'Matrika'
(क्र. 437-440) (8) 'மாத்ருகா'

तालै रनेकै र्विविधैश्चरागैः वृत्तैस्तथाङ्गैरपि धातुभिश्च ।
शृङ्गारवीरादिरसैरुपेतो निबध्यते रागकदंब एषः ॥ ४४१ ॥

चतुर्वृत्तश्चतुस्तालो रागराजीविराजितः ।
तालमानद्वयेन स्यान्नन्द्यावर्तस्सदा भवेत ॥ ४४२ ॥

तालेनैकेन गद्येन केचिदेनञ्जगुर्बुधाः ।
एतस्माद्रागतालाद्यैः द्विगुणः स्वस्तिको भवेत् ॥ ४४३ ॥

अब्जपत्रोऽब्जगर्भश्च भ्रमराम्रडितौ तथा ।
नन्द्यावर्तान्तगान् भेदान् चतुरः केचिदूचिरे ॥ ४४४ ॥

द्विगुणद्विगुणो ज्ञेयः पूर्वस्मादुत्तरोत्तरः ।
स्वस्तिकाद्द्विगुणं केचिदब्जपत्रं प्रचक्षते ॥ ४४५ ॥

द्विगुणश्च ततोऽन्यस्य नतलक्ष्येष्वदर्शनात् । इति नन्द्यावर्तः ।

इति राग कदंबः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(441-445) (9) 'Raga kadambaka' and its varieties.
(கு. 441-445) (9) 'ராக கதம்பகம்', அதன் வகைகள்.

कर्तव्यः पूर्वमालापः सच तालविवर्जितः ।
प्रासश्चरूपकालापे तस्यातः प्रतिषेधभाक् ॥ ४४६ ॥

चच्चत्पुटेन तालेन[1] प्रत्येकं पदपञ्चकम् ।
पूर्ववच्च स्वराः पाटाः तद्विमानेनचान्तरः ॥ ४४७ ॥

द्वि[2]चच्चत्पुटमानेन पाटैः पटहसंभवैः ।
तत श्चाचपुटेनापि गातव्यं पदपञ्चकम् ॥ ४४८ ॥

हौडुक्कपाटैस्तदनु षट्पितापुत्रकेणच ।
पृथक् पदानि पञ्च द्विस्तेनैव स्वरपाटकाः ॥ ४४९ ॥

तद्विमानः पृथक्पाटैः अन्तरः स्यात्ततस्तुषट् ।
प्रत्येकं द्विपदानिस्युः संपक्केष्टाकतालकः ॥ ४५० ॥

तत्तालाः स्युः स्वराः पाटाः तद्विमानेनचान्तरः ।
कांस्यतालोद्भवैः पाटैः अथोद्घट्टपदानिषट् ॥ ४५१ ॥

प्राग्वत्तथा स्वराः पाटाः पाटैर्मुरजसंभवैः ।
अन्तरः पूर्ववच्चास्या भोगश्चस्याद्विलंबितः ॥ ४५२ ॥

प्रबंध नाम्ना प्राग्मानं नेतृनाम्नाथतेनकः ।

---

1. 'द्विर्गेयम्' इतिपाठांतरम् ।
2 अयं श्लोक 11499, 11500 अङ्कितमातृकयोर्न्दृश्यते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गातव्योऽथ प्रबंधस्य नामचालपके भवेत् ॥ ४९३ ॥

पञ्चतालेश्वरोनाम सर्वसिद्धिप्रदायकः ।
वीरावतारः शृङ्गारतिलकश्चेति सद्विधा ॥ ४५४ ॥

वीरशृङ्गारयोस्तेन प्रीयन्ते सर्वदेवताः ।

इति पञ्चतालेश्वरः

(446-454) (10) 'Panchatalesvara'
(க. 446-454) (10) 'பஞ்சதாலேச்வரம்'

निबद्धो बहुभिस्तालैः, द्विविधो गद्यपद्यजः ।
तालार्णवो भवेदेषः प्रबंधोऽन्वर्थनामकः ॥ ४५९ ॥

इति तालार्णवः

(455) (11) 'Talarnava'
(க. 455) (11) 'தாளார்ணவம்'

तालैश्चतुर्भी रागैश्च षडङ्गोन्ते पदान्वितः ।
श्रीरङ्गः श्रीविलासस्तु तालै रागैश्च पञ्चभिः ॥ ४५६ ॥
षडङ्गोऽयं स्वरान्तः स्यात् प्रबंधः श्रीफलप्रदः ।

इति श्रीरंगः । श्रीविलासः ।

(456) (12) 'Sreeranga' and (13) 'Sreevilasa'
(க—456) (12) 'ஸ்ரீரங்கப்ரபந்தம்' (13) 'ஸ்ரீவிலாசம்'

तेनकान्तः पञ्चभङ्गिः तालै रागैश्च पञ्चभिः ॥ ४९७ ॥

इति पञ्चभङ्गिः ।

(457) (14) Panchabhangi.
(க. 457) (14) பஞ்சபங்கி

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रागाभ्यामपि तालाभ्यां पाटैः पञ्चाननोऽन्तगैः । पञ्चाननः ।

(458) (15) 'Panchanana'
(क। 458) (15) 'பஞ்சானனம்'

तालैरागै स्त्रिभिः प्रोक्तः उमातिलकसंज्ञकः ।
विरुदान्ता स्त्रयोप्येते षडङ्गाःपरिकीर्तिताः ॥ ४५८ ॥

इति उमातिलकः

(458) (16) 'Umatilaka' (क. 458) 'உமாதிலகம்'

यस्मिन्विजयतालेन विजयो गीयते प्रभोः ।
तेनकैश्च स्वरैः पाटैः पदैर्न्यासश्चतेनकैः ।
विजयाख्याः प्रबंधोऽयं विजयश्रीप्रदोनृणाम् ॥ ४५९ ॥

इति विजयः

(459) (17) 'Vijaya' (क. 459) (17) 'விஜயம்'

स्वरैः पाटैः पदै स्तेनैः वर्णैः स्थाय्यादिभिः क्रमात् ।
चत्वार श्चरणा गेयाः ध्रुवेन्यास श्चतुर्मुखे ॥ ४६० ॥

इति चतुर्मुखः ।

(460) (18) 'Chaturmukha'
(क. 460) (18) 'சதுர்முகம்'

स्वरैः पाटैश्च विरुदैः तेनकैर्योविरच्यते ।
सिंहलीलेन तालेन सिंहलील स्सउच्यते ॥ ४६१ ॥

इति सिंहलीलः ।

हंसलीलो हंसलीले तालेङ्घ्रीपदपाटजो ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पदैः पाटैश्च विरुदैः कन्दुकः परिगीयते ॥ ४६२ ॥

इति कंन्दुकः

462, (20) — Hamsalila

(21) — Kanduka.

(சு—462) (20) ஹம்ஸலீலம்

(21) கந்துகம்.

स्वरैः पाटैः पदैः प्रोक्तस्त्रिभङ्गिश्च सपञ्चघा ।
एकस्त्रिभङ्गितालेनवृत्तनान्यस्त्रिभङ्गिना ॥ ४६३ ॥

तालै रागैस्त्रिभिर्यद्वाथवावृत्तत्रयान्विता ।
ब्रह्मविष्णुशिवस्तुत्या तालैर्द्वैगुण्यमुक्तिकः ॥ ४६४ ॥

इति त्रिभङ्गिः ।

463—464. (22) — Tribhangi and its five kinds.
(சு—463—464) (22) — த்ரிபங்கி, அதன் 5 வகைகள்.

पदैस्सविरुदै स्तेनैर्निर्दिशन्तु सुदर्शनम् । इति सुदर्शनः ।
पदैस्सविरुदैः पाटैस्तेनैर्हरविलासकः ॥ ४६५ ॥ इति

हरविलासः ।

465. (23) Sudarsana.

(24) Harivilasa.

(சு—465) (23) சுதர்சனம்.

(24) ஹரவிலாஸம்,

पदैःस्वरैश्चविरुदैः उद्ग्राहादित्रयः क्रमात् ।
एकद्वितालाश्चतालाःस्युः स्वराङ्केन्यसनं स्वरैः ॥ ४६६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति स्वराङ्कः ।

466— (25) Swaranka.
(க—466) (25) ஸ்வராங்கம்.

त्रिरुदैर्गीयते यस्तु पाटैरपि पदैःस्वरैः ।
तालमानद्वयन्यासः भवेत् श्रीवर्धनाभिधः ॥ ४६७ ॥

इति श्रीवर्धनः ।

467— (26) Srivardhana.
(க—467) (26) ஸ்ரீவர்த்தனம்.

पदैश्च त्रिरुदैर्हर्षवर्धनः स्वरपाटकैः । हर्षवर्धनः ।
पदैश्च विरुदैर्बद्धोवीरश्रीरिति गीयते । वीरश्रीः ॥ ४६८ ॥

(468) (27) Harshavardhana. (28) Veerasri.
(க—468) (27) ஹர்ஷவர்த்தனம். (28) வீரஸ்ரீ

[1]दोहदः स्यात्पदान्तेषु प्रोल्लसद्धोल्लरीपदः ।
सा घोल्लरीति कथिता लाट भाषा विनिर्मिता ॥ ४६९ ॥

इति घोल्लरी । 'ढोल्लरी' इतिवा नाम

(469) 29— Dhollari.
(க—469) 29— தோல்லரி. (டோல்லரி)

अनुक्ताभोगवस्तूनां पदै राभोगकल्पना ।
एकधातुद्विखण्डस्स्यात् यत्रोद्ग्राहस्ततः परम् ॥ ४७० ॥

---

1. डौहडः— इतिवा पाठः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किञ्चिदुच्चं भवेत्खण्डं द्विरभ्यस्तमिदं त्रयम् ।
ततोद्विखण्ड आभोगः ततः स्यात् खण्डमुत्तमम् ' ॥ ४७१ ॥

एकधातुद्विखण्डश्च खण्डमुच्चतरं भवेत् ।
स्तुत्यनामाङ्कितश्चासौ क्वचिदुच्चैकखण्डकः ॥ ४७२ ॥

उद्ग्राह स्स्यादखण्डेच न्यास स्सध्रुवको भवेत् ।
जयन्तादि प्रभेदेन ध्रुवाष्षोडश कीर्तिताः ॥ ४७३ ॥

(470—473) 30— The seven kinds of 'Salagasuda':—
(1) Dhruva.

(கு—470—473) 30— 'ஸாலகஸூடம்' என்ற ஏழுவகை பிரபந்தங்களின் விவரம்:— (1) த்ருவம்.

जयन्त श्शेखरोत्साहौ ततो मधुर निर्मलौ ।
कुन्तलः कमल श्चारो नन्दन श्चन्द्रशेखरः ॥ ४७४ ॥

कामोदो विजयाख्यश्च कन्दर्पजयमङ्गलौ ।
तिलको ललितश्चेति संज्ञास्तेषां क्रमादिमाः ॥ ४७५ ॥

आदितालेन शृङ्गारे खण्ड एकादशाक्षरः ।
गीयते चेज्जयन्तस्स्यात् आयुःश्रीबलवर्धनः ॥ ४७६ ॥

वीरे निस्सारुताले च गीयते द्वादशाक्षरः ।
खण्ड श्शेखर संज्ञस्स्यात् ऋद्धिसौभाग्यदो नृणाम् ॥ ४७७ ॥

त्रयोदशाक्षरो हास्ये उत्साहः प्रतिमण्ठतः ।
मन्वक्षरस्तु करुणे मधुरो हंयलीलया ॥ ४७८ ॥

---

1. आदिमम्— इतिवा पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्रीडातालेन शृङ्गारे निर्मल स्तीर्थवर्णकः ।
लघुशेखर तालेन कलार्णः कुन्तलोऽद्भुते ॥ ४७९ ॥

विप्रलंभेतु कमलो झंपातालेन गीयते ।
तस्य खण्डस्तु कर्तव्यो बुधै स्ससप्तदशाक्षरः ॥ ४८० ॥

अष्टादशाक्षर श्चारो वीरे निस्सारुतालतः ।
वीरशृङ्गारयो रेकताल्या प्रोक्तस्तुनन्दनः ॥ ४८१ ॥

एकोनविंशद्वर्णस्तु सर्वसिद्धिप्रदायकः ।
वीरे हास्येच शृङ्गारे गीयते चन्द्रशेखरः ॥ ४८२ ॥

प्रतिमण्ठेन तालेन विंशत्यक्षरखण्डकः ।
एकविंशत्यक्षरस्तु प्रतिमण्ठेन गीयते ॥ ४८३ ॥

शृङ्गारेऽभीष्टफलदः कामदाख्यो ध्रुवो भवेत् ।
द्वाविंशत्यक्षरो हास्ये विजयः स्याद्द्वितीयतः ॥ ४८४ ॥

हास्यशृङ्गारकरुणे ष्वादितालेन गीयते ।
त्रयोविंशतिवर्णस्तु कन्दर्पो भोगदोध्रुवः ॥ ४८५ ॥

चतुर्विंशतिवर्णस्तु क्रीडातालेन गीयते ।
वीरशृङ्गारयोरेव जयमङ्गलसंज्ञकः ॥ ४८६ ॥

पञ्चविंशतिवर्णस्तु ध्रुवकस्तिलकाभिधः ।
वीरे रसेच शृङ्गारे एकताल्या प्रगीयते ॥ ४८७ ॥

षड्विंशत्यक्षरो गेयो गायकै स्सर्वसिद्धये । इति षोडश ध्रुवाः ॥

(473-489) The 16 kinds of Dhruva Salagasudas described.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(சு—473—489) த்ருவஸாலகஸூடத்தின் 16 வகையின் லக்ஷணங்கள்.

स्याद्वर्ण नियमोऽखण्डे खण्डे खण्डद्वये [1] तथा ॥ ४८९ ॥

द्विविरामं भवेद्यस्य खण्डमुद्ग्राह संज्ञकम् ।
ध्रुवखण्डं ततोद्विः स्यात् विकल्पेनान्तरः स्मृतः ॥ ४९० ॥

तंगीत्वा ध्रुवमागत्य चाभोगे गीयते सकृत् ।
न्यासस्तु ध्रुवके यस्य स मण्ठो मण्ठतालतः ॥ ४९१ ॥

षट्प्रकारो भवेदेष तालभेदेन मण्ठकः ।
वीरो जयप्रदो गेयो मण्ठेन जगणात्मना ॥ ४९२ ॥

मङ्गलो भेन शृङ्गारे सुन्दरस्सेन तद्रसः ।
वल्लभोरेण करुणे कलापो नगणेन तु ॥ ४९३ ॥

वि [2] रामान्तेन हास्येस्यात् अद्भुते कमलो मतः ।
विरामान्त द्रुतद्वंद्वात् लघुनैकेन मण्ठकः ॥४९४॥ इति मण्ठः ।

(489—494) 2— The 6 kinds of ' Manthasalagasuda '

(சு—489—494) 2— மண்டஸாலகஸூடத்தின் 6 வகைகளின் லக்ஷணங்கள்.

प्रतिमण्ठादिवस्तूनां लक्षणं मंठवन्मतम् ।
उद्ग्राहादिगतं सर्वं भेदस्तालकृतो भवेत् ॥ ४३९ ॥

अमदोगुरुणैकेन शृङ्गारे प्रतिमण्ठकः ।

---

1. अथवा— इतिवा पाठः ।
2. वीरामानेन— इतिवा पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विरामान्तद्रुतद्वंद्वात् लघु द्वंद्वेन गीयते ॥ ४९६ ॥

ताराख्य प्रतिमंठोऽसौ रसयोर्वीररौद्रयोः ।
करुणेस्या द्विचाराख्यो विरामान्ताल्लघुत्रयात् ॥ ४९७ ॥

कुन्दोविराममध्येन लत्रयेणाद्भुते ततः । इति प्रतिमण्ठः ।

(435—498) 3. The 4 kinds of ' Pratimantha Salaga-sudas described.

(சு—495—498) 3 ப்ரதிமண்டஸாலக ஸூடங்களின் 4 வகைகளின் லக்ஷணங்கள்.

वैकुन्दादिप्रभेदेन निस्सारुण्षड्विधो भवेम् ॥ ४९८ ॥

गाभ्यां लाभ्याश्च वैकुन्द निस्सारुर्मङ्गले भवेत् ।
विरामान्तद्रुतद्वंद्वात् भवेदानन्दसंज्ञकः ॥ ४९९ ॥

कान्तारों लगुरुभ्यां स्यात् समरस्तु लघुद्वयात् ।
सविरामा द्वांछितस्तु लत्रयाद्द्रुतयुग्मतः ॥ ५०० ॥
लेन द्रुताभ्यांलघुना विशालाख्यो भवेदिह ।

(498—501) 4. The 6 kinds of ' Nissarukatala Salaga-sudas ' described.

(சு—498—501) 4. நிஸ்ஸாருக் தாள ஸாலகஸூடங்கள் 6 வகையின் லக்ஷணங்கள்.

अड्डुतालेन तालेनाड्डु ताल ष्षड्विधो भवेत् ॥ ५०१ ॥

तालस्वरूप भेदेन निश्शङ्क श्शङ्क भेदतः ।
लगुरुभ्यां द्रुतद्वंद्वात् निश्शङ्को विस्मये भवेत् ॥ ५०२ ॥

लघुद्रुतद्वयेन स्यात् शङ्कः श्रृङ्गारवीरयोः ।
शान्ते शीलो विरामान्ताव द्रुतद्वंद्वाल्लघोर्भवेत् ॥ ५०३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्रुतद्वंद्वात् लगाभ्यांस्यात् चारो वीरेऽद्भुते रसे ।
शृङ्गारे मकरन्द स्स्यात् द्रुतद्वंद्वात्परे गुरौ ॥ ५०४ ॥

विजयाख्यो रसेवीरे द्रुताभ्यां लघुना भवेत् ।

इति षड्विधोऽड्डुताल: ।

(501—504) (5) The 6 kinds of 'Addatala Salaga sudas' described.

(சு—501—504) (5) அட்டதாள ஸாலக ஸூடங்கள் 6 வகையின் லக்ஷணங்கள்,

रासको रासतालेन स्यादालापादि भेदतः ।
चतुर्विधो भवेदेष न लक्ष्येद्दश्यते तथा ॥ ५०५ ॥

आलापान्तध्रुवपदाद् विनोदः कौतुके भवेत् ।
ध्रुवादालापमध्यात्तु वरदो देवतास्तुतौ ॥ ५९६ ॥

खण्ड माद्य द्विखण्डस्योद्ग्राहस्यालाप निर्मितः ।
यस्यासौ रासको नन्दो गीयतेऽभ्युदयेच सः ॥ ५०७ ॥

आलापादेर्ध्रुवपदात् कंबुजः करुणे भवेत् ।
सर्वेषु रासकेष्वेषु द्विखण्डोद्ग्राहकल्पना ॥ ५०८ ॥

इति रासलक्षणम्

(505—508) (6) The 4 kinds of 'Rasatala Salaga suda' described.

(சு—505—508) (6) ராஸதாள ஸாலகஸூடங்கள் 4 வகையின் லக்ஷணங்கள்,

एकताली भवेत्तालेनैक ताल्या त्रिधाचसा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भिद्यते गानभेदेन लयभेदेन चस्फुटम् ॥ ५०९ ॥

रामाच चन्द्रिका तद्वद्विपुले त्यथलक्षणम् ।
सकृद्विरति रुद्ग्राहोऽन्तरस्त्वक्षर निर्मितः ॥ ५१० ॥

यस्यामसौ भवेद्रामा गातृश्रोतृश्रियेचसा ।
उद्ग्रा होद्विदलो यस्यां आलापरचितोऽन्तरः ॥ ५११ ॥

घनद्रुता घनयतिः घनानुप्रासयोगिनी ।
चन्द्रिका सैकतालीस्यात् भूगिसौभाग्यदायिनी ॥ ५१२ ॥

आलापपूर्वोद्ग्राहादि विपुलानन्ददायिनी ।
आलापो गमकालप्तिः अक्षरैर्वर्जिता मता ॥ ५१३ ॥

सैव प्रयोगशब्देन शार्ङ्गदेवेन कीर्तिता ।

509—514 (7) The 3 kinds of 'Ekatali salagasuda' described.

(சு—509—514) (7) ஏகதாளி ஸாலகஸூடங்கள் 3 வகையின் லக்ஷணங்கள்.

प्रसिद्धाः केचिदन्येऽपि वक्ष्यन्ते सांप्रतं मया ॥ ५१४ ॥

सकृद्वागेयकारेण वीरश्रृङ्गारसंज्ञकः ।
सप्तभिः सप्तमिस्तालैः गीतैश्चापि यदृच्छया ॥ ५१५ ॥

आद्यखण्डं परित्यज्य गीयन्तेऽन्येषु मण्ठकाः ।
प्रयोगै र्विविधैर्युक्तैः शेषस्स्याद्वीरकामयोः ॥ ५१६ ॥

स्वामिनश्चकवेर्नाम्नाऽलङ्कृतोऽयं सदामतः ॥

इति वीरश्रृङ्गारः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(514—516) Other Prabandhas in vogue. (1) 'Veera sringara.'

(ச—514—516) பிரசித்தமான மற்ற பிரபந்தங்கள் (1) வீரச்ருங்காரம்.

चतुरङ्गः चतु.खण्डः षडङ्गैरागसंयुतः ॥
मध्ये मध्ये भवन्त्यत्र रागवर्जान्य मून्यथ ॥ ५१७ ॥

चतुरङ्गः ॥

(517) 2. Chaturanga. (ச 517) 2. சதுரங்கம்,

अस्यैव द्विगुणःख्यातो नाम्ना शरभलीलकः ।
छन्दसातेन कथितो मुक्तकोवा भवेदसौ ॥ ५१८ ॥

शरभलीला ॥

(518) (3) Sarabhaleea. (ச—518) (3) சரபலீலா.

खण्डैर्भानुमितैस्सूर्यप्रकाशस्तु निगद्यते ।
स्वरैः पाटै स्तथा तेनैः बिरुदैः पदसंयुतैः ॥ ५१९ ॥

पुराणोक्त प्रकारेण धात्रातु रविवर्णनात् ।
रागैर्द्वादशभिस्तालैः तावद्भिर्गीयतेह्यसौ ॥ ५२० ॥

सूर्यप्रकाशः ॥

(519—520) 4— Suryaprakasa. (ச—519—520) 4— ஸூர்யப்ரகாசம்.

खण्डैष्षोडशभिश्चन्द्रप्रकाशस्तु निगद्यते ।
प्रतिखण्डं कलैकैका वर्णनीया मनीषिभिः ॥ ५२१ ॥

स्वरैः पाटैस्तथा तेनैः बिरुदैः पदसंयुतैः ।
रागैष्षोडशभिस्तालैः तावद्भिः परिगीयते ॥ ५२२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

खण्डेऽन्तिमे भवेन्नाम स्वामिनश्च कवेरपि । इति चन्द्रप्रकाशः ।

(521—522) 5— Chandraprakasa.
(ச-521—522) சந்திரப்பிரகாசம்.

निर्मितः पाटविरुदैः रङ्गतालेन संगतः ।
समादि तालभेदेन रणरङ्गस्त्विधामतः ॥ ५२३ ॥ इति रणरङ्गः ।

(523) 6. Ranaranga. (ச-523) 6. ரணரங்கம்

विरुदैस्तेनकैर्युक्तः प्रयोक्तृजनसम्मतः ।
नन्दनाख्येन तालेन नन्दनः परिकीर्तितः ॥ ५२४ ॥

इति नन्दनः ॥

(527) 7. Nandana. (ச-524) 7. நந்தனம்.

नवरत्नप्रबंधोऽपि नवानामिह वर्णनात् ।
रत्नानां नवभिः खण्डैः तावद्भिस्तालरागकैः ॥
षडङ्गोऽयं प्रबंधस्स्यात् गातृनेत्रभिधान्वितः ॥ ५२५ ॥

इति नवरत्नप्रबंधः ॥

(525) 8. Navaratna Prabandha. (ச-525) 8. நவரத்னப்ரபந்தம்.

व्यक्तादयोदश गुणाः गीतेऽस्मिन्परिकीर्तिताः ।
तत्रव्यक्तं स्फुटतराक्षररागपदैः स्वरैः ॥ ५२६ ॥

पूर्णं पूर्णाङ्गमकं प्रसन्नं प्रकटार्थकम् ।
सुकुमारं कण्ठभवं त्रिस्थानोत्थमलंकृतम् ॥ ५२७ ॥

समवर्णलयस्थानं समं वीणादिशब्दतः ।
कण्ठध्वानैकतायुक्तं सुरक्तमभिधीयते ॥ ५२८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नीचोच्चद्रुतमध्यादौ श्लक्ष्णत्वेश्लक्ष्णमुच्यते ।
उच्चैरुच्चारणादुक्तं विकृष्टं मधुरं पुनः ॥
लावण्यपूर्णं निर्दोषं सारवज्जनरञ्जनम् ॥ ५२९ ॥

इति गीत गुणाः

(526—529) The ten desirable features of good music described.

(சு-526—529) கீதகுணங்கள் 10, அவற்றின் விவரம்.

दुष्टं लोकेन शास्त्रेण श्रुतिकालविरोधिच ।
पुनरुक्तं कलाबाह्यं गतत्रय मपार्थकम् ॥ ५३० ॥

ग्राम्यं संदिग्धमित्येवं दशधागीतदुष्टता ।
पददोषाश्चयेकेचित् वाक्यदोषास्तथैव च ॥
पदैकदेशदोषाश्च ते सर्वेगीति माश्रिताः ॥ ५३१ ॥

इति गीतदोषाः ।

(530—531) The ten fanlts of bad music.

(சு. 530—531) கீததோஷங்கள் 10, அவற்றின் விவரம்.

इति श्रीलक्ष्मीधरसुत चतुरदामोदरविरचिते
संगीतदर्पणे प्रबंधाध्यायः समाप्तः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ वाद्याध्याय: पञ्चम:

गीतं निरूपितं तच्च वाद्याधीन मतो मया ।
वाद्यं निरूप्यते गीतनृत्ययो रनुरञ्जनम् ॥ ९३२ ॥

चतुर्विधन्तत् कथितं ततं सुषिरमेवच ।
अवनद्धं घनश्चेति ततं तन्त्रीगतं भवेत् । ५३३ ॥

वीणादि सुषिरं वंशं काहलादि प्रकीर्तितम् ।
चर्मावनद्धवदनं वाद्यते पटहादिकम् ॥ ५३४ ॥

अवनद्धन्तु तत् प्रोक्तं कांस्य तालादिकंघनम् ।
घना मूर्तिस्साभिघाता वाद्यते यत्र तद्धनम् ॥ ९३५ ॥

(532—535) The 4 kinds of Vadyas (musical instruments):— (1) stringed, (2) wind, (3) leather covered, (4) heavy metal.

(சு 532—535) 4 வாத்யங்களின் விவரம்:— 1. தந்திவாத்யம் 2. துளைக்கருவி, 3. தோல்கருவி, 4. கனக்கருவி,

वीणातु द्विविधा प्रोक्ता श्रुतिस्वरविशेषणात् ।
श्रुतिवीणा पुराप्रोक्ता स्वरवीणोच्यतेऽधुना ॥ ९३६ ॥

एकतन्त्रीतु तत्राद्या नकुलश्चत्रितन्त्रिक: ।
चित्रावीणा विपञ्चीच ततस्स्यान्मत्तकोकिला ॥ ९३७ ॥

आलापिनी किन्नरीच पिनाकी संज्ञिकाऽपरा ।
तन्त्रीभि: सप्तभि: क्वापि दृश्यते परिवादिनी ॥ ५३८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वंशः पावः पाविकाच मुरली मधुकर्यपि ।
काहला शृङ्गशंखाद्याः भेदाः सुषिर वाद्यगाः ॥ ९३९ ॥

पटहो मर्दलश्चाथ हुडुक्का करटा घटाः ।
रुञ्जा डमरुको ढक्का डक्कुली ढक्करी तथा ॥ ५४० ॥

त्रिवली दुन्दुभिर्भेरी निस्साण स्तुंबकी तथा ।
इत्यादयो ऽवनद्धस्य भेदा वाद्यस्य कीर्तिताः ॥ ९४१ ॥

तालोऽथ कांस्यतालः स्यात् घण्टाच क्षुद्रघण्टिका ।
जयघण्टा ततः कम्रा शुक्तिपट्टादयस्तथा ॥ ९४२ ॥
घनवाद्यप्रभेदाः स्युः एतेऽन्येच निदर्शनात् ।

(536—to 542) Several varieties of the 4 kinds of instruments.

(ஏ 536—542) நான்கு வகை வாத்யங்களின் பல பேதங்கள்.

अङ्गुलादिप्रमाणात्तु वीणादण्डादि निर्मितम् ।
तन्त्री ककुभतुंबादि लक्षणं धारणं तथा ॥ ९४३ ॥

तद्वादने च व्यापारो वामदक्षिणहस्तयोः ।
वैणिकादवगन्तव्यं नात्रशास्त्रप्रयोजनम् ॥ ९४४ ॥

प्रकृतिस्सर्ववीणानां एषास्यादेकतन्त्रिका ।
अनिबद्धाच सा लोके ब्रह्मवीणेति कथ्यते ॥ ५४९ ॥

सर्वदेवमयी तस्मात् वीणेयं सर्वमङ्गला ।
तन्त्रीद्वयेन नकुला स्यादन्वर्था त्रितन्त्रिका ॥ ५४६ ॥

तन्त्रीभिः सप्तभिश्चित्रा विपञ्ची नवभिर्मता ।
कोणाङ्गुलीवादनेन चित्रा तद्वद्विपञ्चिका ॥ ९४७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चित्राया मङ्गुलीमात्रं विपञ्च्यामुभयं परे ।
तन्त्रीणामेकविंशत्या कथिता मत्तकोकिला ॥ ९४८ ॥

मुख्येयं सर्ववीणानां त्रिस्थानैः सप्तभिः स्वरैः ।
संपन्ना सा ततोऽन्यास्तु तस्याः प्रत्यङ्गमीरिताः ॥ ५४९ ॥

एषैव कीर्त्यतेलोके स्वरमण्डलसंज्ञया ।
आलापिन्येकतुंबास्यात् दण्डः स्यान्नवमुष्टिकः ॥ ९५० ॥

कर्परं नारिकेलोत्थं दोरको दोरिकातथा ।
पट्टसूत्रमयी तन्त्री यद्वा कार्पाससूत्रका ॥ ५५१ ॥

रक्तचन्दनजान् सर्वान् वीणादण्डान् परेजगुः ।
तुंबद्वयञ्चसर्वेषुवीणादण्डेषु योजयेत् ॥ ९९२ ॥

आघाटिसंज्ञयालोके आलापिन्येव कीर्त्यते ।
किन्नरी द्विविधा लध्वी बृहतीच प्रकीर्तिता ॥ ९९३ ॥

वितस्तित्रितयंदैर्घ्ये मानं पञ्चाङ्गुलाधिकम् ।
लध्वीदण्डस्य विस्तारः पञ्चाङ्गुल उदाहृतः ॥ ५९४ ॥

वितस्त्यभ्यधिकादण्डे बृहती परिकीर्तिता ।
गृध्रवक्षोऽस्थिनालीका कनिष्ठाङ्गुलिसंमिता ॥ ९९९ ॥

लोहकांस्यमयी यद्वा कर्तव्या सारिकाख्यया ।
मधूच्छिष्टेन संश्लिष्टा दण्डपृष्ठे चतुर्दश ॥ ९९६ ॥

चतुर्दश स्वरस्थाने सारिका विनियोजयेत् ।
तुंबानां त्रितयंचात्र तिर्यग्योज्यं तृतीयकम् ॥ ९९७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिष्टं ग्रंथान्तरेज्ञेयं मध्यमाचास्ति किन्नरी ।
वादनादिप्रकारोऽपि ग्रंथात् वैणिकशिक्षया ॥ ५५८ ॥

ज्ञातव्यो नात्र कथितः गुर्वधीनो यतोऽत्रसः ।
पिनाकी लोकतो ज्ञेया शास्त्रलक्षणलक्षिता ॥ ५५९ ॥

तुंबस्थितेन धनुषा वाद्यते सविचक्षणैः ।
अश्वपुच्छस्थितैर्वालैः गुणो वादनधन्वनः ॥ ५६० ॥
जानीयाल्लोकतोऽन्यानि ततवाद्यानि तत्त्वतः ।

(543-560) The several kinds of vina and other stringed instruments described.

(௬ 543—560) பலவகை வீணைகளும், மற்ற தந்திவாத்யங்களும்.

नादश्रुतिस्वरग्राम जातिरागादितत्त्ववित् ।
देहसौष्ठवसंपन्नः स्थिरासनपरिग्रहः ॥ ५६१ ॥

जितश्रमस्त्यक्तभयः सुशारीरः प्रगल्भधीः ।
सावधानोवैणिकस्स्यात् गीतवादनकोविदः ॥ ५६२ ॥

(561—562) The requisites of Veena-players.

(௬ 561—562) வைணிக லக்ஷணம்

वंशः स्याद्वैणवो दान्तः खादिरश्चन्दनोऽथवा ।
आयसः कांस्यजो रौप्यः काञ्चनोऽप्यथवा भवेत् ॥ ५६३ ॥

वर्तुलः सरलः श्लक्ष्णो ग्रंथिभेदव्रणोज्झितः ।
तस्य द्वेत्रीणि चत्वारि चाङ्गुलानि शिरस्स्थलात् ॥ ५६४ ॥

त्यक्त्वा फूत्काररन्ध्रन्तु कार्यमङ्गुलिसंमितम् ।
अर्धाङ्गुलान्तराणिस्युः रंध्राण्यन्यानि सप्तच ॥ ५६५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तेषुच स्वरविन्यासः प्रकारो वादनस्य च ।
भेदाश्च सर्वमेवैतत् विज्ञेयं ग्रंथलोकतः ॥ ५६६ ॥

अष्टादशाङ्गुलोद्देशात् एकैकाङ्गुलवृद्धितः ।
वंशाश्चतुर्दशस्युस्ते उमापत्यादिसंज्ञया ॥ ५६७ ॥

(563—567) The flute, its make and its varieties
(ச 563—567) புல்லாங்குழலின் லக்ஷணமும் வகைகளும்.

अङ्गुलीसारणाभ्यासः सुस्थानत्वं सुरागता ।
गीतवादनदक्षत्वं गातॄणांस्थानदायिता ॥ ५६८ ॥

तद्दोषाच्छादनं मार्गदेशीरागेषु कौशलम् ।
एव मादि गुणैर्युक्तो वांशिकःस्यादिहोत्तमः ॥ ५६९ ॥

(568—569) The qualifications of a good flutist.
(ச 568—569) புல்லாங்குழல் வாசிப்பவர் குணங்கள்.

हस्तद्वयाधिका माने मुखरंध्रसमन्विता ।
चतुःस्वरच्छिद्रयुता मुरली चारुवादिनी ॥ ५७० ॥

श‍ृङ्गजा दारवीचस्यात् काहलाकृतिधारिणी ।
अष्टाविंशत्यंगुलाच दैर्घ्ये मधुकरी मता ॥ ५७१ ॥

तन्निर्माणप्रकारश्च रागोत्पत्ति स्ततोयथा ।
तत्सर्वं लोकतोज्ञेयं नात्र शास्त्रप्रयोजनम् ॥ ५७२ ॥

ताम्रजा राजती यद्वा काञ्चनी सुषिरान्तरा ।
धत्तूरकुसुमाकारवदनेन विराजिता ॥ ५७३ ॥

हाहूवर्णवती धीरविशुद्धोच्चारकारिणी ।
हस्तत्रयमिता दैर्घ्ये काहला वाद्यते जनैः ॥ ५७४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

करेणुवदनाकारं वदने दोषवर्जितम् ।
शृङ्गंतन्माहिषं स्निग्धं श्लक्ष्णं सुघटितं कृतम् ॥ ५७५ ॥

विशेषस्त्वन्यतोज्ञेयो वाद्यं गोपालकेलिषु ।
निर्दोषस्योत्खातनाभेः शंखस्यै कादशाङ्गुलम् ॥ ५७६ ॥

शिखरं निर्मितं धातुसिक्थकाभ्यां मनोरमम् ।
रंध्रमर्धांगुलमितं शिखरस्य मुखेभवेत् ॥ ५७७ ॥

अन्तेतु माषभात्रं स्यात् शंखमेवंविधंसुधीः ।
धृत्वा कर्कटहस्तेन भूरिश्वासभृतोदरम् ।
हुंभुं भोंदिग्दिगित्येतद्वर्णान् शंखेन योजयेत् ॥ ५७८ ॥

(570—578) The other wind instruments—(1) Murali (2) Madhukari (3) Kahala, (4) Sringa, (5) Sankha,

(சு 570—578) மற்ற துளைக்கருவிகள்— (1) முரளி, (2) மதுகரி, (3) காஹளம், (4) சிருங்கம், (5) சங்கு.

मार्गदेशीगतत्वेन पटहो द्विविधोभवेत् ।
निर्माण कथनन्तस्य ज्ञातृत्वे नोपयुज्यते ॥ ५७९ ॥

S.R. III, p.392 sl. 805

तदुपेक्ष्य ततः पाटाः कथ्यन्ते तत्तदुद्भवाः ।
हस्तोद्भवास्त एवात्र हस्तपाटाः प्रकीर्तिताः ॥ ५८० ॥

सद्योजातादिपञ्चभ्यः मुखेभ्यः पार्वतीपतेः ।
नागबंधादयोजाताः तस्मान्मुख्याः प्रकीर्तिताः ॥ ५८१ ॥

13

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अष्टाशीतिरिमे हस्तपाटाः शास्त्रे प्रकीर्तिताः :—

१. वनगिनगिननगि
२. दुगिडदगिथदथों
३. गिडगिधादधैं
४. किटतत
५. नदनु
६. खिरतकिट
७. थोंगि थोंगि

— इति सद्योजातोद्भवाः

१. ततकिट
२. थोहन्ता
३. थोंगिन थोंथोंगिन
४. थोंथों गोंगों
५. थों गिणतत्ता
६. किट थोंथों गिनखेंखें
७. टकुडेंडें

— इति वामदेवोद्भवाः

१. नन गिड गिड दगिदा-
२. दथरिकि दथरिकि
३. त कि धि कि
४. ट ग नु खु
५. खिरिट
६. खिरि खिरि
७. नरकि थरकि

— इति अघोरोद्भवाः

१. दरगिड गिडगिरा
२. टकुटटु
३. नन गिन खरि खिरि
४. दखें खें
५. थोंगिनगि थोंगिनगि
६. तत्ता
७. धि धि

— इति तत्पुरुषोद्भवाः

१. तडे नझें झें
२. तिरिखु तिरिखु
३. कणकणकि
४. धिधिकिटकि
५. दिगि नगि
६. थरकट
७. धों न कट

— इति ईशानोद्भवाः[1]

---

1. मातृकासु पाटाक्षरपाठभेदाः बहवः सन्ति तेषां मतभेदान् क्रोडीकृत्य अयं पाठः उद्धृतः। अपिच अयं पाठः संगीतरत्नाकरस्थात् पाठात् क्वचित् भिद्यते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्रान्ये हस्तपाटास्तु ज्ञेयाग्रंथान्तराद्बुधैः[1] ॥ ५८२ ॥

(580—583 et seq:) The 35 original 'hastapatas' that were born from the five faces of Lord Siva.

(சு-580—583ம், பிந்திய உரை நடையும்) ஆதியில் பரமசிவனுடைய ஐந்து முகங்களினின்றும் பிறந்த 35-ஹஸ்த பாடங்கள்.

वाद्यप्रबंधाः कथ्यन्ते पाटाक्षर विनिर्मिताः
येषूद्ग्राहादिकं सर्वं ज्ञेयं गीत प्रबंधवत् ॥ ५८३ ॥

यति रोताच गजरो रिगोणी कवितं पदम् ।
मेलापक श्चोरशमोद्ग्राहप्रहरणा न्यथ ॥ ५८४ ॥

अवत्सकश्छंडणश्च तुडुका मलपं ततः ।
इत्यादयोऽवपाटान्ताः त्रिचत्वारिंशदीरिताः ॥ ५८५ ॥

तेषांलक्ष्यस्वरूपञ्च मर्दलादिषुवादनम् ।
ज्ञेयंतदन्यतोलोके कथ्यतेमोहराख्यया ॥ ५८६ ॥

इति वाद्यप्रबंधाः ।

(584—587) The 43 Vadya Prabhandas or compositions made up of hastapatas.

(சு-584—587) ஹஸ்த பாடங்களின் சேர்க்கையால் உண்டாகும் 43 விதமான வாத்ய பிரபந்தங்கள்.

---

1 आनान्दाश्रम मुद्रणालय प्रकाशिते संगीतरत्नाकरे षष्ठे वाद्याध्याये 570 to 577 पुटानि द्रष्टव्यानि यत्र अष्टाशीति हस्तपाटलक्षणं तत्तदुत्पादनप्रकारेण सह विवृतम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ मर्दललक्षणम्

निर्दोषबीजवृक्षोत्थः मर्दलः परिकीर्तितः ।
रक्तचन्दनजोयद्वा खादिरोऽन्यैरयं मतः ॥ १८७ ॥

विनिर्माणप्रकारोऽस्य पाटोत्पत्तिरतोयथा ।
वादकश्चरसादिस्तुज्ञेयं ग्रंथान्तराद्बुधैः[1] ॥ १८८ ॥

(588—589) 'Mardala' (mirdanga) and its make.
(சு-588—589) மிருதங்க லக்ஷணம்.

अथ मार्दलिकलक्षणम्

चतुर्विधोमार्दलिकः वादकोमुखरीतथा ।
ततः प्रतिमुखर्याख्यः तुर्योगीतानुगोमतः ॥ १८९ ॥

वादकः (स्या) च्छुद्धवद्पर्यायः कथितोबुधैः ।

---

1. मृदङ्गलक्षणस्य पाठान्तरमपि 11499-11500 अङ्कित मातृकयोः वाद्याध्यायारंभात्प्राक् वर्तते तद्यथा :—

अर्नीरतीर जातस्य रक्तचन्दनकस्यथ ।
खादिरस्य शिरीषस्य बीजवृक्षस्य वापुनः ॥ १ ॥

ग्रंथिव्रण विहीनस्य सुपक्वस्य समस्य च ।
मृदङ्गो घट्यते लक्ष्यवेदिना च मृदङ्गिणा ॥ २ ॥

हरीतक्याकृतिः सम्यक् सदृशश्चसचिक्कणत् ।
चतुस्तालस्त्वसौदैर्घ्ये पिण्डेत्वङ्गुलसंमितः ॥ ३ ॥

एकादशांगुलमितं कर्तव्यं दक्षिणंमुखम् ।
वदनं वामतः किन्तु द्वादशाङ्गुलसंमितम् ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुखरी प्रेति मुखरी पर्यायोंऽभार[1] उच्यते ॥ १९० ॥

गीतानुगस्यपर्याय: डव[2]णा इति कथ्यते ।

तत्र वादक शुद्धवटु लक्षणम् ।

वादको वादकर्तास्यात् वाद: पक्षपरिग्रह: ॥ १९१ ॥

छागस्यारोगिण: कृत्त्वा पारिजाठरचर्मण: ।
अतिस्वच्छतरा: शुद्धा: विधेयावर्तुलास्तुपट् ॥ ५ ॥

निक्षिप्यपारिकास्तास्तु किंश्चिदुष्णजलेपुन: ।
कराभ्यां मर्दयेत्तज्ज्ञ: कोमलं मलवर्जितम् ॥ ६ ॥

तिस्रस्तिस्र: पारिकास्तु प्रत्येकंवदनेन्यसेत् ।
तत्रद्वे महिषीचर्म कषमल्लसिताभिदा ॥ ७ ॥

तेहृत्य (त्वा) द्विगुणीकृत्य वेणिवन्मेलयेद्दृढम् ।
एवं जलधरध्वानगंभीरो भवतिध्वनि: ॥ ८ ॥

कांस्य ताले .... ।
धं भौ धां धां धलां भेर्यां डमं डमरुकेतत: ॥ ९ ॥

रुञ्जौ रुंधु च ढक्कायां डकुल्यां तु चकंवुरे (?) ।
धुंकारमथतुंवक्यां धडिनिस्साणकेधडाम् ॥ १० ॥

सल्लकेपि त्रिव ल्यां धौं घनतालेतकस्तत: ।
करटायान्तु डेमेवं प्रधानाक्षरयोजना ॥ ११ ॥

शेषा: साधारणा: पाटा: सर्ववाद्ययथोचिता: ।
तेचानन्त्यान्नशक्यन्ते प्रत्येकं वेदितुंवुधै: ॥ १२ ॥

1. 'पर्यायो भार: ' इति वा पाठ:
2. 'श्रवणा ' इति वापाठ:

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वपक्षसाधनं तद्वत् परपक्षस्यदूषणम्
वादेषु वादनं कार्यं प्रथमंत्रो[3]टनाभिधम् ॥ ५९२ ॥

मर्दलंतालसहितं वोहणेन विना ध्वनिः ।
(यो देहङडगित्यादि कृतोऽसौ त्राटनं मतं[4]) ॥ ५९३ ॥

[5]चच्चत्पुटादितालैस्तु भागषट्केनयोजितः ।
कर्तरीसहितो यत्र वादकस्सतु कथ्यते ॥ ५९४ ॥

इति वादकशुद्धवटुलक्षणम्

शब्दप्रबंधान् सततं वादयेत्तालसंयुतान् ।
बोहणेन विनातत्र मुखर्यादिकमुच्यते ॥ ५९५ ॥

सएव भारसंज्ञो हि कथ्यतेतुविचक्षणैः

इति मुखरीप्रतिमुखरीभारलक्षणम्

मेलापकं तथा चाली नियमंवा यथाक्रमम् ।
विचित्रशब्दकैर्न्यासं कालमानयुतञ्चतत् ॥ ५९६ ॥

बोहणेन समायुक्तं रञ्जकं सर्वसौख्यदम् ।
शुद्धसालगसंकीर्णगीतैश्चाति मनोहरम् ॥ ५९७ ॥

---

3. 'त्राटनाभिधं' इतिवापाठः
4. इदं अर्धं मातृकासु त्यक्तं संगीतरत्नाकरादुद्धृत्यमुद्रितम्
5. इतः प्राक् मातृकासुप्रकरणसंबन्धरहितानि त्रीणिश्लोकार्धानिदृश्यन्ते ।
तानियथाः— शब्दप्रबन्धयत्यादिवादनेतुप्रवीणता ।
सद्योजातादिवक्त्रेभ्यः पञ्चभ्यः पार्वतीपतेः ।
नागबन्धादयोजाताः तस्मान्मुख्याः प्रकीर्तिताः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीतानुगमिति प्रोक्तं डवणाइतिकेचन ।
इति गीतानुगडवणालक्षम्
इति चतुर्विध मार्दलिक लक्षणम्[1]

(589—598) The four types of playing on Mardala (Mridanga)

(த-589 to 591) மத்தளம் வாசிப்பதில் நான்கு வகை.

---

1. मार्दलिकलक्षणस्य पाठान्तरमपि 11499—11500—अङ्कित-मातृकयोः दृश्यते—तद्यथा:।—

ध्वनिमेलविदा पाटतालादि गुणवेदिना ।
मृदंगोवाद्यतेयेन सम्मृदंगीतिगीयते ॥ १ ॥

हस्तपाटप्रकारज्ञः गीतवादनकोविदः ।
यतितालल्याभिज्ञः पाटज्ञः पञ्चसञ्चवित् ॥ २ ॥

दशहस्तगुणोपेतः पात्रा (गात्र) भिप्रेतवादकः ।
वाद्येसमप्रभेदज्ञः रूपरेखान्वितस्तथा ॥ ३ ॥

उद्घुट्टनपटु स्सर्व वाद्यभेदविवेचकः ।
(उत्फुल्लनवमः इति 11499—मातृकायाम्)
नादवृद्धिक्षयापत्तिकोविदः प्रतिभापटुः ॥ ४ ॥

गुणामार्दंगिकस्यैते दोषःस्यात्तद्विपर्ययः ।
अतालज्ञ मरक्तिज्ञ मशास्त्रंचैववादकम् ॥ ५ ॥

परित्यजन्तुविद्वांसः कोमलं (केवलं) चर्मघातकम् ।

(1—5) The qualifications of a player in Mridanga
(த-1—5) மிருதங்கம் வாசிப்பவரின் லக்ஷணங்கள்.

अथ सञ्चलक्षणम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

- स्कंधकूर्परयोस्तद्वत् अंगुष्ठमणिबंधयोः ॥ ६ ॥

वामस्य चरणस्यापि कंपः सञ्चोऽभिधीयते ।
श्रेष्ठोमार्दंगिकस्सञ्चात् अंगुष्ठमणिबंधयोः ॥ ७ ॥

सञ्चाभ्यां मणिबंधाभ्यां कूर्पराभ्यांचमध्यमः ।
स्कंधकूर्परसञ्चस्तु नीचोमार्दंगिकोभवेत् ॥ ८ ॥

वामांघ्रिसञ्चतः श्रेष्ठः सदा मार्दंगिकोभवेत् ।
एतदुक्तविपर्यासात् वरोहौडुक्किकोमतः ॥ ९ ॥

(6 to 9) The parts of the arm and left leg which move when the performer plays in the Mridangam :— (1) The shoulder joint (2) The elbw joint (3) The wrist (4) the thumb and (5) the left foot. The best player moves only the last three.

(சு-6—9) மிருதங்கம் வாசிக்கும்போது அசைகின்ற ஐந்து உறுப்புகள்:— (1) தோள் (2) முழங்கை (3) மணிக்கட்டு (4) பெருவிரல் (5) இடதுபாதம். உத்தம வாத்யங்காரரிடம் கடைசி 3 உறுப்புகளே அசையும்

अथ हस्तगुणाः

पञ्चानुगौ दृढौ व्यक्तौ स्निग्धौ दृढनखौ लघू ।
विधेयाङ्गुलिसञ्चारौस्वेदहीनौ जितश्रमौ ॥ १० ॥

युक्तप्रहारौ च करौ प्रोक्तौ दशगुणाविति ।

(10) The ten good features of a Mridangi's hand.
(சு-10) மிருதங்கம் வாசிப்பவருடைய ஹஸ்த குணங்கள் 10.

अथ पाटलक्षणम्

पाटो वाद्योद्भवश्शब्दः (स्वरैः षोडशभिर्युतः) ।
'ङ' वर्जितः कवर्गश्च 'ट' 'त' वर्गौ 'र' 'हो' मतौ (यलौ) ॥ ११ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

झघावितिचवणानां विंशतिः पाटसंज्ञकाः ।
हस्तोद्भवाः पाटभेदाः हस्तपाटाः प्रकीर्तिताः ॥ १२ ॥

(11—12) The twenty consonants which in conjunction with the sixteen vowels are produced in Mridanga and other leather - covered instrun.ents.

(சு-11—12) மிருதங்கம் முதலிய தோற்கருவிகளில் பேசும் 'பாடங்கள்' என்னும் சப்தங்களின் விவரம்:—16 உயிரெழுத்துக்களுடன் சேர்ந்த 20 மெய்யெழுத்துக்கள்.

तत एव हुड्कादिवाद्यस्यापिच लक्षणम् ।
तथा निस्साणभेर्यादिलक्षणं ज्ञेयमन्यतः ॥ ॥ ५९८ ॥

गुणदोषाश्च काष्ठस्य चर्मणश्च तथैवते ।
कांस्यादि निर्मितं वाद्यं 'घन' मित्यभिधीयते ॥ ५९९ ॥

गृहीत्वा शुद्धकांस्यंतत् पूर्वमग्नौ विशोधयेत् ।
तालद्वयं प्रकुर्वीत तस्य शास्त्रोक्तमानतः ॥ ६०० ॥

तालःस्याद्वर्तुलस्तत्र सपादद्वयङ्गुलाननः ।
मध्योऽस्याङ्गुलविस्तारः नाभौ रंध्रञ्चमध्यमे ॥ ६०१ ॥

पादोनगुञ्जामात्रंस्यात् पिण्डस्तु यवमात्रकः ।
सार्धाङ्गुलः स्यादुत्सेधः समकायाकृतिस्तथा ॥ ६०२ ॥

गुरुत्वञ्च यथानादो भवेच्छ्रुतिमनोहरः ।
ज्ञातव्यंलोकतस्सर्वं दोरिकाधारणादिकम् ॥ ६०३ ॥

ईदृक् तालद्वयंकृत्वा तत्रैकं तिर्यगानतम् ।
धृत्वा तस्याग्रभागेन मध्यमन्यस्य ताडयेत् ॥ ६०४ ॥

14

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिवेनताडयेच्छक्तिं नतुशक्त्या शिवंक्वचित् ।
अल्प[1]नादा भवेच्छक्तिः भूरिनादः शिवोभवेत् ॥ ६०५ ॥

वामेन धारयेच्छक्तिं शिवं दक्षिणपाणिना ।
अश्वमेधफलञ्चैव प्राप्नुयाद्दोषमन्यथा ॥ ६०६ ॥

देवता तुम्बुरुयुता शक्तौशक्तिः शिवेशिवः ।
द्रुतादिसिद्धस्तन्नाद मङ्गुलीभिर्विधारयेत् ॥ ६०७ ॥

पाटानत्र विजानीयात् सर्वानपि विचक्षणः ।

(599-608) The 'Ghanatala' (small heavy cymbals) described.

(சு-599-608) ஜாலராவின் லக்ஷணம்.

पद्मिनीपत्रसङ्काशौ कांस्यतालसमाकृती ॥ ६०८ ॥

त्रयोदशाङ्गुलौ वक्त्रे कर्तव्यौ द्व्यङ्गुलौ तले ।
मध्येऽङ्गुलमिते निम्नौ लक्ष्यशेषंतु तालवित् ॥ ६०९ ॥

झें झें किटादयः पाटाः मुख्याश्चान्ये निदर्शनात् ।
नारदो देवता चात्र कथिता पूर्वसूरिभिः ॥ ६१० ॥

घण्टादि वाद्यजातस्य लक्षणं ज्ञेयमन्यतः ।

(609-611) The 'Kamsyatala' (big brass cymbals) described.

(சு-609-611) பெரிய தாளம்.

गंभीरनादमधुरं समं गीतादिरक्तिकृत् ॥ ६११ ॥

---

1. अत्र–इति–11499–अंकितमातृकायांपाठः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्फुटप्रहारमित्यादि गुणैः स्याद्वाद्यमुत्तमम् ।
हस्तपाटप्रहारज्ञः गीतवाद्यादिकोविदः ॥ ६१२ ॥

लयतालकलाभिज्ञः गात्रभिन्नितवादकः ।
समादिग्रहविज्ञश्च पाटज्ञो ध्वनितत्त्ववित् ॥ ६१३ ॥

गीतवादनतत्त्वज्ञः छिद्राच्छादनपण्डितः ।
ग्रहमोक्षप्रदेशज्ञः गीतनृत्तप्रमाणवित् ॥ ६१४ ॥

नादवृद्धिक्षयाभिज्ञः उत्तमोवादकोभवेत् ।
गुणैः कतिपयैर्हीनः सर्वैर्वा वादकोऽधमः ॥ ६१५ ॥

(611-615) The good features of instruments and players in general-

(சு. 611-615) வாத்தியங்களின் குணங்களும், வாசிப்பவர்களின் குணங்களும்.

इति श्रीलमल्लक्ष्मीधरसुत चतुरदामोदरविरचिते
संगीतदर्पणे वाद्याध्यायः पञ्चमः समाप्तः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ अथ तालाध्यायप्रारम्भः ॥

श्रीविष्णुंसुखदं दीप्तं गुरुंव्यापकरूपकम् ।
सुवृत्तमक्षरं नत्वा वक्ष्ये तालस्य लक्षणम् । इति देवर्षिः ॥

नानामार्गलयोयत्र यतीनां स्यात्कलानिधौ ।
तं दक्षिणं शिवंनौमि चित्रवृत्तिमयं ध्रुवम् ॥ इति शिवकिङ्करः॥

विष्णुंलोकगुरुं प्रणम्य शिरसा सन्मार्गसन्दर्शकं
कीर्तिप्रीतिकरं जनस्य लघुना कालेन कामप्रदम् ।
सेव्यं सद्यतिभिः द्रुतप्लुतपदन्यासाप्तलोकत्रयं
तालानां कथयामि लक्षणमिदं पूर्वोक्तशास्त्रक्रमात् ॥
इतिचूडामणिः ॥ ६१९ ॥

कमलभवविराजमानमध्यं सुललितविग्रहमक्षरं त्रिमूर्तिम् ।
सुभगशिखिरुहाश्चदुत्तमाङ्गं घनकमनीयमहं मुकुन्दमीडे ॥

तौर्यत्रिकं च मत्तेभस्तालं तस्याङ्कुशंविदुः ।
न्यूनाधिकप्रमाणन्तु प्रमाणं क्रियतेयतः ॥ ६२१ ॥
इति कात्यायनः ।

वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः ।
ताळज्ञश्चाप्रयासेन मोक्षमार्गं सगच्छति ॥ ६२२ ॥

इति याज्ञवल्क्यः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथाचामरः । तालः कालक्रियामानं लयस्साम्यं अथस्त्रियाम् ।
ताण्डवं नटनं नाट्यं लास्यंनृत्तं च नर्तने ॥ ६२३ ॥

अथ सङ्गीतार्णवमतम् । कालः क्रियाच मानंच सम्भवन्ति यथासह ।
तथा तालस्य सम्भूतिरितिज्ञेयं विचक्षणैः ॥ ६२४ ॥

कालः क्षणादिकोज्ञेयः तालयोर्घटनं क्रिया ।
क्रिययोरन्तरं यत्तु विश्रामो मानमुच्यते ॥ ६२५ ॥

तथा च शिवकिङ्करः । तालोलघ्वादिमितया क्रियया सम्मितो मितिम् ।
गीतादे र्विदधत्कालः सचद्वेधाबुधैः स्मृतः ॥ ६२६ ॥

हरिभट्टः । तालः कालइति ख्यातो ह्यावापादिक्रियामितः ।
प्राणैस्तु दशभिर्युक्तः तौर्यत्रयमितोभवेत् ॥ ६२७ ॥

तथाच विनोदः । हस्तद्वयस्यसंयोगे वियोगेचापि वर्तते ।
व्याप्यमानो दशप्राणै स्स कालस्तालसंज्ञकः ॥ ६२८ ॥

अथ तालशब्दस्यनिष्पत्तिमाह । तालस्तलप्रतिष्ठायां इति
धातोर्घञ्जिस्मृतः । गीतं वाद्यं तथानृत्यं यतस्ताले प्रतिष्ठितं ॥६२९॥

(621-629) What is 'tala'?
(அ. 621-629) 'தாளம்' என்றால் என்ன?

मार्गदेशीगतत्वेन तालोऽसौद्विविधोमतः ।
शुद्धसालगसङ्कीर्णा स्तालभेदाः क्रमान्मताः ॥ ६३०॥

(630) Classification of talas :—
A. (1) Marga (classical) & (2) Desi (popular)
B. (1) Suddha (pure) (2) Salaga (mixed)
(3) Sankirna (Promiscuous)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(சு, 630) தாளங்களின் வகைகள் ;—
A. (1) மார்க்க தாளங்கள் (பழைய நூல்களில் உள்ளவை. (2) தேசி தாளங்கள் (பிற்காலத்தவை)
B. (1) சுத்த (2) ஸாலக (கலந்தவை) (3) ஸங்கீர்ண (பல கலப்புடையவை)

अथ दशप्राणा उच्यन्ते ॥

कालो मार्गः क्रियाङ्गानि ग्रहो जातिः कलालयाः ।
यतिः प्रस्तारकश्चेति तालप्राणा दशस्मृताः ॥ ६३१ ॥

(631) The ten 'pranas' or elements of talas:—
(1) Kala (time), (2) Marga (Provincial modes) (3) Kriya (Marking time by beats and other movements of the hands), (4) Anga (the constituent units of particular varieties of tala), (5) Graha (the point in the particular tala where the musical piece begins) (6) Jati (the number of steps into which each constituent unit of a tala is divided (7) (Kala the mode of creating subvarieties of tala by using multiples of the constituent units) (8) Laya (the speed of the tala), (9) Yati (the rhythmic arrangement of slow and quick speed), (10) Prastara (permutation and combination of Constituent units to make up a single variety of tala)

(சு-631) தாளத்தின் பத்து 'பிராணன்கள்' அல்லது உறுப்புகள்;— (1) காலம் (கால அளவை) (2) மார்க்கம் (நாட்டுக்கு நாடு மாறு படும் தாள நடை) (3) க்ரியா (காலத்தை அளக்கும் தட்டு, வீச்சு முதலியன), (4) அங்கம் (ஒவ்வொரு தாளத்தையும் தொகுக்கும் கால அளவை உறுப்புகள்), (5) க்ரஹம் (தாளத்தின் எந்த இடத்தில் பாட்டு ஆரம்பிக்கப் படுகிறதோ அந்த 'இடம்' அல்லது எடுப்பு) (6) ஜாதி (ஒவ்வொரு தாளத்திலும் உள்ள அங்கங்களின் உள்நடை) (7) கலா (தாளத்தின் அங்கங்களைப்பெருக்கிப் புதியதாளங்கள் அமைக்கும் முறை) (8) லயம் (தாளத்தின் வேகம் ;) 'துரிதம்' 'விளம்பம்' முதலியகதி) (9) யதி (தாளத்தின் விளம்பம், துரிதம், முதலிய

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

கதிகளை அழகாக அமைக்கும் முறை) (10) ப்ரஸ்தாரம் (ஒரே தாளத்தின் அங்கங்களைப் பலவகையாக அமைக்கும் வரிசைக் கிரமம்)

क्षणादिरूपो यः कालः स प्राणत्वेन कीर्त्यते ।
गीतादेस्तु मितिं कुर्वन् स एवायाति तालताम् ॥ ६३२ ॥

अणुद्रुतं समारभ्य ताळकालोऽलकथ्यते ।
क्षणादिरूपकालेन तालो नेतुं नशक्यते ॥ ६३३ ॥

तालः कालजनिः प्रोक्तः सोऽवच्छिन्नो द्रुतादिभिः ।
गीतादिमानकर्ता स्यात् सद्वेधा कथितो बुधैः ॥ ६३४ ॥

अथ ताळसमूलतां दर्शयति ।

शिवशक्त्यात्मकं पुण्यं यशस्यं भुक्तिमुक्तिदम् ।
दशप्राणात्मकं ताळं यो जानाति स तत्ववित् ॥ ६३५ ॥

दशप्राणपरिज्ञानप्रवीण स्तालधारकः ।
नृत्यादिषु प्रशस्तःस्यादितरस्तु मृतोपमः ॥ ६३६ ॥

तकारे शङ्करः प्रोक्तो लकारे पार्वतीस्मृता ।
शिवशक्तिसमायोगात्ताळइत्यभिधीयते ॥ ६३७ ॥

(632—637) Detailed Definition of the Concept of Tala
(சு-632—637) 'தாளம்' என்பதன் விவரணம்.

तथा च आञ्जनेयः । पद्मपत्रशतैकैकच्छेदकालः क्षणःस्मृतः ।
लवः क्षणैरष्टभिः स्या त्काष्ठास्या दष्टभिर्लवैः ॥ ६३८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्यान्निमेषोऽष्टकाष्ठाभिः निमेषैरष्टभिः कला ।
कलाद्वयाच्चतुर्भागः स एव त्रुटिरुच्यते ॥ ६३९ ॥

चतुर्भागद्वयेनैव बिन्दोरर्धं प्रकीर्तितम् ।
अणुद्वयाद्द्रुतः प्रोक्तः तद्द्वयाच्चलघुः स्मृतः ॥ ६४० ॥

लघुद्वयात्तु वक्रः स्यात् लत्रयेण प्लुतो मतः ।
इति ताळगतिः प्रोक्ता ताळज्ञैः पूर्वसूरिभिः ॥ ६४१ ॥

(638—641) The first 'Prana' of Tala— 'Kala'
(சு-638—641) தாளத்தின் முதல் பிராணமாகிய 'காலம்;

इति कालोत्पत्तिः प्रथमः प्राणः ।

तथा च रत्नाकरः । मार्गाःस्युस्तत्र चत्वारो ध्रुवश्चित्रश्चवार्तिकः ॥६४२॥

दक्षिणश्चेति तत्रस्यात् ध्रुवके मात्रिका कला ।
शेषेषु द्वेचतस्रोऽष्टौ क्रमान्मात्राकलाभवेत् ॥ ६४३ ॥

ध्रुवका सर्पिणी कृष्या पद्मिनी च विसर्जिता ।
विक्षिप्ताख्या पताका च मात्रास्यात्पतिताऽष्टमी ॥ ६४४ ॥

सशब्दातुध्रुवाज्ञेया सर्पिणी वामगामिनी ।
कृष्यादक्षिणतः पाता पद्मिनीस्यादधोगता ॥ ६४५ ॥

विसर्जिताबहिर्याता विक्षिप्ताकुञ्चनात्मिका ।
पताकातूर्ध्वगमनात्पतिताकरपातनात् ॥ ६४६ ॥

ध्रुवपातेप्रयोज्यास्ताः नावापादौ कदाचन ।
ध्रुवकापतिताचित्रे वार्तिकेत्वादिमे उभे ।
अन्त्ये द्वेच प्रयोक्तव्ये क्रमादष्टौचदक्षिणे ॥ ६४७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथा च चूडामणिः । दक्षिणो वार्तिकश्चित्रो ध्रुवश्चित्रतरस्तथा ।
अथ चित्रतमश्चेति षण्मार्गाः शास्त्रसम्मताः ॥ ६४८ ॥

ध्रुवकादिकलाष्टौच मार्गे दक्षिणसंज्ञके ।
ध्रुवकासर्पिणीचैव पताका पतितातथा ॥ ६४९ ॥

चतस्रो वार्तिकेज्ञेया श्चित्रेथपुनरुच्यते ।
ध्रुवका पतिताचेति योजनीया विशेषतः ॥ ६५० ॥

ध्रुवे कलैका विज्ञेया शार्ङ्गदेवेन कीर्तिता ।
अथ चित्रतरे मार्गे कलाच द्रुतसम्मिता ॥ ६५१ ॥

मार्गे चित्रतमे ज्ञेया कलाकरजसम्मिता ।
तथा च मणिदर्पणः । दक्षिणो वार्तिकश्चित्रो ध्रुवश्चित्रतरस्तथा ॥

अथचित्रतमश्चैव षण्मार्गोऽत्रप्रकीर्तितः ।
[चित्रतमश्चातिचित्रतमश्चैव प्रकीर्तितः इति वापाठः]
चतुर्भागस्त्रुटि श्चैवानुत्रुटिर्घर्षण स्तथा ॥ ६५३ ॥

अनुघर्षणकश्चैव स्वर श्चापि प्रकीर्तितः ।
सर्वेषां मतमाश्रित्य मार्गा द्वादशधा कृताः ॥ ६५४ ॥

तेषां मार्गप्रभेदानां कलाभेदान्प्रचक्ष्महे ।
तदर्धार्धप्रभेदेन शास्त्रतस्संप्रदायतः ॥ ६५५ ॥

तत्र दक्षिणमार्गे तु मात्राष्टकमुदाहृतम् ।
वार्तिके तु चतुर्मात्रा श्चित्रमार्गो द्विमात्रकः ॥ ६५६ ॥

15

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एकमात्रा चित्रतरेद्रुतश्चित्रतमे मतः ।
अतिचित्रतमे मार्गे ऽणुद्रुतः परिकीर्तितः ॥ ६५७ ॥

चतुर्भागे तदर्धास्या त्कलांशकलिकाकृतिः ।
त्रुटिस्तदर्धभागःस्यात्तदर्धेस्यादनुत्रुटिः ॥ ६५८ ॥

तदर्धं घर्षणेचस्यात्तदर्धं चानुघर्षणे ।
एतदर्धं स्वरे प्रोक्तम् सूक्ष्मतत्त्वार्थवेद्भिः ॥ ६५९ ॥

एकवृत्तिर्दक्षिणे स्यात् ततो द्वेद्वे प्रयोजयेत् ।
यदालक्ष्येण सहितं कमनीयन्तदाभवेत् ॥ ६६० ॥

(642—660) The 2nd Prana of Tala—'Marga;
(சு-642—660) தாளத்தின் இரண்டாவது பிராணமும் 'மார்க்கம்'

इति मार्गाः द्वितीयः प्राणः ॥

निश्शब्दा शब्दयुक्ताच क्रियाच द्विविधा मता ।
निश्शब्दाच कला प्रोक्ता चतुर्धा सा प्रकीर्तिता ॥ ६६१ ॥

आवापादिप्रभेदेन तल्लक्षणमथोच्यते ।
आवापश्चाथ निष्क्रामो विक्षेपश्च प्रवेशकः ॥ ६६२ ॥

निश्शब्देति चतुर्धोक्ता सशब्दापि चतुर्विधा ।
ध्रुवः शम्पा तथा तालः सन्निपात इतीरिता ॥ ३६३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पात: कलाच सा ज्ञेया तासां लक्ष्माभिधीयते ।
आवापस्तलहस्तस्योत्तानस्याङ्गुलिकुञ्चनात् ॥ ६६४ ॥

निष्क्रामोधस्तलस्यस्यादङ्गुलीनां प्रसारणम् ।
क्षेपोदक्षिणपार्श्वस्थोत्तानस्य प्रसृताङ्गुळेः ॥ ६६५ ॥

विक्षेपोधस्तलस्यस्यात् प्रवेशोङ्गुलिकुञ्चनं ।
ध्रुवोहस्तस्य पाट:स्यात् छोटिकाशब्दपूर्वकः ॥ ६६६ ॥

शम्पादक्षिणहस्तस्य तालो वामकरस्य तु ।
उभयोः सन्निपातः स्यात् तासां मार्गवशान्मितिः ॥ ६६७ ॥

(661—667) The 3rd prana of Tala—'Kriya'
(661—667) தாளத்தின் மூன்றாவது பிராணமாகிய 'க்ரியா'

इति क्रिया तृतीयः प्राणः ॥

द्रुतोलघुर्गुरुश्चैव प्लुतश्चेति यथाक्रमं ।
चत्वार्यङ्गानि नृत्यज्ञैः कथितानि विचक्षणैः' ॥ ६६८ ॥

अणुद्रुतो द्रुतश्चेति विरामद्रुत लस्तथा ।
लविरामोगुरुश्चेति प्लुतश्चेति यथाक्रमम् ॥ ६६९ ॥

सप्ताङ्गानि क्रमात्ताळे ज्ञातव्यानिसदाबुधैः ।
अणुद्रुतो वातजातो द्रुतश्च जलसम्भवः ॥ ६७० ॥

---

(1) 11499 अंकितमातृकायां पत्रांते लिखितमेतत् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समीरजलसम्भूतो दविरामोहि कथ्यते ॥ ६७१ ॥

लघुरग्निभवः प्रोक्तो लविरामोजलाग्निना ।
गुरु राकाशसम्भूतो दीप्तो धरणिसम्भवः ॥ ६७२ ॥

अणुद्रुते चन्द्रदेवः द्रुते शम्भुर्विधीयते ।
दविरामे कुमारःस्यात् लघौ देवी स्मृताबुधैः ॥ ॥ ६७३ ॥

लविरामे स्मृतो जीवो गुरौ गौरीयुतश्शिवः ।
दीप्तेत्रयो विरिञ्चाद्या देवतामुनिभिः स्मृताः ॥ ६७४ ॥

तित्तिरिश्चटकश्चैव बकश्चाषश्च कोकिलः ।
वायसः कुक्कुटश्चैव क्रमादुच्चारयन्त्यमी ॥ ६७५ ॥

अण्वाद्यक्षरकै ज्ञेयाः सन्तिसंज्ञान्तराण्यपि ।
अणुद्रुत श्चार्धचन्द्रः करजश्चार्धबिन्दुकम् ॥ ६७६ ॥

अर्धद्रुतञ्चाणुसंज्ञं अङ्कुशश्च धनुः क्रमात् ।
अणावेतानि नामानि कथितानि विपश्चिता ॥ ६७७ ॥

बिन्दुकं व्यञ्जनंशून्यं द्रुद्रुतं चार्धमात्रकम् ।
सुवृत्तञ्च तथाज्ञेयं आकाशञ्च तथोत्तमम् ॥ ६७८ ॥

खं कूपं वलयं ज्ञेयं द्रुते नामान्यनुक्रमात् ।
व्यापकः सरलो ह्रस्वः शरोदण्डोलमात्रिकः ॥ ६७९ ॥

[2] द्यौर्लमेरुरिमाः संज्ञाः बाणाख्याः शास्त्रसंमताः ।
दीर्घोवक्रोद्विमात्रस्स्यात् पूज्योगोथकलाभिधः ॥ ६८० ॥

---

2. 'लघोर्मेरुरिमाः' इतिचपाठः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

केयूरनूपुरौ हार स्ताटङ्कः कङ्कणोगुरुः ।
गुरोश्चयानि नामानि गुरुत्वात्तान्यपि ध्रुवम् ॥ ६८१ ॥

त्रिमात्रस्सामजं शृङ्गीप्लुतोदीप्तः प्लुतोभवेत् ।
त्र्यङ्गसामोद्भवं ज्ञेयं तारस्थानं प्लुते मतम् ॥ ६८२ ॥

अणुद्रुतं चातिसूक्ष्मघाते योज्यं विचक्षणैः ।
सूक्ष्मघाते द्रुतं पूर्णघाते लघुरिहोदितः ॥ ६८३ ॥

घातक्षेपो गुरुर्ज्ञेयो दीप्ते घातात्करभ्रमः[3] ।

3. अस्य पाठांतमरपि दृश्यते । तद्यथा । :—
अत्यल्पघातेऽणुर्ज्ञेयः सूक्ष्मघाते द्रुतोमतः । पूर्णघाते लघुः प्रोक्तो घातक्षेपौ गुरुर्मतः ॥ घातात्करभ्रमोयत्र प्लुतोज्ञेयोविचक्षणैः । इति

सार्धत्रिषट्द्वादशाष्टादशैर्वाद्योन्तरेङ्गुलैः ॥ ६८४ ॥

अर्धद्रुतो द्रुतलघुगुरुप्लुत इति क्रमात् ।
पञ्चलघ्वक्षरोच्चारमिता मात्रेह कथ्यते ॥ ६८५ ॥

अनया मात्रयात्रस्या लघुगुर्वादिकल्पना ।
एकमात्रोलघुः प्रोक्तो द्विमात्रोगुरु रुच्यते ॥ ६८६ ॥

त्रिमात्रस्तु प्लुतोज्ञेयो मात्रार्धं च द्रुतोमतः ।
द्रुतार्धमणुरेकःस्यात्प्रमाणं कथितं बुधैः ॥ ६८७ ॥

इहद्रुतमितिर्नोक्ता मार्गताळेष्वभावतः ।
देशीतालेषु विज्ञेया लघोरेव प्रमाणता ॥ ६८८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्रुते विरामेणुर्ज्ञेयः लविरामे द्रुतो मतः ।
द्रुतोपरियदारेखा दविराम स्तदाभवेत् ॥ ६८९ ॥

लघूपरियदामात्रा (रेखा ?) लविरामः प्रकीर्तितः
एवं कालप्रमाणं स्यादङ्गानां तद्विचारयेत् ॥ ६९० ॥

विरामे तु विचारोयं कर्तव्यस्तालधारिभिः ।

इत्यङ्गानि । चतुर्थः प्राणः ।

(668—690) The 4th prana of Tala —' Anga '
668—690) தாளத்தின் நான்காவது பிராணமாகிய ' அங்கம் '

समोऽतीतोऽनागतश्च विषमश्च ग्रहामत्ताः ॥ ६९१ ॥

चत्वारः कथितास्ताळे सूक्ष्मदृष्ट्या विचक्षणैः ।
गीतादिसमकालस्तु समपाणिः समग्रहः ॥ ६९२ ॥

गीतादौ विहितेपश्चात् तालवृत्तिर्विधीयते ।
अतीताख्यो ग्रहोज्ञेयः सोवपाणिरितिस्मृतः ॥ ६९३ ॥

पूर्वं तालप्रवृत्तिः स्यात्पश्चाद्गीतादिरुच्यते ।
अनागतः सविज्ञेयः सएवोपरिपाणिकः[1] ॥ ६९४ ॥

आद्यन्तयोरनियमः विषमग्रहशब्दभाक् ।
तालोवितालोनुतालः प्रतितालश्चतुर्विधः ॥ ६९५ ॥

समग्रहो भवेत्तालो वितालोतीतकः स्मृतः ।
अनागतोनुतालः स्याद्विषमः प्रतितालकः ॥ ६९६ ॥

---

1. अतीतानगतग्रहलक्षणं एतत् संगीतरत्नाकरादि ग्रन्थस्थात् संप्रदाया गताच्च भिद्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आदिमध्यावसानेषु प्रयोगं सूक्ष्ममाचरेत् ।

इति ग्रहाः पञ्चमः प्राणः ।

(691--697) The 5th prana of Tala — 'Graha'
(சு-691—697) தாளத்தின் ஐந்தாவது பிராணமாகிய 'க்ரஹம்'

चतुरश्रस्तथात्र्यश्रः खण्डोमिश्रस्तथैव च ॥ ६९७ ॥

सङ्कीर्णः पञ्च विज्ञेया जातयः पञ्चधा बुधैः ।
चतुर्वर्णै स्त्रिभिर्वर्णैः पञ्चवर्णैस्तथैव च ॥ ६९८ ॥

सप्तवर्णैश्च नवभिः जातयः क्रमशः स्मृताः ।
तथैव मात्राविज्ञेया क्रमशस्तालवेदिभिः ॥ ६९९ ॥

ब्राह्मण श्चतुरस्त्रः स्यात् तिस्त्रः क्षत्रिय एवच ॥ ७०० ॥

खण्डोवैश्य स्तथाशूद्रः मिश्रोज्ञेयो विचक्षणैः ।
संकीर्णजातिस्संकीर्णः कथितास्ताळवेदिभिः ॥ ७०१ ॥

(698—701) The 6th prana of Tala 'Jati'
(ச-698—701) தாளத்தின் ஆருவது ப்ராணமாகிய 'ஜாதி'

इति जातयः षष्ठः प्राणः ।

द्विगुणद्विगुणौज्ञेयौ लक्ष्यदृष्ट्याविचक्षणैः ।
ध्रुवका सर्पिणी कृष्या पद्मिनी च विसर्जिता ।
विक्षिप्ताख्या पताकाच मात्रास्या त्पतिताष्टमी ॥ ७०२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सशब्दाच ध्रुवाज्ञेया सर्पिणी वामगामिनी ।
कृष्या दक्षिणतः पातात पद्मिनीस्यादधोगता ॥ ७०३ ॥

विसर्जिता बहिर्याता विक्षिप्ताकुञ्चनात्मिका ।
पताकातूर्ध्वगमना स्पतिता करपातनात् ॥ ७०४ ॥

ध्रुवपाते प्रयोज्यास्ता नावापादौ कदाचन ।
लघौतु ध्रुवकाज्ञेया ध्रुवकापतितापुनः ॥ ७०५ ॥

गुरौ प्लुते क्रमादृज्ञेया ध्रुवकासर्पिणी तथा ।
कृष्याच कथिता तज्ज्ञैस्तिस्र एतामनीषिभिः ॥ ७०६ ॥

(701—706) The 7th prana of Tala '— Kala'
(ஃ-701—706) காலத்தின் ஏழாவது பிராணம் 'கலா'

इति कलाः सप्तमप्राणः ।

क्रियानन्तरविश्रान्तिर्लयस्स त्रिविधोमतः ।
द्रुतोमध्योविलम्बश्च द्रुतः शीघ्रतमोमतः ॥ ७०७ ॥

द्विगुणद्विगुणौज्ञेयौ तस्मान्मध्यविलम्बितौ ।
मार्गभेदाच्चिरक्षिप्रमध्यभावोप्यनेकधा ॥ ७०८ ॥

लयोक्षरेपदेवाक्ये योसौ चात्रोपयुज्यते ।
तथाच प्रतिभाविलासः । कोलामलकबिल्वञ्चक्रमेण लययोजनम् ॥

मन्दोप्यमन्दागतय स्तालादीनां विचारयेत् ।

इति लय अष्टमः प्राणः ।

लयप्रवृत्तिनियमो यतिरित्यभिधीयते ॥ ७१० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(707—710) The 8th Prana of Tala —'Laya'
(சு-707—710) தாளத்தின் எட்டாவது பிராணனாகிய 'லயம்'

इति लयाः । अष्टमःप्राणः ॥

समा स्रोतोगता चान्या मृदङ्गाच प्रकीर्तिता ।
पिपीलिकाच गोपुच्छा यतयः पञ्चधा स्मृताः ॥ ७११ ॥

आदिमध्यावसानेषु लयैकत्वे समा त्रिधा ।
लयत्रैध्यादादिमध्यावसानेषु यथा क्रमात् ॥ ७१२ ॥

चिरमध्यद्रुतलया तदास्रोतोगता मता ।
अन्या विलम्बमध्याभ्यां मध्यद्रुतवती परा ॥ ७१३ ॥

मृदङ्गास्याद् द्रुताद्यन्ता मध्यतश्चविलम्बभाक् ।
अपरास्यात् द्रुताद्यन्ता मध्येमध्यलयान्विता ॥ ७१४ ॥

अन्या विलम्बमध्यातु मध्याद्यन्ता तथामता ।
स्यादाद्यंतविलम्बातु द्रुतमध्या पिपीलिका ॥ ७१५ ॥

अपराभवेदाद्यन्तमध्या मध्यद्रुता परा ।
आद्यन्तयो र्विलम्बः स्यात् मध्ये मध्यलयान्विता ॥ ७१६ ॥

द्रुतमध्यविलम्बास्यात् गोपुच्छा द्रुतमध्यभाक् ।
द्वितीयान्याभवेन्मध्यविलम्बितलयान्विता ॥ ७१७ ॥

(710—716) The 9th prana of Tala — 'Yati'
(சு-710—716) தாளத்தின் ஒன்பதாவது பிராணனாகிய 'யதி'

इति यतयः ॥ नवमः प्राणः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अङ्गादिकानां लिखनं प्रस्तार स्सोभिधीयते ।

इति प्रस्तारः । दशमः प्राणः ।

(710—718) Tne 10th prana of Tala, —'prastara'
(சு.710—718) தாளத்தின் பத்தாவது ப்ராணமாகிய 'பிரஸ்தாரம்'

तत्र प्रथमं मार्गताला उच्यंते ।

तथाचरत्नाकरः । यथाक्षरश्चद्विकलः चतुष्कल इति त्रिधा ।
चच्चत्पुटश्चाचपुटः षट्पितापुत्रकस्तथा ॥ ७१८ ॥

संपक्वेष्टाक उद्घट्टोमार्गतालाः प्रकीर्तिताः ।
तालेचच्चत्पुटे ज्ञेयं गुरुद्वंद्वं लघुप्लुतम् ॥ ७१९ ॥

सद्योद्भवः शुक्लवर्णश्चच्चत्पुटोष्टमात्रिकः ॥ ऽ ऽ । ऽे ॥ इति चच्चत्पुटः ।
ताले चाचपुटेज्ञेयो भगणोगुरुरेव च ॥ ७२० ॥

वामदेव मुखाज्जातः षण्मात्रः पीतवर्णकः ॥ ऽ । । ऽ ॥ इति चाचपुटः ।
षट्पितापुत्रकेऽन्यस्तभेदे पल्गुरू लपौ ॥ ७२१ ॥

अघोरमुखसञ्जातः श्यामो द्वादशमात्रिकः ॥ ऽे । ऽ ऽ । ऽे ॥

इति षट्पितापुत्रकः ।

प्लुतो गुरुत्रयंपश्च संपक्वेष्टाकतालके ।
ईशानजो रक्तवर्णो मात्राद्वादशभिर्युतः ॥ ऽे ऽ ऽ ऽ ऽे ॥ इति संपक्वेष्टाकः ।

गुरुत्रयसमायुक्तः उद्घट्टस्सोभिधीयते ।
तत्पूरुषास्यसंभूतोऽनेकवर्णः स्मृतो बुधैः ॥ ऽ ऽ ऽ ॥ इति उद्घट्टः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चतुरश्रस्तथात्र्यश्रः इति तालो द्विधा मतः ।
चच्चत्पुटश्चाचपुट इति नाम्नी तयोः क्रमात् ॥ ७२४ ॥

यथाक्षरश्चद्विकलश्चतुष्कल इति त्रिधा ।
प्रत्येकं तैर्नामगतैः गलैस्तत्र यथाक्षरैः ॥ ७२५ ॥

अयमेककलश्चच्चत्पुटेत्वन्त्यंप्लुतं विदुः ।
गुरुः कलात्तद्विकलेऽष्टावाचेन्यत्र षट्कलाः ॥ ७२६ ॥

चतुष्कलौ तौद्विगुणौ ताळशास्त्रेसुसम्मतौ ।
षट्पितापुत्रकस्त्र्यश्रभेदः सोपि तथात्रिधा ॥ ७२७ ॥

यथाक्षरे विशेषोत्र प्लुतआद्यन्तयोर्भवेत् ।
संपक्केष्टाकोपि भेदः षट्पितापुत्रकस्य च ॥ ७२८ ॥

तद्वद्यथाक्षरः कार्यः प्लुतआद्यन्तयोर्भवेत ।
उद्घट्टोपित्र्यश्रभेदः स प्रस्तारे तथात्रिधा ॥ ७२९ ॥

युग्मश्चच्चत्पुटोज्ञेयो अयुग्मस्त्र्यश्र एव च ।
ओजोपि त्र्यस्र संज्ञःस्यात संज्ञातुकथिता बुधैः ॥ ७३० ॥

उत्तरः पञ्चपाणिश्च षट्पितापुत्रके भवेत् ।

718—730 The angas of the marga talas
சு-718—730 மார்க்க தாளங்களின் அங்கங்கள்.

एषां पातकळायोगं श्रेयसेव्याहरामहे ॥ ७३१ ॥

आद्यवर्णैः पातकळा निश्शङ्कः पर्यभाषत ।
चच्चत्पुटेत्वेककले संशताशा यथा क्रमम् ॥ ७३२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यद्वाशताशता ताल शम्पावाद्विर्भवेदिह ।

॥ ऽ ऽ । डे ॥ ऽ ऽ । डे ॥ ऽ ऽ । डे ॥

सं श ता श ॥ श ता श ता ॥ ता श ता श

इत्येककलः चच्चत्पुटः ॥

अन्त्यं भवेद्‌द्वयं चाचपुटेऽप्यस्तिमुनेर्मतं ।

ऽ । । ऽ ॥ ऽ । । ऽ

श ता श ता ॥ ता श ता श

इत्येककलश्चाचपुटः

उत्तरे संततस्ताळः शतालौद्विरनन्तरम् ॥ ७३४ ॥

डे । ऽ ऽ । डे

सं ता श ता श ता

इत्येककलः षट्पितापुत्रकः ॥

संपक्वेष्टाकस्य कलाः षट्पितापुत्रकोदिताः ।
संनिपातस्तुनास्त्यत्र योनिवद् द्विकलोभवेत् ॥ ७३५ ॥

डे ऽ ऽ ऽ डे ॥

ता श ता श ता ॥

इत्येककलः संपक्वेष्टाकः ॥

उद्घट्टेऽपि सनिष्कामं शंपाद्वंद्वं प्रयोजयेत् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ऽ ऽ ऽ

नि श श

इत्येककल उद्धङ्ः ॥

इति यथाक्षराः पञ्चमार्गताळाः ॥

अथद्विकलादि ।

नि शौ नि ताशप्रनि सं द्विकले युग्मकेमताः ॥ ७३६ ॥

ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ

नि श नि ता श प्र नि सं ।

इति द्विकलश्चच्चत्पुटः ।

नि शौ ताशौ नि समितिज्ञेयाश्चाचपुटे क्रमात् ।

ऽ ऽ ऽ ऽ ऽ ऽ

नि श ता श नि सं

इति द्विकलः चाचपुटः ॥

नि प्रताशनि तानिःश तापनिः सं तथोत्तरे ॥ ७३७ ॥

ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ

नि प्र ता श नि ता नि श ता प्र नि सं ।

इति द्विकलःपट्पितापुत्रकः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्विकला चतुष्कलासंपक्वेष्टाकोद्धट्टयोनिवत् ।

इति द्विकलसंपक्वेष्टाकोद्धट्टौ ॥

अथ चतुष्कलाविधिः कथ्यते ।

आदावधिक आवापे क्षिप्त विक्षेपकांतरे ।
द्विकलापादभागः स्यात् पादभागश्चतुष्कले ॥ ७३८ ॥

इति चतुष्कल पञ्चमार्गतालाः ।

731—738 The kriyas for the marga talas.
சு-731—738 மார்க்கதாளங்களுக்கான கிரியைகள்.

प्रथमे पादभागे स्यात्करांगुल्याकनिष्ठया ।
तयाचाऽनामयाऽन्यत्र ताभ्यां मध्यमयातथा ॥ ७३९ ॥

तृतीयेस्याच्चतसृभिः तुर्येचच्चत्पुटस्यतु ।
ओजस्य पादभागेतु करांगुल्याकनिष्ठया ॥ ७४० ॥

पञ्चपाणौ कनिष्ठादिचतुष्केण कनिष्ठया ।
तर्जन्या च पृथक् पादभागषट्के क्रमात्कला ॥ ७४१ ॥

आवापादिः प्रयोक्तव्यो भाविपातस्थ पाणिना ।
पातयुक्ते पादभागे नाङ्गुल्या क्रियते कला ॥ ७४२ ॥

अन्यद्भेदत्रयं चाचपुटेऽप्यस्ति चतुष्कलात् ।
द्विगुण द्विगुणत्वेन षण्णवत्यधिकं क्रमात् ॥ ७४३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

युग्मस्य ये त्रयोभेदाः षड्वा युग्मस्य कीर्तिताः ।
तेषामन्योन्यसंसर्गात् संकीर्णाबहवो मताः ॥ ७४४ ॥

अन्ये पञ्चैव संकीर्णान् गांधर्वेऽपि जगुर्बुधाः ।
पञ्च सप्त नवापि स्युः दशैकादशतत्कलाः ॥ ७४५ ॥

तालाश्चत्वार इत्यन्ये चतुर्दशकलादिकाः ।
चच्चत्पुटादिभेदैस्तु सन्ति खण्डाभिधाः परे ॥ ७४६ ॥

त एव सालगा ज्ञेयाः प्रसिद्ध्यालक्ष्यवर्त्मनि ।
देशीतालप्रपञ्चेन तानपि व्याहरामहे ॥ ७४७ ॥

एतैः प्रकरणाख्यानि तालैर्यानिजगु र्बुधाः ।
तेषां तु प्रथमं ज्ञेयं मद्रकं ताल मुत्तमम् ॥ ७४८ ॥

अपरान्तं द्वितीयं स्यात् उल्लोप्यं च ततः परम् ।
छन्दकासारिते वर्धमानकं पाणिकं तथा ।
ऋचो गाथाश्च सामानि मिलितानि चतुर्दश ॥ ७९० ॥

मोक्षस्य साधनान्येव प्रयोज्यानि शिवस्तुतौ ।
लक्ष्यप्रयोजनाभावात् नप्रोक्तानि यतस्ततः ॥ ७९१ ॥

इति मार्गतालप्रकरणं समाप्तम् ।

738—751 Other varieties of marga talas known as 'salages' and 'Sankirnas'

738—751 'சாலகம்' 'ஸங்கீர்ணம்' என்ற பலவகை மார்க்க தாளங்கள்.

अथ देशीताल प्रकरणम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीकीर्तिविजयानन्दं पार्वतीलोचनोत्सवम् ।
राजचूडामणिं नत्वा तालं देशींगतं ब्रुवे ॥ ७५२ ॥

देशीतालस्तुलघ्वादिमितया क्रिययामितः ।
यथाशोभं कांस्य तालध्वननादिकया मतः ॥ ७५३ ॥

पञ्चलघ्वक्षरोच्चारमिता मात्रेह कथ्यते ।
अनया मात्रयात्रस्यात् लघुगुर्वादिकल्पना ॥ ७५४ ॥

देशीतालेऽधिकाक्वापि यथाशोभं विधीयते ।
ग्रहणे मोक्षणे चैव लघोरेव प्रधानता ॥ ७५५ ॥

अत उक्तं लघो मानं त्यक्त्वा द्रुतगुरुप्लुतान् ।
द्रुतात्मकोऽपि तालः स्यात् लघुः कृत्यविधिर्मतः ॥ ७५६ ॥

ग्रहमोक्षान्वितः स्वेच्छावृत्तिरत्रविधीयते ।
तालः प्राणात्मकः प्रोक्तः सङ्गीताख्य शरीरिणः ॥ ७५७ ॥

तस्मात्सर्वप्रयत्नेन गीतादौ कालशोधनम् ।
सर्वेषामेव तालानां आदिगोयं लघुःस्मृतः ॥ ७५८ ॥

नामभेदेपिसन्त्यत्र समरूपास्त्वनेकशः ।
ताळास्तेषु रहस्यं यत् तद्वदामो निशम्यताम् ॥ ७५९ ॥

कालमानात्मनोभेदा द्भेदस्तेषु[1] विनिश्चित ।
नामभेदो मुनेरिष्टस्तत्तद्विधिविधानतः ॥ ७६० ॥

---

1. तेष्वविनिश्चितः इति 11499 अङ्कितमातृकायां पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

केचिदत्र विरामान्ता स्तालास्तेष्वस्तिसंशयः ।
किंरूपं सविरामस्य कःकालश्च क्रियास्तिका ॥ ७६१ ॥

तत्रोच्यते मया सम्यक् समाधानाय धीमताम् ।
रूपं नास्त्यपरूपत्वात् स्वातन्त्र्यान्नैव कालभाक् ॥ ७६२ ॥

अक्रियत्वात्क्रियाचापि तस्यशम्भुस्वरूपिणः ।
ससिद्धः शम्भुवत्किन्तुद्रुतलध्वंतगो भवेत् ॥ ७६३ ॥

यद्यदन्तर्गतः किन्तु तत्तदर्धप्रमाणभाक् ।
गुर्वादेश्चतुरस्रादेः खण्डयित्वानिवेशितः ॥ ७६४ ॥

यद्वा लघ्वादि खण्डानां आधिक्यमिह दृश्यते ।
तेनैषां खण्डतालत्वमभाषन्त पुरातनाः ॥ ७६५ ॥

द्रुतादिरचनाभेदात्तालभेदोप्यनेकधा ।
(गजलीलो हंसलीलो वर्णभिन्नस्त्रिभिन्नकः ।)

752—766 General Principles of Desi Talas.
752—766 தேசி தாளங்களைப்பற்றிய பொது விதிகள்.

तालानामधुनातेषामुद्देशं संगिरामहे ॥ ७६६ ॥

तथाच रत्नाकरः । आदितालो द्वितीयश्च तृतीयश्च चतुर्थकः ।
पञ्चमो निश्शङ्कलीलो दर्पणः सिंहविक्रमः ॥ ७६७ ॥

रतिलीलः सिंहलीलः कंदर्पो वीरविक्रमः ।
रङ्गश्रीरङ्गचच्चर्यः प्रत्यंगोयतिलग्नकः ॥ ७६८ ॥

गजलीलो हंसलीलः वर्णभिन्नस्त्रिभिन्नकः ।
राजचूडामणी रङ्गद्योतो रङ्ग प्रदीपकः ॥ ७६९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजतालो वर्णताल: सिह्मविक्रीडितोजय: ।
वनमाली हंसनाद: सिह्मनाद: कुडुक्कक: ॥ ७७० ॥

तुरङ्गलील: शरभलील: स्यात्सिह्मनन्दन: ।
त्रिभङ्गी रङ्गाभरणौ मण्ठक: कोकिलप्रिय: ॥ ७७१ ॥

निस्सारुकोराजविद्याधरश्च जयमङ्गल: ।
मल्लिकामोदविजयानन्दौ क्रीडाजयश्रियौ ॥ ७७२ ॥

मकरन्द: कीर्तिताल: श्रीकीर्ति: प्रतितालक: ।
विजयो विन्दुमालीच समनन्दनमण्ठिका ॥ ७७३ ॥

अभिनन्दो नन्दनान्दी मल्ल कंकालकन्दुका: ।
एकतालीच कुमुद: चतुस्तालीच डोम्बुली ॥ ७७४ ॥

[1]दीपको तीक्ष्णको ढेङ्की विषमोवर्णमण्ठिका ।
अभङ्गो रायवेङ्कालो वसन्तोलघुशेखर: ॥ ७७५ ॥

प्रतापशेखरो झंपा [2]गजझंपश्चतुर्मुख: ।
मदन: प्रतिमण्ठश्च पार्वतीलोचनोरति: ॥ ७७६ ॥

लीलाकरण यत्याख्यो ललितो गारुगिस्तथा ।
राजनारायणाख्यश्च लक्ष्मीशो ललितप्रिय: ॥ ७७७ ॥

श्रीनन्दनश्च जनको वर्धनो रागवर्धन: ।
षट्तालश्चान्तरक्रीडा हंसोत्सवविलोकित: ॥ ७७८ ॥

गजोवर्णयति: सिह्म: करण: सारसस्तथा ।

1. 11499 अंकित मातृकायां एषोर्धो नदृश्यते । 2. जगझंपा इति वा पाठ: ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चण्डतालश्चन्द्रकला लयस्कन्धा द्रुतालिका ॥ ७७९ ॥

[1]घत्ता द्वंद्वमुकुन्दौच कुविन्दश्च कलध्वनिः ।
गौरी सरस्वती कण्ठाभरणो भग्नसंज्ञकः ॥ ७८० ॥

राजतालो मृगाङ्कश्च राजमार्ताण्डसंज्ञकः ।
निश्शङ्कश्शार्ङ्गदेवश्चेत्येते सोढलसूनुना ॥ ७८१ ॥

देशीतालास्समादिष्टा विंशत्यभ्यधिकं शतम् ।

766—781 Desi talas described in Sangita Ratnakara 120 in number.

(சு-766—781) சங்கீத ரத்னாகரத்திலுள்ள 120 தேசிதாளங்கள்.

। अथ मतान्तरे ।

अतोपि कतिचित्सन्ति देशीतालविशेषतः ॥ ७८२ ॥

प्रसिद्धालोकमार्गेषु कथ्यन्तेऽत्र नविस्तरात् ।
चित्रतालः कन्दुकश्च इडावान्सन्निपातकः ॥ ७८३ ॥

ब्रह्मतालश्चतुस्तालः कुम्भतालस्तथैव च ।
लक्ष्मी तालश्चार्जुनश्च कुण्डनाची ततः परम् ॥ ७८४ ॥

[2]सन्निश्चापि महा[2]सन्निः यतिशेखरसंज्ञकः ।
कल्याणपञ्चघातौच चण्डतालो द्रुतालिका ॥ ७८५ ॥

[3]जगणोमण्ठकंश्चैव एकताली ततः परम् ।
यतितालः सञ्चतालः तथाज्ञेयाष्टतालिका ॥ ७८६ ॥

---

1. 'मन्ता' इति 11499 अंकित मातृकायां पाठः ।
2. 'संनिः', 'महासंनिः' इति वापाठः ।
3. अयं श्लोकः 11499 अङ्कितमातृकायां नदृश्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृथ्वी कुण्डलिकाज्ञेया पातालकुण्डली तथा ।
नीलोझोंपडकश्चेति [4]उद्घमस्तु ततः परम् ॥ ७८७ ॥

स्वर्णमेरुश्चक्रताळः चक्रमण्ठस्ततः परम् ।
कुल्लुरश्चाशेषताळः संयोगश्चतुरश्चकः ॥ ७८८ ॥

विद्याधरो मण्ठकश्च मन्मथोहंससूनुकः ॥ ७८९ ॥

शरभलीलो निश्शङ्को यूपोविष्णुर्मतान्तरे ।
कङ्कालरतिताळौ च महाचित्रतरः स्मृतः ॥ ७४० ॥

चित्रावर्तस्तुल्लताल: परिवर्तविवर्तनौ ।
अभङ्गशेखरोहंसो मृगाङ्कः कुमुदस्तथा ॥ ७९१ ॥

कलकण्ठश्चित्रपुटः [5]सुदेवत्सस्ततः परम् ।
उत्सवो विजयश्चैव पद्माख्यश्च सुदर्शनः ॥ ७९२ ॥

द्विसप्ततिरिमे ताळाः कथितालक्ष्यदृष्टितः ।
अतः परं प्रवक्ष्यामि द्वात्रिंशन्मण्ठिकास्तथा ॥ ६९३ ॥

विजयस्सालगश्चैव प्रथमस्सरसस्तथा ।
कीलकः पदिमण्ठश्चरविचक्रौ तथोदितौ ॥ ७९४ ॥

विराजमण्ठकश्चैव धनञ्जयजयप्रियौ ।
श्रीरङ्गो रङ्गमण्ठश्च षण्मण्ठक इतीरितः ॥ ७९९ ॥

गीर्वाणमण्ठकश्चैव विचारप्रतिमण्ठकः ।
कल्याणमण्ठकमलौ विशालो वल्लभस्तथा ॥ ७९६ ॥

4. 'मुद्गमस्तु' इति च पाठः । 5. वासुदेवः इति च पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनर्भूश्च कलापश्च चित्रमण्ठस्ततः परम् ।
तारास्य प्रतिमण्ठश्च मुद्रितश्चकलापकः ॥ ७९७ ॥
वर्णो गम्भीरमण्ठश्च श्रीरङ्गोभिन्नमण्ठकः ।
कल्याणमण्ठकश्चैव सङ्कीर्णमण्ठकः परः ।
शतद्वयमिति प्रोक्तं चतुर्विंशतिसंयुतम् ॥ ७९८ ॥

781—798 Other talas according to other authorities
(சு-781—798) மற்ற நூல்களில் கண்ட தாளங்கள்.

ताळानां लक्षणं वक्ष्ये तेषां भूरिमताश्रितम् ।
[I]तथाच रत्नाकरः । लध्वादि तालो लोकेसौ रासइत्याभिधीते ॥
॥ । ॥ इति आदितालः ।
द्वौ लौ प्रोक्तौ द्वितीयकः ॥ ००। ॥ इति द्वितीयकः ।
द्रुत द्रुतौ विरामान्तौ तृतीयं चप्रचक्षते ॥ ० ० ०̆ ॥
इति तृतीयः ।
लघुद्वंद्वं द्रुतश्चैकश्चतुर्थं चप्रचक्षते ॥ ।। ० ॥ इति चतुर्थः ।
ताळेपञ्चमके प्रोक्तद्रुतद्वंद्वं मनोरमम् ॥ ०० ॥ इति पञ्चमः ।

---

1. 11499 अङ्कितमातृकायां ताळक्षलणारंभे कति चनाधिक श्लोकावर्तते । तेयथा :—अथदेशीताळा उच्यन्ते ।

अणुद्रुतो भवेद्यत्रचित्रताळः प्रकीर्तितः ॥ ◡ ॥ इति चित्रताळः ॥
द्रुतेनत्वेकताळी स्यात्कथिता भरतादिभिः ॥ ० ॥ इत्येकताळी ॥
विरामान्तद्रुतेनैव कम्मकः परिकीर्तितः ॥ ०̆ ॥ इति कम्मकः ॥
' लध्वादिताळोलोकेऽसौ ' इति श्लोकात्परं एताः श्लोकाश्चदृश्यन्ते । :—
लविरामश्च विज्ञेयो लघुशेखर संज्ञकः ॥ ।̆ ॥ इति लघुशेखरः ॥
पूज्यमेकं भवेद्यत्र करुणस्सतुकथ्यते ॥ ऽ ॥ इति करुणः ॥
प्लुतमेकं भवेद्यत्र सन्निपातस्स उच्यते ।
अयमेव बुधैः कैश्चित् पडिम्म इति कीर्तितं ॥ ऽ̆ ॥
इति सन्निपातः । पडिम्मश्च ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ताळे निश्शंकलीलाख्ये प्लुतौ द्वौ गद्वयंलघुः ।

॥ ड़े ड़े ऽ ऽ । ॥ इति निश्शंकलीलः

दर्पणे दद्वयंगश्च,

॥ 0 0 ऽ ॥ इति दर्पणः ।

सिंह्मविक्रमसंज्ञके ॥

गत्रयं लपलोगः पो

॥ ऽ ऽ ऽ । ड़े । ऽ ड़े ॥ इति सिंह्मविक्रमः ।

रतिलीले लघूगुरू ।

: । । ऽ ऽ ॥ इति रतिलीलः

लध्वन्तेद्त्रयं सिंह्मलीले

॥ । 0 0 0 ॥ इति सिंहलीलः

दौयगण स्तथा ।

कन्दर्पतालस्त स्यैव पर्यायस्या त्परिक्रमः ॥

॥ 0 0 । ऽ ऽ ॥ इति कन्दर्पतालः । परिक्रमश्च

लघुद्रुतद्वयं चान्ते गुरुः स्याद्वीरविक्रमे ।

॥ । 0 0 ऽ ॥ इति वीरविक्रमः

रङ्गश्चतुर्द्रुतोगश्च-

॥ 0 0 0 0 ऽ ॥ इति रङ्गतालः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीरङ्गस्सगणाल्लपौ ।

॥ ॥ ऽ । ङे ॥ इति श्रीरङ्गः

विरामान्तद्रुतद्वंद्वा न्यष्टौलघुचचर्चरी ।

० ०़ ० ०़ ० ०़ ० ०़ ० ०़ ० ०़ ० ०़ ० ०़ । ॥

अथवा—

॥ ० ०़ । ० ०़ । ० ०़ । ० ०़ । ० ०़ । ० ०़ । ० ०़ । ० ०़ । ॥

इति चर्चरी

प्रत्यङ्गे मगणोलौद्रौ

॥ ऽ ऽ ऽ । । ॥ इति प्रत्यङ्गः

यतिलग्नो द्रुतोलघुः

॥ ० । ॥ इति यतिलग्नः

गजलीलो विरामान्त मुक्तं लघुचतुष्टयम् ।

॥ । । । ।़ ॥ इति गजलीलः

हंसलीलो विरामान्तं लघुद्वयमुदाहृतम् ।

॥ । ।़ ॥ इति हंसलीलः

वर्णभिन्नो द्रुतौ लोगः

॥ ० ० । ऽ ॥ इति वर्णभिन्नः

त्रिभिन्ने लगुरुप्लुताः ।

॥ । ऽ ङे ॥ इति त्रिभिन्नः

राजचूडामणिर्दौद्वौ नगणश्चद्रुतौ लगौ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ 0 0 । । । 0 0 । ऽ ॥ इति राजचूडामणिः

मगणो लप्लुतौ रङ्गोद्योतो-

॥ ऽ ऽ ऽ । ङे ॥ इति रङ्गोद्योतः

रङ्गप्रदीपकः ।

तो गप्लुतौ

॥ ऽ ऽ । ऽ ङे ॥ इति रङ्गप्रदीपकः

-राजतालो गपौ दौ च गलौ प्लुतः ।

॥ ऽ ङे 0 0 ऽ । ङे ॥ इति राजतालः

त्र्यश्रो मिश्रो द्विधावर्णस्त्र्यस्रो लौ दौ लघुद्वयम् ।

॥ । । 0 0 । । ॥ इति त्र्यस्रवर्णः

मिश्रे द्रुतचतुष्काः स्युः विरामान्तास्त्रयः पृथक् ।

ततः पगौ दौ गलौ गः—

॥ 0000̀ 0000̀ 0000̀ 0000̀ ङे ऽ00 ऽ । ऽ ॥

॥ इति मिश्रवर्णः

-चतुरस्रोऽपि दृश्यते ।

गलौ द्रुतौ गुरुश्चेति-

॥ ऽ । 0 0 ऽ ॥ इति चतुरस्रवर्णः

सिंह विक्रीडिते पुनः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लपौ गलौ पगौ लाद्रः पलौ पश्च-

॥ । ऽे ऽ । ऽे ऽ । ऽ ऽे । ऽे ॥ इति सिंह विक्रीडितः

जये पुनः ।

जोलघूद्रौ द्रुतौ पश्च-

॥ । ऽ । । । ० ० ऽे ॥ इति जयतालः

वनमाली चतुर्द्रुती ।

लघुर्दौद्रौ गुरुरिति-

॥ ० ० ० ० । ० ० ऽ ॥ इति वनमाली

लप्लुतौ द्रौद्रुतौप्लुतः ।

हंसनादः-

॥ । ऽे ० ० ऽे ॥ इति हंसनादः

-सिंहनादो यगणश्चलघुर्गुरुः

॥ । ऽ ऽ । ऽ ॥ इति सिंहनादः

कुडुक्केद्रौद्रुतौलौद्रौ-

॥ ० ० । । ॥ इति कुडुक्कः

विरामान्तद्रुतद्वयात् ।

द्रुतौ तुरगलीलः स्यात्-

॥ ० ० ० ० ॥ इति तुरगलीलः

भवेच्छरभलीलकः ।

लौद्रौ चतुर्द्रुतीलौद्रौ-

॥ । । ० ० ० ० । । ॥ इति शरभलीलकः

सिंहनन्दनकः पुनः ।

तपौ लगौ द्रुतौ गौलः पलपा गोलघूततः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चत्वारोलघवोऽशब्दाः-

॥ ऽ ऽ । डे । ऽ O O ऽ ऽ । डे । डे ऽ । । ᒥ ᒥ ᒥ ᒥ ॥

इति सिंहनन्दनः ।

त्रिभङ्गीसगणाद्गुरुः ।

॥ । । ऽ ऽ ॥ इति त्रिभङ्गी

रङ्गाभरणतालेताल्लप्लुतौ-

॥ ऽ ऽ । । डे ॥ इति रङ्गाभरणः

मण्ठके पुनः ।

साच्चतुर्लघुनिश्शब्दं-

॥ । । ऽ ᒥ ᒥ ᒥ ᒥ ॥ इति मंठः

(यद्वाभाद्गावशब्दकौ ।)[2]

॥ ऽ । । ऽ । । ऽ । । ॥ इति वा मंठः

(भाच्चतुर्लघु निश्शब्दं))[2] भवेन्मुद्रितमंठके ॥

॥ ऽ । । ᒥ ᒥ ᒥ ᒥ ॥ इति मुद्रितमंठकः

मंठो नजौ लघुर्यद्वा-

॥ । । । । ऽ । । ॥ इति वा मंठः

प्रोक्ताः षडपराभिधाः ।

मंठरूपकवेलायां

इति दशविधो मंठः

2. धनुश्चिह्नान्तर्गतः अयंभागः संगीतरत्नाकरात् उद्धृतः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कोकिलाप्रियनाम्नितु ।

गलपाः स्युः-

॥ ऽ । ऽे ॥ इति कोकिलप्रियः

-विरामान्तौलघूनिस्सारुकोभवेत् ।

॥ । ॊ ॥ इति निस्सारुकः

लघुर्गुरुर्द्रुतद्वंद्वं राजविद्याधरोभवेत् ।

॥ । ऽ ० ० ॥ इति राजविद्याधरः

सगण द्वितयं यत्र सतालोजयमंगलः ।

॥ । । ऽ । । ऽ ॥ इति जयमंगलः

मल्लिकामोदतालेतुलौद्वौ द्रुतचतुष्टयम् ।

॥ । । ० ० ० ० ॥ इति मल्लिकामोदः

विजयानन्दतालेतु लघुद्वंद्व गुरुत्रयम्-

॥ । । ऽ ऽ ऽ ॥ इति विजयानन्दः

क्रीडाद्रुतौ विरामान्तौ चण्डनिस्सारुकश्चसः ।

॥ ० ० ॥ इति क्रीडातालः चण्डनिस्सारुकश्च

जयश्रीरगणोलोगः

॥ ऽ । ऽ । ऽ ॥ इति जयश्रीतालः

दौ लौ लो मकरंदकः

॥ ० ० । । । ॥ इति मकरंदतालः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लपौ गलौ प्लुतः कीर्तिः-

॥ । ऽे ऽ । ऽे ॥ इति कीर्तिताल:

श्रीकीर्तिर्द्रौगुरूलघू ।

॥ ऽ ऽ । । ॥ इति श्रीकीर्तिताल:

लोद्रुतौप्रतिताल: स्यात्-

॥ । 0 0 ॥ इति प्रतिताल:

विजयेपगपालघुः ।

॥ ऽे ऽ ऽे । ॥ इति विजयताल:

गुर्वोर्मध्येतु चत्वारोबिंदवो बिन्दुमालिनी ।

॥ ऽ 0 0 0 0 ऽ ॥ इति बिन्दुमालिनी

समे लौ दौ विरामान्तौ-

॥ । । 0 ȯ ॥ इति समताल:

लघुर्दौ पश्चनन्दने

॥ । 0 0 ऽे ॥ इति नन्दनताल:

गुरुद्रुतप्लुतैः प्रोक्ता मंठिका

॥ ऽ 0 ऽे ॥ इति मंठिकाताल:

अन्यैर्लघुद्वयम् ।

॥ । । ॥ इतिवा मंठिकाताल:

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विरामादिद्रुतौद्वौच मंठिकापरिकीर्तिता ।

॥ ό ο ॥ इत्यपि मंठिकातालः

दीपको द ल गा द्वि द्विः

॥ ० ० । । ऽ ऽ ॥ इति दीपकतालः

लौ द्वौ गुरुरुदीक्षणः ।

॥ । । ऽ ॥ इति उदीक्षणतालः

रगणो ढेङ्किका कैश्चित् एष प्रोक्तस्तु योजनः ।

॥ ऽ । ऽ ॥ इति ढेङ्किकातालः । योजनश्च ।

द्विचत्वारो विरामान्ता द्रुतास्तुविषमे मताः ।

॥ ० ० ० ό ० ० ० ό ॥ इति विषमः ।

द्वौ लौ द्वौ दौ लघुर्दौ द्वौ कीर्तिता वर्णमण्ठिका ।

॥ । । ० ० । ० ० ॥ इति वर्णमण्ठिका ।

अभिनन्दो लघुद्वंद्वं द्रुतयुग्मं गुरुस्तथा ।

॥ । । ० ० ऽ ॥ इति अभिनन्दनः ।

लप्लुतौ [1]मगणोऽनङ्गः

॥ । ङे ऽ ऽ ऽ ॥ इत्यनङ्गः ।

1. 'सगणः' इति रत्नाकरे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नान्दी लो दौ लघूगुरू ।

॥ । O O । । ऽ ऽ ॥ इति नान्दी

मल्लतालो विरामान्तद्विबिन्दुश्च चतुर्लघोः ।

॥ । । । । O O̍ ॥ इति मल्लतालः

उक्तश्चतुर्धाकङ्कालः पूर्णः खण्डः समोऽसमः ।

चतुर्द्रुती गलौ पूर्णः

॥ O O O O ऽ । ॥ इति पूर्णकङ्कालः ।

खण्डो दौ द्वौ गुरुद्वयं ।

॥ O O ऽ ऽ ॥ इति खण्डकङ्कालः ।

समे गुरूद्वौ लध्वन्तौ

॥ ऽ ऽ । । ॥ इति समकङ्कालः ।

विषमे लाद्गुरुद्वयं ।

॥ । ऽ ऽ ॥ इति विषमकङ्कालः ।

इति चतुर्धा कङ्कालः ॥

कन्दुके लौ च सगणः

॥ । । । । ऽ ॥ इति कन्दुकः ।

द्रुतेनत्वेकतालिका ।

॥ O ॥ इत्येकतालिका ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुमुदे लाद्द्रुतौ लोग:

॥ । ० ० । ऽ ॥ इति कुमुदः ।

चतुस्ताले गुरोः परे ।

त्रयो द्रुताः

॥ ऽ ० ० ० ॥ इति चतुस्तालः ।

डोंवुली तु द्विलघुः स्याद्विरामवान् ।

॥ । ॊ ॥ इति डोंवुली

अभङ्ग लप्लुतौ

॥ । ऽ̆ ॥ इति अभङ्गः ।

रायवेङ्काले रगणाद्द्रुतौ ।

॥ ऽ । ऽ ० ० ॥ इति रायवेंकालः

वसन्तेन्मौ

॥ । । । ऽ ऽ ऽ ॥ इति वसन्तः

विरामान्तलघुना लघुशेखरः ।

॥ ॊ ॥ इति लघुशेखरः

प्रतापशेखरेदीप्ता द्विरामान्तद्रुतद्वयं ।

॥ ऽ̆ ० ०̆ ॥ इति प्रतापशेखरः

झंपाताळे विरामान्तद्रुतद्वंद्वं लघुस्तथा ।

॥ ० ०̆ । ॥ इति झंपातालः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गजझंपे विरामान्तं गुररोरूर्ध्वं द्रुतत्रयम् ।

॥ ऽ ० ० ० ॥ इति गजझंपः

चतुर्मुखो जप्लुताभ्यां सएवोमानको[1] मतः ।

॥ । ऽ । डे ॥ इति चतुर्मुखः । उमानकश्च ।

दद्वयंगश्चमदनः

॥ ० ० ऽ ॥ इति मदनः

सो भो वा प्रतिमण्ठके ।

(कोल्लकोऽन्यैरयंप्रोक्तः)[2]

॥ । । ऽ ॥ इति प्रतिमण्ठकः । अथवा ॥ ऽ । । ॥

पार्वतीलोचने पुनः ।

मल्पाद्वौ गुरूदौ द्वौ

॥ ऽ ऽ ऽ । डे ऽ ऽ ० ० ॥ इति पार्वतीलोचनः

रतिताळे लघुर्गुरुः ।

॥ । ऽ ॥ इति रतितालः

लीला दलौपः

॥ ० । डे ॥ इति लीलातालः

---

1. 'एवोन्मातृको' इति रत्नाकरे.
2. अयं पादः मातृकासु लुप्तः रत्नाकरादुद्धृत्ययोजितः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

करणयत्यां द्रुतचतुष्टयं ।

॥ 0 0 0 0 ॥ करणयतिः

ललिते द्वौ द्रुतौ लोगः

॥ 0 0 । ऽ ॥ इति ललितः

गारुगिस्तुचतुर्द्रुती ।

विरामान्ताबुधैः प्रोक्ताः

॥ 0 0 0 ό ॥ इति गारुगिः

राजनारायणः पुनः ।

द्रुतौच जगणोवक्रः

॥ 0 0 । ऽ । ऽ ॥ इति राजनारायणः

लक्ष्मीशे तुद्रुतद्वयम् ।

विरामान्तं लप्लुतौच

॥ 0 ό । ऽे ॥ इति लक्ष्मीशः

तालस्तु ललितप्रियः ।

ऊर्ध्वं लघुभ्यां रगणः

॥ । । ऽ । ऽ ॥ इति ललितप्रियः

स्यातां श्रीनन्दने भपौ ।

॥ ऽ । । ऽे ॥ इति श्रीनन्दनः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जनको नयसा वक्रः

॥ । । । । ऽ ऽ । । ऽ ऽ ॥ इति जनकः

वर्धनेद्वौ द्रुतौ लपौ ।

॥ ० ० । ऽे ॥ इति वर्धनः

विरामान्तद्रुतौ ।बंदुस्त्रिमात्रो रागवर्धनः ।

॥ ० ०̆ ०ʼ ऽे ।

द्रुतैः षड्भिस्तु षट् ताळः

॥ ० ० ० ० ० ० ॥ इति षट्ताळः

अन्तरक्रीडातु कथ्यते ।

द्रुतत्रयं विरामान्तं

॥ ० ० ०̆ ॥ इत्यन्तरक्रीडा

हंसेसविरती लघू ।

॥ । ा ॥ इति हंसः

लघुप्लुतावुत्सवः स्यात्

॥ । ऽे ॥ इत्युत्सवः

गो दौ दीप्तो विलोकिते ।

॥ ऽ ० ० ऽे ॥ इति विलोकितः

गजे चतुर्लस्सविरामः

॥ । । । ा ॥ इति गजः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लौ दौ वर्णयति र्भवेत्

॥ । । ० ० ॥ इति वर्णयतिः

सिह्मो ल्दौ लत्रयश्च

॥ । ० । । । ॥ इति सिह्मः

गुरुणाकरुणो मतः ॥

॥ ऽ ॥ इति करुणः

लघुर्द्रुतानां त्रितयं लघूद्वौ सारसो मतः ।

॥ । ० ० ० । । ॥ इति सारसः

द्रुतद्वयं लघु द्वंद्वंचण्ड ताले बभाषिरे ।

॥ ० ० । । ॥ इति चण्डतालः

मगणश्च त्रयो दीप्ता लघुश्चन्द्रकलाभिधे ।

॥ ऽ ऽ ऽ ऽे ऽे ऽे । ॥ इति चन्द्रकला

गलौ प्लुतत्रयं वक्रः प्लुतो बिन्दुत्रयं लये ।

॥ ऽ । ऽे ऽे ऽे ऽ ऽे ० ० ० ॥ इति लयतालः

[1]राद्द्रुतौ द्वौ गुरुः स्कन्दे-

॥ ऽ । ऽ ० ० ऽ ॥ इति स्कन्दताल्ः

1. रत्नाकरे असमाल्परं पादत्रयंदश्यते । तद्यथा : --
अड्डताळीदो लघुद्वयं इयमेवोच्चिरेताळं केचित् त्रिपुट संज्ञया
॥ ० । । ॥ इत्यड्ड ताळी त्रिपुटश्च ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घत्तादौद्वौलगौ भवेत् ।

॥ 0 0 । S ॥ इति घत्तातालः

द्वंद्वः सतगणौ प्लुतः ।

॥ । । S S S । ऽे ॥ इति द्वंद्वतालः

मुकुंदेतु लघो र्बिन्दुचतुष्टय मथोगुरुः ।

॥ । 0 0 0 0 S ॥ इति मुकुंदतालः

कुविन्दके लघुर्बिन्दुद्वयं गुरुरथ प्लुतः ।

॥ । 0 0 S ऽे ॥ इति कुविन्दकतालः

कलध्वनौ लघुद्वंद्वं गुरुर्लघु रथप्लुतः

॥ । । S । ऽे ॥ इति कलध्वनिः

पञ्चभिर्लघुभि गौरी-

॥ । । । । । ॥ इति गौरीतालः

द्वौगुरू द्वौलघू द्रुतौ

ताले सरस्वतीकण्ठाभरणे शास्त्रसंमते ॥

॥ S S । । 0 0 ॥ इति सरस्वतीकण्ठाभरण तालः

भग्न ताले चतुर्बिन्दुर्नगणश्च विरामवान् ।

॥ 0 0 0 0 । । ।̆ ॥ इति भग्नतालः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ताले राजमृगाङ्केऽपि द्रुतौ लघु स्थो गुरुः ।

॥ ०० । ऽ ॥ इति राजमृगाङ्क तालः

गुरुर्लघु र्द्रुत स्ताले राजमार्तण्ड संज्ञके

॥ ऽ । ० ॥ इति राजमार्तण्डतालः

निश्शङ्क संज्ञके ताले लगुरू पगुरू गलौ ।

॥ । ऽ ऽे ऽ ऽ । ॥ इति निश्शङ्कतालः

शार्ङ्गदेवे द्रुतद्वंद्वं लप्लुतौ गद्वयं लघुः ।

॥ ०० । ऽे ऽ ऽ । ॥ इति शार्ङ्गदेवतालः

इति रत्नाकरः ।

अथ मतान्तरे :—

अंणुद्रुतो भवेद्यत्र चित्रतालः प्रकीर्तितः ।

॥ ˘ ॥ इति चित्रतालः

द्रुतेनत्वेकताली स्यात् कथिता भरतादिभिः ।

॥ ० ॥ इत्येकताली

विरामान्त द्रुतेनैव कंदुकः परिगीयते ।

॥ ॆ० ॥ इति कन्दुकतालः

प्लुत मेकं भवेद्यत्र परिमण्ठस्स उच्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ ऽे ॥ इति परिमण्ठताल:

ताले निश्शंकलीलाख्ये प्लुतौद्वौ गद्वयं लघु: ।

॥ ऽे ऽे ऽ ऽ । ॥ इति निश्शंकलीलताल:

लघुद्रुतौ लघुश्चैव द्रुतद्वय मथो लघु: ।

द्रुत त्रयं लघु श्चेति ब्रह्मताले बभाषिरे ॥

॥ ।०।००।०००। ॥ इति ब्रह्मताल:

यतिलग्न द्वितीयाभ्या मिडावान् संप्रकीर्तित: ।

॥ ०।००। ॥ इति इडावान्

द्रुत त्रयं लघुश्चैक श्चतुस्ताल: प्रकीर्तित: ।

॥ ०००। ॥ इति चतुस्ताल:

काम बाणद्रुतायत्र करजग्व्य स्तत: परम् ।

दविरामो लघुश्चैको बिन्दु श्चार्धद्रुतो भवेत् ।

दविरामो लघुद्वंद्वं द्रुतो लघु विरामवान् ।

कुंभतालइति प्रोक्त स्तालविद्याविशारदै: ।

॥ ००००० ॅ ०̊ । ० ॅ ०̊ । । ० ॊ ॥ इति कुंभ ताल:

द्रुतद्वयं लघुश्चैक श्चार्धचन्द्रद्वयं तथा ।

क्रीडातालो द्रुत श्चैक लघुश्चा णुद्वयं तथा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दविरामो द्रुत श्चैको दविरामो लघुस्तथा ।

दद्वं लविरामश्च लक्ष्मीतालेवभाषिरे ।

॥ ००। ˘ ˘ ०० ०। ˘ ˘ ० ०। ०० ॥ इति लक्ष्मीतालः

अर्जु नाख्ये क्रमात्ताले द्रुतोलश्चद्रुतः शरः ।

द्रुत त्रयं लघुश्चैकः तश्चैव विरामवान् ।

॥ ०।०।०००।० ॥ इति अर्जुनतालः

दोलश्च लविरामश्च दोलघु र्लविरामकः ।

शरोद्रुतो लघुश्चैको विरामो लद्रुतोमतः ।

शरो विरामसहितः कुण्डनाचिं प्रचक्षते ।

॥ ०। ०। । ०। ० ॥ इति कुण्डनाचीतालः

द्रुतोलघु र्द्रुतो लश्च दलघू दद्वयं तथा ।

लघुर्द्रुतत्रयं लश्चदचतुष्कं लघुर्भवेत् ।

कुल्लतालइति प्रोक्तस्तालविद्याविशारदैः ।

॥ ०।०।०।००।०००।००००। ॥

इति कुल्लतालः (गुल्लतालः)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]रच्चा ताले लघुः प्रोक्तो दविरामः प्रकीर्तितः ।

॥ । ὸ ॥ इति रच्चाताल:

द्रुत त्रयं लघुश्चैको दद्वयश्च लुघुद्वयम् ।

सन्नि ताले क्रमाज्ज्ञेयं सर्वनृत्येषु संमते ।

॥ 0 0 0 । 0 0 । । ॥ इति सन्निताल:

महा सन्नि स्तु विंज्ञेया द्रुत त्रयलघुद्वयम् ।

द्रुतश्शरो द्रुतोलश्च द्रुतोलत्रय संयुतः ।

केचिदेनं प्रशंसन्ति ग्रह मात्रायुतो भवेत् ।

॥ 0 ᑌ 0 । । 0 । 0 । 0 । । । ॥ इति महासन्निः

यति शेखर तालेतु द्रुतश्शर युग द्रुतौ ।

लघु द्रुतौ शरद्वंद्वं वदन्ति चमनीषणः ।

॥ 0 । । 0 0 । ᑌ 0 । । ॥[2] इति यतिशेखरताल:

गद्वयं लत्रयं ज्ञेयं निश्शब्दं ललयं ततः

1. 'रश्वा' 'लश्वा' इति च पाठ मेदौ.

2. अस्य ताळस्य सप्तमाष्टमाङ्गभूतद्रुतयोः स्थाने एक एव द्रुतः मातृकान्तरेदृश्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पञ्चघातस्सविज्ञेयः प्रसिद्धस्तालवेदिनाम् ।

॥ ऽ ऽ । । । ॒ ॒ ॒ ॥ इति पञ्चघातः

जीवद्वयं भवेद्यत्र नगणश्च विरामवान् ।

इतिवा पञ्चघातः स्याल्लयत्रितयसंयुतः ॥

॥ ऽ ऽ । । ॊ ॥ इति वा पञ्चघातः

ताळे कल्याणसंज्ञेतु तृतीयोऽर्धद्रुतो भवेत् ।

विंदुर्विरामोऽर्धचन्द्रः प्रान्तेगारुगिरुच्यते ॥

॥ ० ० ॊ ‿ ॊ ‿ ० ० ० ॊ ॥ इति कल्याणताळः

समताळो द्रुतौद्वौ च द्रुतो लघुरतः परम् ।

सचक्रीडात्तु साज्ञेया चन्द्रताळः प्रकीर्तितः ॥

॥ । । ० ॊ ० ० ० । । ० ॊ ॥ इति चन्द्रताळः

तन्त्रसूडादि ताळाः—

ध्रुवो मट्ठो रूपकश्च झंपाताळतृतीयकौ ।

अड्डुताळश्चैकताळी सूडताळाभवन्त्यमी ॥

रतिताळे लगौ ज्ञेयौ लोके ध्रुवकसंज्ञः

॥ । ऽ ॥ इतिध्रुवः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लघु गुरु लघुश्चैव जगणो मण्ठ इष्यते ।

॥ । ऽ । ॥ इति जगणमण्ठः

क्रीडा द्रुतौ विरामान्तौ रूपकंच प्रचक्षते ।

॥ ० ०̆ ॥ इति रूपकताळः

विरामान्तद्रुतद्वंद्वात् लघुनैकेनझंपकः ।

॥ ० ०̆ । ॥ इति झंपतालः

[1]द्रौ लौ भवेदष्टताली अड्डताळीच सा भवेत् ।

॥ ० ० । । ॥ इति अड्डताळः

द्रुताद् द्रुतौ विरामान्तौ तृतीयंच प्रचक्षते ।

॥ ० ० ०̆ ॥ इति तृतीयः

लोदश्च लविरामश्च प्रसिद्धाचैकताळिका

॥ । ० ।̆ ॥ इति एकताळः

इति सूडादिताळाः ।

अथ ध्रुवपदताळा उच्यन्ते ।

लघुर्द्रुतद्वयं लश्च यतिताळः प्रकीर्तितः ।

॥ । ० ० । ॥ इति यतिताळः

लोद्रुतौ प्रतिताळः स्यात्

॥ । ० ० ॥ इति प्रतिताळः

1. दोलौ भवेदड्डताळी मोक्षताळी च सा भवेत् इति पाठांतरं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सञ्चे द्रुतलघुत्रयं ।

॥ o । । । ॥ इति सञ्चताळः

समे लोदौ विरामान्तौ मुखरीति[3] निगद्यते ।

॥ । ᴗ ὀ ॥ इति समताळः मुखरी च

अणु[4]द्रुतद्वयं दश्च लघुस्स्यादष्टताळिका ।

॥ ᴗ ᴗ o । ॥ इति अष्टताळिका

गुरुद्वयं लघुश्चैवप्लुतोलघुगुरुस्तथा ।

द्रुतद्वयंलघुद्वंद्वं[5] लघुप्लुत इति क्रमात् ॥

शरो दीतोगुरुश्चैव लघुयुग्मं ततःपरं ।

चत्वारो लघवोऽशब्दाः प्रान्तेस्युःसिंह्मनन्दने ॥

॥ऽऽ । ऽे । ऽ o o ऽ ऽ । ऽे । ऽे ऽ ॥ ┌ ┌ ┌ ┌ ॥ इतिसिंह्मनन्दनः

तपौ मलौ पलौ गः पो भोऽशब्दं लचतुष्टयं ।

वेदद्रुतालघुद्वौत्यौजपौलौ सगणस्तथा ।

---

3. ' मुखचारी ' इति पाठांतरम् ।

4 ' अणुर्द्रुतद्वयं ' इति पाठांतरम् ।

5. ' गुरुद्वंद्वं ' इत्ति स्यात् मातृकासु सर्वासु गुरोःचिह्नितत्वात् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अशब्दं लचतुष्कं स्यात् पृथ्वीकुण्डलिसंज्ञके[6] ।

॥ऽऽ।डेऽऽऽ।डे।।ऽडेऽ।। ⌐ ⌐ ⌐ ⌐ 00

00।।ऽऽ।।ऽऽ।ऽ।डेडे।।।।ऽ⌐ ⌐ ⌐ ⌐॥

इति पृथ्वीकुण्डली

इन्द्रकुण्डलिताळेतु सलपा मलपा लगौ ।

पमपा: पौ लपौ पस्तः प्लुतौतौतगणस्तथा ॥

6. 11499 अङ्कितमातृकायां पाठान्तरं यथा ।

चच्चत्पुटः स्युर्मगणः लपौ लघुगुरुर्भवेत् ।

पगौ लघुद्वयं ज्ञेयं अशब्दं लचतुष्टयम् ॥

वेदद्रुताः क्रमाद्ज्ञेया लद्वयं तगणस्तथा ।

प्लुतौ जगणपौतौ च सगणश्च तथाभवेत् ॥

अशब्दं लचतुष्कं स्यात् पृथ्वीकुण्डलिसंज्ञके ।

॥ऽऽ।डेऽऽऽ।डे।ऽडेऽ।। ¬ ¬ ¬ ¬0000

।।ऽऽ।डेडे।ऽ।डेऽऽ।ऽऽ।।।ऽ¬ ¬¬¬॥ इति पृथ्वीकुण्डली

अस्मात् श्लोकात्परं हनुमन्मतानुसारि वृश्चिककुण्डलि ताळ लक्षणं दृश्यते । तद्यथा :—

" अथ हनुमन्मते लिख्यते । नद्वयं तगणश्चैव नगणो यगणस्तथा ।

मगणः सगणश्चैव भद्वयं यगणो भवेत् ॥

भगणद्वयसंयुक्तः यगणो लघुरेव च ।

जगणो लघुचत्वारो निश्शब्दाः कथिताबुधैः ॥

वृश्चि ताळे स संक्षेपः कथितः पिङ्गळेनच ।

॥।।।।।।ऽऽ।।।।।ऽऽऽऽऽ।ऽऽ।।।ऽ।।।ऽऽ

ऽ।।ऽ।।।ऽऽ।।ऽ।¬¬ ¬¬॥ इति वृश्चिक कुण्डली

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लपौतः प्लुत लघुगाः नगणो गुरुरेव च।
चत्वारो लघवोऽशब्दाः प्रान्ते ज्ञेयाविचक्षणैः[7] ॥

॥ । । ऽ । ऽे ऽ ऽ ऽ । ऽे । ऽ ऽे ऽ ऽ ऽ ऽे ऽे ऽे । ऽे ऽे ऽ ऽ ।
ऽे ऽे ऽ ऽ । ऽ ऽ । ऽ ऽ । । ऽे ऽ ऽ । ऽे । ऽ । । । ऽ
ᒥ ᒥ ᒥ ᒥ ॥ इति इन्द्रकुण्डली

विष्णुताळेतुनगणः ततश्च तगणोभवेत्
ततो जगणकोज्ञेयस्तगणस्सगणस्तथा
रगणो यगणोज्ञेयः प्रान्तेतुमगणो भवेत् ।[8]

॥ । । । ऽ ऽ । । ऽ । ऽ ऽ । । । ऽ ऽ । ऽ । ऽ ऽ ऽ ऽ ऽ
इति विष्णुतालः

7, पाठांतरं यथा । कुण्डली चेन्द्रलोकाख्ये सगणश्च लघुःप्लुतः ।
मगणो यलयंलश्च प्लुतो (लोपौ) गुरुद्वयम् ।
लघुर्गुरुद्वयं लौचप्लुतो गौ लघुरेवच ।
प्लुतोजगणसंज्ञश्च सगणोलचतुष्टयं ।
अशब्दंक्रमतोज्ञयं सर्वं लोकमनोहरम् ॥

॥ । । ऽ । ऽे ऽ ऽ ऽ । ऽ । - - ऽ ऽ ऽे । ऽे ऽे ऽ ऽ । ऽ ऽ । । ऽे ऽ ऽ ।
ऽे । ऽ । । । ऽ ᒥ ᒥ ᒥ ᒥ ॥ इति इन्द्रलोककुण्डली

8. अस्यपाठांतरंयथा ।
विष्णुताळं तु नगण : ततश्च मगणो भवेत् ।
ततो जगणलो ज्ञेयस्तगणस्सगणस्तथा ॥
रगणो यगणोज्ञेय : प्रान्ते तु मगणो भवेत् ।

। । । ऽ । । । ऽ । । ऽ ऽ । । । ऽ ऽ । ऽ । ऽ ऽ ऽ ऽ ऽ ॥ इति विष्णुताळ :

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पातालकुण्डलीताले शरो दीप्तो गुरुस्तथा ।

लपौ गलौ गपौ लश्च पौ गौ पौ मगणः प्लुतः ॥

लगौ गलौ पगौ लौच मगणो लप्लुतौ तथा ।

द्रुतद्वयं लघुद्वंद्वं प्रान्ते व्यापकयुग्मकम् ॥[1]

॥ । ऽे ऽ । ऽे ऽ । ऽ ऽे । ऽे ऽे ऽ ऽ ऽे ऽे ऽ ऽ ऽ ऽे । ऽ ऽ । ऽे ऽ ऽ

। । ऽ ऽ ऽ । ऽे ० ० । । । । ॥ इति पातालकुण्डली

दविरामो द्रुतद्वंद्वं लविरामश्च कीर्तितः ।

विलंबेना ष्टताली स्यात् लक्ष्यमार्गप्रवर्तिता ॥

॥ ०̇ ० ० ।̇ ॥ इति विलंबलये अष्टताली

यतिलग्नो द्रुतोलश्च लक्ष्यमार्गेप्रवर्तितः ।

॥ ० । ॥ इति यतिलग्नः

---

1. अस्य पाठान्तरं यथा :

पातालकुण्डलीताले शरो दीप्तो गुरुस्तथा ।

लघुप्लुतौ गुरुश्चैकः शरः पूज्यः प्लुतो भवेत् ॥

शरो दीप्तः प्लुतश्चेति ततो जीवत्रयं भवेत् ।

प्लुतो गुरुद्वयं यश्च लगुरू लप्लुतो भवेत् ॥

भगणो मगण श्चैव लघुर्दीप्तश्च दद्वयम् ।

ततो लघुः प्रयोक्तव्यो विद्वद्भिः परिकीर्तितः ॥

॥ । ऽे ऽ । ऽे ऽ । ऽ ऽे । ऽे ऽे ऽ ऽ ऽ ऽे ऽ ऽ । ऽ ऽ । ऽ । ऽे ऽ । । ऽ ऽ ऽ । ऽे ० ० । ॥

इति पातालकुण्डली

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वेदद्रुतं विरामान्तं गारुगिश्च प्रचक्षते ।

॥ 0 0 0 0 ॥ इति **गारुगिः**

लघुत्रयं त्रिरामान्तं झोंवडः परिकीर्तितः ।

॥ 0 0 0 ॥ इति **झोंवडः**

[1]नील झोंवडतालेतु तादशब्दो गुरुस्तथा ।

लावणूदौ त्रिरामान्तावेतल्लक्षणमीरितम् ॥

॥ ऽ ऽ । ꠰ ऽ । । ‿ ‿ 0 0 ॥ इति **नीलझोंवडः**

[2]तादशब्दो लघुर्गश्च त्रिरामान्तं द्रुतत्रयम् ।

लोऽणू त्रिरामदोलः स्यात् अथवानीलझोंवडः ॥

॥ ऽ ऽ । ꠰ ऽ 0 0 0 । ‿ ‿ 0 । ॥ इति वा **नीलझोंवडः**

---

1. अस्य पाठान्तरंयथाः—

नील झोंवडतालेतु तगणश्च विधीयते ।

अशब्दो लघुरेकः स्यात् गुरुरेकोद्रुतद्वयम् ॥

लद्वयञ्चक्रमाद्ज्ञेयं अर्धचन्द्रद्वयं भवेत् ।

क्रीडातालेन संयुक्त रञ्जकत्वं तदा भवेत् ।

॥ ऽ ऽ । ꠰ ऽ 0 0 । । ‿ ‿ 0 0 ॥ इति **नीलझोंवडः**

2. अस्य पाठान्तरं यथाः—

गौलो लघुरशब्दः स्यात् गोदौ दश्च विरामवान् ।

लोऽणुद्रुतद्वयंदश्च लविरामः प्रकीर्तितः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[3]निउद्दंमे द्रुताः पञ्च विरामान्ता स्तु गारुगिः ।

॥ 0 0 0 0 0̀ 0 0 0 0 0̀ ॥ इति निउद्दंमः

लगौ द्रुतत्रयं त्रिः स्यात् लोदौ लपगदा दलौ ।

पगौदौलपगाः प्रोक्ताः गारुगिश्चतृतीयकः ॥

द्रुतो लघुर्लघुर्गश्च स्वर्णमेरु[4] रयं मतः ।

॥ । ऽ 0 0 0 । ऽ 0 0 0 । ऽ 0 0 0 । 0 0 । ङे ऽ 0
0 । ङे ऽ 0 0 । ङे ऽ 0 0 0 0̀ 0 0 0 0̀ 0 । । ऽ ॥ इति स्वर्णमेरुः

ततो लघुः प्रयोक्तव्यः इति व नीलझोंबडः ॥

॥ ऽ ऽ । ⌈ ऽ 0 0 0̀ । ◡ ◡ 0 ⌈ । ॥ इति वानीलझोंबडः

3. अस्य पाठान्तरं यथाः—

ती उद्दमे द्रुताः पञ्च विरामान्ताः प्रचक्षते ।
ततः परं गारुगिः स्यात् तदाजनमनोहरम् ॥

॥ 0 0 0 0 0̀ 0 0 0 0̀ ॥ इति तीउद्दंमः

4. अस्य पाठान्तरं यथाः—

मेरौ कनकसंज्ञेतु लगुरूचद्रुतत्रयम् ।
लगौद्रुतत्रयं लश्च गुरुर्बिन्दुत्रयं भवेत् ॥
लघुर्द्रुतौ लघुश्चेति पौदौ गौ लघुरेव च ।
पगौद्रुतौ लपौ गश्च गारुगिश्च तृतीयकः ॥
अद्रुतालो गुरुरितिज्ञेयं सर्वसुखप्रदम् ।

॥ । ऽ 0 0 0 । ऽ 0 0 0 । ऽ 0 0 0 । 0 0 । ङे ङे 0 0 ऽ ऽ । ङे ऽ 0
0 । ङे ऽ 0 0̀ 0 0 0̀ 0 0̀ 0 0 0 । । ऽ ॥ इति वा कनकमेरुः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथवाऽणुचतुष्कंस्यात् क्रीडागारुगिरुस्तथा ।

अणुद्रुताश्चचत्वारो दविरामो लघुद्वयम् ॥

गपौ गारुगिलौदश्चह्रस्वोऽणुद्रुतयुग्मकम् ।

दविरामश्चविज्ञेयःस्वर्णमेरुर्निगद्यते ॥

॥ ˘ ˘ ˘ ˘ 0 0̀ 0 0 0 0̀ ˘ ˘ ˘ ˘ 0̀ । । ऽ डे

0 0 0 0̀ । 0 ।˘ ˘ ॥ इति वास्वर्णमेरुः

च[4]क्रतालेक्रमाद्ज्ञेयं दचतुष्कंगुरुस्तथा ।

प्रतीपब्रह्मतालेतु विद्वद्धिःपरिकीर्तितः ॥

॥0 0 0 0 ऽ। 0 0 0 । 0 0 । 0 । ॥ इति चक्रतालः

---

4. अस्य पाठान्तरंयथाः—

चक्रताले क्रमाद्ज्ञेयंदचतुष्कंलघुर्भवेत् ।

प्रतीपब्रह्मतालैस्तःविद्वद्धिः परिकीर्तितः ॥

॥ 0 0 0 0 । । 0 0 0 । 0 0 । 0 । ॥ इति वाचक्रतालः

अतः परं मातृकान्तरे अधिक पाठो दृश्यते यथा :—

'अथ षोडशध्रुवतालाः'

जयन्तशेखरोत्साहा स्ततो मधुर निर्मलौ ।

कुन्तलः कमलश्चारो नन्दनश्चन्द्रशेखरः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कामोदो विजयाख्यश्च कन्दर्पं जयमङ्गलौ ।

तिलको ललितश्चेति ध्रुवाः षोडश कीर्तिताः ॥

लघुरेको जयन्तस्तु विद्वद्भिः परिकीर्तितः ।

॥ । ॥ इति जयन्तः

लघुद्वयं विरामान्तं शेखरः परिकीर्तितः ।

॥ । ें ॥ इति शेखरः

उत्साहे गुरुलौज्ञेयौ :—

॥ ऽ । । ॥ इति उत्साहः

क्रीडाद्वौ मधुरो भवेत् ।

॥ ० ० ० ० ॥ इति मधुरः

क्रीडातु निर्मलः प्रोक्तः :—

॥ ० ० ॥ इति निर्मलः

कुन्तलेलो विरामवान् ।

॥ ें ॥ इति कुन्तलः

क्रीडालौ कमले प्रोक्तौ ।

॥ ० ० । ॥ इति कमलः

चारुर्निस्सारुको मतः ।

॥ । ें ॥ इति चारुः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्रुतस्तु नन्दने प्रोक्तः ।

॥ ० ॥ इति नन्दनः

लघू गश्चन्द्रशेखरः ।

॥ । । ऽ ॥ इति चन्द्रशेखरः

कामदेलौ गुरुर्ज्ञेयः ।

॥ । । ऽ ॥ इति कामदः

विजयेदौ लघुः स्मृतः ।

॥ ० ० । ॥ इति विजयः

कन्दर्पे लघुरेकः स्यात् ।

॥ । ॥ इति कन्दर्पः

क्रीडातुजयमङ्गले ।

॥ ० ० ॥ इति जयमङ्गलः

द्रुतस्तु तिलकः प्रोक्तः

॥ ० ॥ इति तिलकः

ललिते लौगुरुःस्मृतः

॥ । । ऽ ॥ इति ललितः

इति षोडश ध्रुवतालाः ” इति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अथ द्वात्रिं शन्मंठकाः

नगणोजगणश्चैवलघुर्विजय मंठके ।

॥ । । । । ऽ । । ॥ इति विजयमंठकः

आपो लघुर्दलयश्च लघुः सालंगमण्ठकः ।

॥ O । O O O । ॥ इति सालंगमण्ठकः

गुरुर्द्रुतः प्लुतश्चैव मण्ठः प्रथमसंज्ञकः ।

॥ ऽ O डे ॥ इति प्रथममण्ठः

दद्वयं तगणश्चैव नगणः सारसो मतः ।

॥ O O ऽ ऽ । । । । ॥ इति सारसमण्ठः

---

1. 11499 अंकितमातृकायान्तु मण्ठकजातिताल लक्षणं
 'अथषण्मण्ठाः' इति प्रारभ्यते तद्यथाः—

जयप्रियेतुजगणः

॥ । ऽ । ॥ इति जयप्रियमंठः

वल्लभे रगणः स्मृतः ।

॥ ऽ । ऽ ॥ इति वल्लभमण्ठः

लविरामः कलापेतु ।

॥ े ॥ इति कलापमण्ठः

क्रीडालः कमलः स्मृतः ।

॥ O े । ॥ इति कमलमण्ठः

षण्मण्ठाः इति प्रतिज्ञातम् । चतुर्णामेवलक्षणं स्वरूपञ्च निरूपितम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्रुतोलघुर्द्रुतद्वंद्वं लघुद्वंद्वश्चकीलके ।

॥ ० । ० ० । । इति **कीलकमण्ठः**

दीसमेकं भवेद्यत्र पडिमण्ठस्सउच्यते ।

॥ ङे ॥ इति **पडिमण्ठः**

रगणोगलसंयुक्तो निश्शब्दं लचतुष्टयम् ॥

रविमंठकसंज्ञोऽयं मात्राद्वादशभिर्युत:* ।

॥ ऽ । ऽ ऽ । ⌈ ⌈ ⌈ ⌈ ॥ इति **रविमंठः**

विराममंठकेज्ञेयंझंपाता लद्वयंवुधैः ।

॥ । ० ० । ० ० ॥ इति **विराममंठः**

धनञ्जयाख्यमंठेतु क्रमाद्दलगपामता: ‡ ।

॥ ० । ऽ ङे ॥ इति **धनञ्जयमंठः**

लद्वयं दचतुष्कंस्याम् श्रीमंठेगद्वयंतथा ।

॥ ० ० ० ० ऽ ऽ इति **श्रीमंठः**

---

* 11499 मातृकायां अधिकपाठः-

नगणोगुरुणैकेन चक्रमंठः प्रकीर्तितः ।

॥ । । । ऽ ॥ इति **चक्रमंठः**

‡ -do- मंठेजयप्रियेज्ञेयः जगणः केवलः स्वयम् ।

॥ । ऽ । ॥ इति **जयप्रियमंठः**

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गुरुः कूपद्वयं गश्चदौ शरो रङ्गमंठके ।

॥ ऽ 0 0 ऽ 0 0 । ॥ इति **रङ्गमंठः**

गुरुद्वंद्वं लघुद्वंद्वं निश्शब्दं लचतुष्टयम् ।

षण्मंठके तु विज्ञेयं रसिकैर्नृत्यवेदिभिः ॥

॥ ऽ ऽ । । ॰ ॰ ॰ ॰ ॥इति **षण्मंठः**

गीर्वाणमंठके तुस्या ज्जगणो दीप्तकोगुरुः ।

॥ । ऽ । ॰ ऽ ॥ इति **गीर्वाणमंठः**

विचारप्रतिमंठोऽसौ नगणोदौ त्रिरामवान् ।

॥ । । । 0 0 ॥ इति **विचारप्रतिमंठः**

भाच्चतुर्लघु निश्शब्दं भवेत्कल्याणमंठके ।

॥ ऽ । । ॰ ॰ ॰ ॰ ॥ इति **कल्याणमंठः**

शरः कूपद्वयं लौद्रौ नगणस्तगणस्तथा ।

कमलोमंठकोज्ञेयः सर्वशास्त्रेषु संमतः ।

॥ । 0 0 । । । । । ऽ ऽ । ॥ इति **कमलमं*ठः**

---

* 11499-मातृकायां अस्य पाठान्तरं यथा—

शरः कूपद्वयं लौद्वौद्रुतौद्वौनगणस्तथा ।

॥ । 0 0 । । 0 0 । । । ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वल्लभोरगणेनैव कथितस्तालवेदिभिः ।

॥ ऽ । ऽ ॥ इति **वल्लभमंठः**

साच्चतुर्लघु निश्शब्दं पुनर्भूमंठके भवेत् ।

॥ । । ऽ ॅ ॅ ॅ ॅ ॥ इति **पुनर्भूमंठः**

कलापमंठकेज्ञेयो नगणश्च विरामवान् ।

द्वितीय स्त्रिपुट श्चैव विलासे मंठके भवेत् ।

॥ ० ० । ० ! । ॥ इति **विलासमंठः**

॥ । । ॊ ॥ इति **कलापमंठः**

द्रुतोगुरुश्चित्रमंठेकथितस्तालवेदिभिः ।

॥ ० ऽ ॥ इति **चित्रमंठः**

ताराख्य प्रतिमंठोऽसौ दद्वयं लद्वयं तथा ।

॥ ० ० । । ॥ इति **ताराप्रतिमंठः**

भाच्चतुर्लघु निश्शब्दं भवेन्मुद्रितमंठके ।

॥ ऽ । । ॅ ॅ ॅ ॅ ॥ इति **मुद्रितमंठः**

यगणः सगणोयत्र करालोमंठको भवेत् ।

॥ ऽ ऽ । । । ऽ ॥ इति **करालमंठः**

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लघुद्वंद्व द्रुतद्वंद्वं लघुर्दौं वर्णमंठके ।

॥ । । ० ० । ० ० ॥ इति **वर्णमंठः**

गुरुः प्लुतो भवेद्यत्र गंभीरोमंठको भवेत्* ।

॥ ऽ ऽ॒ ॥ इति **गंभीरमंठः**

द्रुतत्रयं लघुश्चैको द्रुतोलश्चद्रुतोमतः ।

शरद्वयं भवेद्यत्र भिन्नमंठस्स उच्यते ॥

॥ ० ० ० । ० । ० । । ॥ इति **भिन्नमंठः**

कलिङ्गमंठो विज्ञेयो द्रुतो लघुयुगान्वितः ।

॥ ० । । ॥ इति **कलिङ्गमंठः**

आदितालो द्वितीयश्च दद्वयञ्च लघुस्ततः ।

यति लम्मद्वयं यत्र द्वितीय युगलं तथा ।

वेद द्रुतास्तु विज्ञेयाः पश्चाच्छरचतुष्टयम् ।

अशब्दश्च क्रमाद् ज्ञेयं संकीर्णमंठकेवुधैः ।

॥ ० ० । ० ० । ० । ० । ० ० । ० ० । ० ० ० ०

ऽ ऽ ऽ ऽ ॥ इति **संकीर्णमंठः**

---

* अत्र 11499-मातृकायां अधिकपाठः यथा—

सगणो लघु दीप्तौच श्रीरंगे मंठके भवेत् ।

॥ । । ऽ । ऽ॒ ॥ इति **श्रीरंगमंठः**

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति द्वात्रिंशन्मंठाः

गलौ पपञ्चकश्चैव दत्रयं विजयो भवेत् ।

॥ ऽ । ऍ ऍ ऍ ऍ ऍ ० ० ० ॥ इति विजयतालः*

---

* अतः परं 11499 मातृकायां अधिकपाठः यथाः—

द्रुतौलघुर्मृगाङ्केतु

॥ ० ० । ॥ इति मृगाङ्कतालः

उत्सवे लप्लुतद्वयम् ।

॥ । ऍ ऍ । ॥ इति उत्सवतालः

पद्माख्यताले सगणः लघुश्चपरिकीर्तितः ।

॥ । । ऽ । ॥ इति पद्मतालः

सुदेववत्सताल्तुलघुर्द्रुतलघुत्रयम् ।

॥ । ० । । । ॥ इति सुदेववत्सतालः

तगणो गुरुदीप्तौचमतोरङ्गप्रदीपकः ।

॥ ऽ ऽ । ऽ ऍ ॥ इति रङ्गप्रदीपकः

दोलौचदत्रयश्चैव लघुःस्याद्रतितालके ।

॥ ० । । ० ० ० । ॥ इति रतितालः

गपोद्रौ गलपाश्चैवराजतालोमतोबुधैः ।

॥ ऽ ऍ ० ० ऽ । ऍ ॥ इति राजतालः

चतुर्द्रुतात्परंगश्च मुकुन्दः परिकीर्तिताः ।

॥ ० ०' ० ० ऽ ॥ इति मुकुंदतालः

द्रुतौच नगणश्चैवाप्यभङ्गेपरिकीर्तिताः ।

॥ ०̊ ० । । । ॥ इति अभङ्गतालः

गलदा राजमार्ताण्डः—

॥ ऽ । ० ॥ इति राजमार्ताण्डतालः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गौरीतुलघुपञ्चकम्

॥ ।।।।। ॥ गौरीतालः

दचतुष्कं भग्नताले नगणश्चविरामवान्

॥ 0000 ।। ो ॥ इति भग्नतालः

तलौ सरस्वतीकण्ठाभरणे द्रुतयुग्मकम् ।

॥ SS ।। 00 ॥ इति सरस्वतीकण्ठाभरणतालः

सगणः कलकण्ठःस्यात्

॥ ।। S ॥ इति कलकण्ठतालः

द्वंद्वेतु सतदीप्तकाः—

॥ ।। SSS । ऽे ॥ इति द्वंद्वतालः

लौदौलपौचित्रपुटः—

॥ ।। 00 । ऽे ॥ इति चित्रपुटतालः

गौदौपश्चविलोकिते:—

॥ SS 00 ऽे ॥ इति विलोकिततालः

रोदौगुरुद्वयंस्कंदेः—

॥ S । S 00 SS ॥ इति स्कंदतालः

दत्रयंलौचसारसः—

॥ 000 ।। ॥ इति सारसतालः

इति देशीतालप्रकरणम्

Page (-170): Marga and Desi Talas described

பக்கம் (-170) மார்க்கதேசி தாளங்களின் லக்ஷணங்கள்.

अन्येऽपि सन्ति भूयांस स्तालास्ते लक्ष्यवर्त्मनि ।
प्रसिद्धिविधुरत्वेन शास्त्रेऽस्मिन्नप्रदर्शिता: ॥

तद्भेदप्रत्ययार्थन्तु लघूपाया भवन्त्यमी ।
प्रस्तारसंख्या नष्टचोद्दिष्टं पातालकस्तथा ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्रुतमेरुर्लघोर्मेरुः गुरुमेरुः प्लुतस्यच ।
मेरुश्चेति ततः खण्डप्रस्तारस्तदनन्तरम् ॥

नष्टोद्दिष्टश्चमेरूणांचतुर्णान्तुक्रमेणतु ।
ततो विरामप्रस्तारं नष्टादिः क्रमशः पृथक् ।
लघूपायेन वक्ष्यामः शास्त्रतस्संप्रदायतः ॥

प्रस्तारप्रक्रियाश्चात्र प्रोक्तास्ताः सुमनोहराः ।
ज्ञानाय सुधियां सम्यक् सांप्रतं कथयिष्यते ॥

अथ प्रस्तारः

लिखित्वेप्सिततालस्य मात्राः पिण्डीकृताः पुनः ।
गुरोरादेरधः कुर्यात् तद्धीनं च परं समम् ॥

ज्येष्ठानुक्रमत स्सम्यक् शेषं लेख्यश्च वामतः ।

तथा च रत्नाकरः :---

सर्वद्रुतावधिः कार्यः प्रस्तारोयं लघौ गुरौ ।
प्लुतेव्यस्ते समस्ते च न तु व्यस्ते द्रुतेऽस्ति सः ॥

इति प्रस्तारः ।

एकद्वित्र्यङ्कदिक्चन्द्रनवषट्सु क्रमादियम् ।
सूचीपरान्तयुग्माङ्क तुर्यपष्ठस्य योगतः ॥

यैरङ्कैरिष्टताळस्य परासूची विधीयते
तैरङ्कैरिह्चज्ञेया भेदा द्लगपांतगाः ॥ तथाच रत्नाकरः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एकाद्यङ्कानुक्रमान्न्यस्य युञ्जीतान्तं पुरातनैः ।
द्वितीय तुर्यषष्ठाङ्कैरभावे तुर्यषष्ठयोः ॥

तृतीय पञ्चमाङ्काभ्यां क्रमात्तंयोगमग्रतः
लिखेद्दक्षिण संस्थैवमङ्कश्रेणी विधीयते ॥

साचाङ्कैरिष्टतालस्थद्रुतसंख्यैः समाप्यते
द्रुतोलघुःसार्धमात्रो गुरुः सार्धद्विमातृकः ।
प्लुतः सार्धत्रिमातश्चेत्येकैकद्रुतवर्धितैः ॥[1]

१	२	३	६	१०	१९	३३	६०	१०६	१९१

इति सूची

अथनष्टम्

अत्रैतावतिथोभेदः किं रूप इति पृच्छति ।
यत्र तन्नष्टमाख्यातं तस्योत्तरमिहोच्यते ॥
भेदानां यावतांमध्ये नष्टप्रश्नः कृतोभवेत् ।
तावत्संख्याकपर्यन्तां लिखेत्सङ्ख्याकसन्ततिम् ॥
अन्त्याङ्केतत्तनष्टाङ्कं पातयेदथ शेषतः ।
पातयेत्पूर्वपूर्वाङ्कं तत्तत्वपतितो द्रुतः ॥

1. सङ्गीतरत्नाकरे इतः परंस्थिताः श्लोकार्धाः यथाः—
तालभेदाः क्रमादङ्कैः संख्यायन्तंक्रमादिह । यदङ्कयोगादन्त्योऽङ्कः लब्धस्तैरन्ततः क्रमात् ॥ भेदाद्रुतान्तलध्वन्तगुर्वन्ताश्चप्लुतान्तकाः । संख्यायन्ते इति प्रोक्ताः संख्यानिःशंकपूरिणा ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पूर्वश्चेत्पतितो नस्यात् लघुस्तुपतिताद्भवेत् ।
उत्तरेणाकृतार्थेन सहितात्तदसम्भवे ॥

अकृतार्थेन पूर्वेण सान्तरे पतिते पृथक्
लघुर्निरन्तरे तस्मिन् लघुरेव गुरुर्भवेत् ।
गुरुहेतो स्तृतीये तु पतितोग: प्लुतो भवेत् ॥

अङ्काभावे द्रुताद्यास्तालपूरणहेतव: । इति नष्टम् ।

अथोद्दिष्टम्

ईदृग्रूपोऽत्रकथितो भेद: प्रश्न इतीदृश: ।
उद्दिष्टं तत्र सङ्ख्याङ्कसन्ततिं नष्टवल्लिखेत् ॥
यैरङ्कै: पतितै र्नष्टे लभ्यन्तेये द्रुतादय: ।
तानेवाङ्कान् लभन्ते ते भेदमुद्दिष्टमाश्रिता: ॥
उद्दिष्टे पतितै रङ्कै र्न्यूने संख्याभिधीयते ।
यद्वा षट्प्लुतहेत्वङ्कमध्येऽन्त्यात्प्राचि सप्तमे ॥
तदभावे तु षष्ठाङ्के पातिते ऽन्त्याङ्कमध्यत: ।
य: शेषस्सप्लुताल्लभ्य: लब्धहीनान्त्यशेषत: ॥
ज्ञानं पूरणसंख्याया उद्दिष्टोत्तरमिष्यते ॥ ग्रन्थान्तरे

पृष्टे रूपे लिखेत्सूचीं सम्यगिष्टद्रुतात्मिकाम् ।
लघौ पूर्वां गुरौ मध्ययुग्मांश्शृङ्गिणिचत्वयम् ॥
मेलयित्वाततोहृत्वा शेषमङ्कं वदेद्बुध: ।
द्रुतादिज्ञानमङ्कै: स्यात् यैर्नष्टे लिखितैरिह ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तानेवाङ्कान् गृहीत्वान्ते दत्वाशेषं वदे द्बुधः ॥ इत्युद्दिष्टम् ।

तिर्यग्रेखा त्रयी कार्या ऊर्ध्वगाच यथेच्छया ।

ऊर्ध्वकोष्ठेषु सूच्यङ्कानथ तद्विधिरुच्यते ॥

चतुरङ्गस्य सूचीच प्रान्तमङ्कं ततोर्ध्वकम् ।

मेलयित्वालिखेदङ्कानं तत्सूचीवन्मतं बुधैः ॥

तुर्यषष्ठ प्रतिनिधिः नचास्ते किन्त्विह ध्रुवम् ।

1	2	3	6	10	19	33	60	106	191	340	610	1089
1	2	5	10	22	44	91	180	358	698	1360	2622	5041

इति पाताळः ॥

अथ द्रुतमेरुलक्षणम् ।

पङ्क्तिकृत्वेष्टताळस्य द्रुतसंमितकोष्ठकाम् ।

तिरश्चींतत्पराऊनांकोष्ठेनाथततः पराः ॥

द्विद्विकोष्ठोनिता स्वस्व पूर्वतोऽथाङ्कयोजना ।

द्वौ द्वौ तासामाद्यकोष्टौस्यातामेकाङ्कसंयुतौ ।

अधस्तन्या स्तृतीयादौ विषमे कोष्ठकेलिखेत् ॥

अन्त्याद्यङ्कचतुष्कस्य योगं सङ्ख्याङ्कसङ्घवत् ।

समेत्वन्त्यं विनेतेषां योगंन्यस्याथ पङ्क्तिषु ॥

पराशुशेषकोष्टेषु चतुर्योगोयमिष्यते ।

नास्ति प्रतिनिधित्वासामङ्कयोस्तुर्यषष्ठयोः ।

तासुस्वभावतोयास्यु र्निष्पन्ना ऊर्ध्वपङ्क्तयः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तन्मध्ये तु समे कोष्ठेऽन्त्यस्थानन्त्याद्धस्तनः ।
अङ्कः कार्योऽथतैरङ्कैर्भेदसङ्ख्याऽभिधीयते ।
विषमायां ऊर्ध्वपङ्क्तौ स्थितैरंकैरधः क्रमात् ॥
एकद्रुताद्याविषमात्र्यादिसंख्या द्रुताभिदाः ।
सर्वद्रुतान्तामीयन्ते समपङ्क्तिस्थितैः पुनः ॥
द्रुतहीनादयोद्व्यादिसमसंख्या द्रुताभिदाः ।
सर्वद्रुतान्तामीयन्तेद्रुतमेरुरयंमतः ॥

ऊर्ध्वे पङ्क्तिस्थसर्वाङ्क योगात्सङ्ख्याभिधीयते ।

							1	1
					1	1	7	8
			1	1	5	6	20	27
	1	1	3	4	9	14	25	44
1	1	2	2	5	4	12	7	26
1	2	3	4	5	6	7	8	9

द्रुतमेरुकोष्ठम्

इति द्रुतमेरुः ।

अथलघुमेरुलक्षणम्

लघुमेरौ कोष्ठपङ्क्तीः प्राग्वन्न्यस्यतदादिमाः ।
एकैककोष्ठ एकाङ्कयुक्तोऽधः पङ्क्तिकेषु च ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शेषकोष्ठेत्वन्त्यतुर्यषष्ठयोगं निवेशयेत् ।
परासां शेषकोष्ठेषूपान्त्याधस्तनसंयुतम् ॥
त्रियोगमेवमादध्यात् अत्रचद्रुतमेरुवत् ।
सदसत्वे प्रतिनिधेः कोष्ठाङ्कैरूर्ध्वपङ्क्तिगैः ॥
लघुहीनादुपक्रम्य ह्येकैकोत्तरवृद्धलाः ।
सर्वलान्ताः क्रमाद्ज्ञेयाः सङ्ख्या सर्वाङ्कसन्ततेः ।

									1
							1	5	15
					1	4	10	20	29
			1	3	6	10	18	33	61
	1	2	3	4	7	12	21	34	55
1	1	1	2	3	5	7	10	14	21
1	2	3	4	5	6	7	8	9	10

लघुमेरुकोष्ठकम्

इति लघुमेरुलक्षणम् ।

गुरुमेरावधःपङ्क्तेः पराकोष्ठत्रयोनिता ।
चतुश्चतुः कोष्ठहीनाः स्वस्वपूर्वावलेः पराः ।
एकाङ्कयुक्त आद्याद्यकोष्ठाः प्रथम पङ्क्तिगाः ।
द्वितीयोद्व्यङ्कवानन्त्योपान्त्यषष्ठांकयोगिनः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

योगोन्त्योपान्त्यषष्ठानां अधस्तुर्याङ्कसंयुतः ।
लघुस्थाने गुरुर्ज्ञेयः शेषंतु लघुमेरुवत् ॥

							8	3	1
			1	2	5	10	20	38	73
1	2	3	5	8	14	23	29	65	108
1	2	3	4	5	6	7	8	9	10

गुरुमेरुकोष्ठम्

इति गुरुमेरुलक्षणम्

अथप्लुतमेरुः ।

प्लुतमेरावधः पङ्क्तेः पञ्च कोष्ठोनिता परा ।
तत्पराःस्वस्वपूर्वातः षट्षट्कोष्ठोनितामताः ॥

अधः पङ्क्तौतु पष्ठाङ्कस्थाने तुर्योऽलयुज्यते ।
त्रियोगोयमधः षष्ठयुक्तःस्यात्परपङ्क्तिषु ॥

प्लुतोज्ञेयो गुरुस्थाने शेषन्तुगुरुमेरुवत् ।

					1	2	5	10		
1	2	3	6	10	18	31	55	96	168	296

प्लुतमेरुकोष्ठकम्

इति प्लुतमेरुः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ संयोगमेरुः ।

संयोगमेरावूर्ध्वाःस्युश्चतस्रः कोष्ठपङ्क्तयः ।
इष्टतालद्रुतमितैः कोष्ठैर्युक्तास्ततः परे ॥
द्वेपङ्क्ती स्वस्वपूर्वातो द्विद्विकोष्ठोनिते ततः ॥
द्वेषष्ठ्या एककोष्ठोने ततस्तिस्रोऽष्टमावलेः ।
एककोष्ठोनिताः पश्चाद्द्विद्विकोष्ठोनितेपरे ॥
पङ्क्तिभ्यां स्वस्वपूर्वाभ्यां तथैकैकोनितेपरे ।
आद्यासु चतसृष्वासां क्रमेण सकलद्रुताः ॥
समस्तलघवः सर्वगुरवः सकलप्लुताः ।
एकाङ्कयुक्तनिश्शेषकोष्ठाद्याः स्यात्परापुनः ॥
स्वयुक्तैः विषमैः कौष्ठैः समैस्त्वेकाङ्कसंयुतैः ।
कर्तव्या गुरुपङ्क्तेस्तु त्रयः कोष्ठा नभोन्विताः ॥
तुर्य एकाङ्कवानेवं चतुः कोष्ठाः पराअपि ।
प्लुतपङ्क्तौ सशून्याःस्युः पञ्चषष्टेस्तु रूपवान् ॥
षट् कोष्ठास्तद्वदन्याःस्युः षट्सु पङ्क्तिष्वनन्तरम् ।
द्वियोगजाः क्रमाद्भेदाः दलघू दगुरू दपौ ॥
लगौ लपौ गपौचेति तदङ्कप्रक्रियात्वियम् ।
अत्रोपरिष्टादारभ्य स्यादधोऽधोऽङ्कलेखनम् ॥
अन्त्यपूर्व द्वितीयाङ्क तुर्यषष्ठस्तथाक्रमात् ।
योज्या दलगपेषु स्युस्तेषु यद्योगजा भिदाः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पङ्क्तौतदङ्कयोगाङ्कं तत्कोष्ठे संभवाल्लिखेत् ॥
लेख्यपङ्क्त्युपरिश्रेणी यातिरश्चीतदाश्रिता: ।
अङ्का दलगपानांस्युराद्यकोष्ठचतुष्टये ॥
तेषु प्रस्तुतभेदस्य द्रुतादिव्यक्तिसंश्रितान् ।
अङ्कान् गृह्णीत तेप्यन्त्यद्वितीयाद्या द्रुतादिषु ॥
प्रस्तुतेषु विपर्यस्ता: स्युरंकाऽसम्भवेतुखं ।
त्रियोगजाश्चयेभेदा चतुर्योगभवाश्चये ॥
तत्पङ्क्तीनामपिज्ञेयमेवमेवाङ्कपूरणम् ।
किन्तु त्रियोगजाभेदा येत्वापिस्युर्द्वियोगजा: ॥
तेषां सन्निहिताद्यानां प्रागुक्तोऽङ्कविपर्यय: ।
चतुर्योगे तु चत्वारो येस्युर्भेदास्त्रियोगजा: ॥
तदङ्केष्वेव पूर्वोक्तं स्याद्विपर्यासयोजनम् ।
येचत्वारस्त्रियोगाश्च चतुर्योगोऽथपञ्चम: ॥
भेदास्ते पङ्क्तिषुज्ञेया: क्रमादन्त्यासु पञ्चसु ।
दलगा दलपाश्चेति दलपा लगपा: क्रमात् ॥
त्रियोगजाश्चतुर्योगभवा दलगपा इति ।
एष संयोगमेरु: स्यादतो ज्ञेयमिहोच्यते ॥
तिर्यक्पङ्क्तिस्थकोष्ठाङ्कै स्तै स्तैस्सर्वद्रुतादय: ।
ऊर्ध्वं पङ्क्तिगतामेया स्तदभावेतुशून्यता ॥
तावद्द्रुतोऽत्र ताल: स्यात् पङ्क्तिर्यावतिथीतिर: ।
उपरिष्टात्समारभ्य संख्यापङ्क्तयङ्कसङ्गते: ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

0	0	1	ऽ	डे											
1	1	0	0	0											
2	1	1	0	0	01										
3	1	0	0	0	2										
4	1	1	1	0	3	0ऽ									
5	1	0	0	0	7	2	0डे	1ऽ							
6	1	1	0	1	11	3	0	2	1डे	ऽडे	01ऽ				
7	1	0	0	0	20	4	2	0	0	0	6				
8	1	1	1	0	32	5	3	3	2	0	12	01डे			
9	1	0	0	0	54	9	4	0	0	0	32	6			
10	1	1	0	0	87	13	5	3	3	2	60	12	0ऽडे		
11	1	0	0	0	143	18	6	0	0	0	134	32	6	1ऽडे	
12	1	1	1	1	231	24	7	19	4	0	251	60	12	6	01ऽडे
13	1	0	0	0	376	35	14	0	0	0	500	122	20	0	24

संयोगमेरुकोष्ठकम्

इति संयोगमेरुलक्षणम् ।

अथ खण्ड प्रस्तारः ।

सांप्रतं द्रुतहीनादि खण्डप्रस्तारकीर्तनम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तद्भेदा मेरुभिः प्रोक्ता तत्संख्यातेषु मेरुषु
प्रस्ताररीतिः पूर्वोक्ता तत्संख्यातेषुमेरुषु ॥
प्रसाररीतिः पूर्वोक्ता विशेषस्त्ववधार्यताम् ।
निषेधोवा विधानं वा यस्यस्यादत्रयत्नतः ।
प्रतिपाल्यैव तं सर्वं पश्चादन्त्योविधिर्मतः

इति खण्डप्रस्तारः ।

अथ मेरुनष्टोद्दिष्टम् ।

अन्त्ये ऽङ्केन्यूनषष्ठाङ्के तद्धेत्वङ्कांश्च पातयेत्
द्रुतादयस्त्वपातेस्युः तत्रैवाथपुनर्विधिः
योयो न पतितस्तत्र तद्धेत्वङ्कांस्तु पातयेत्
यावदिष्टद्रुतादीनां लाभः पातेत्वयं क्रमः
शिष्टेऽङ्के शिष्टहेत्वङ्कान्पातयेत्पूर्वं पूर्वतः ।
एकाङ्कपातै र्लादीनां लाभःस्याद्युगपद्द्वयोः ।
पातेमहान्तं विलिखे देवमूह्यंयथोचितम्

इति चतुर्मेरुपङ्क्ति नष्टोद्दिष्टम्

उद्दिष्टपतितै रङ्कैर्न्यूनात्संख्याधिगम्यते ।

इत्युद्दिष्टम् ।

अथ विरामप्रस्तारः ।

द्रुतस्याधो विरामः स्याद्विरामद्रुतयोर्द्रुतः ।
प्रस्तारैः पूर्ववत्सर्वं एतद्बुद्ध्या विधीयते ॥

इति विरामान्त प्रस्तारः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एकाद्यङ्कानूक्रमान्न्यस्य युञ्जीतान्त्यं पुरातनैः ।
द्वित्रितुर्याङ्गाष्टमित्रैः योज्याङ्कंपुरतोलिखेत् ।
मुनिरुद्राङ्कयोरत्र प्रातिनिध्यं प्रचक्षते ।

इति सूची

अथनष्टम्

नष्टं ब्रुवे विरामस्य दीर्घोज्ञेयोमनीषिणा
तत्रास्य प्लुतचिह्नस्य तुर्याङ्कलिखितैरिह ।
द्रुतप्रस्तारवच्छेषं परमस्माद्विधानतः ।
ययारीत्या महत्तत्र तथैवोक्तस्तुतल्लघुः । इति नष्टम्

अथविराममेरुः ।

तत्र लेखाङ्करचनादिकं स्या द्द्रुतमेरुवत् ।
विराममेरौशेषःस्यात् विशेषस्तु परंकिल ।
अत्राष्टद्वादशांकस्य ग्रहःषष्ठोनन्चियते ।
अधः पङ्क्तौतुसर्वत्र प्रातिनिध्यं प्रचक्षते ।

इति विराममेरुः ।

सर्वमेरुश्चतत्रस्यान्नविशेषोऽस्तिकश्चन । इति सर्व मेरुः ।
अन्येपिसन्ति भूयांसा विरामान्ता प्लुताधिकाः
द्रुतहीनाश्च लध्वन्ता लघुहीनाः पृथक् पृथक् ॥

॥ सङ्गीतदर्पणे ताळाध्यायः समाप्तः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ नृत्याध्याय प्रारम्भः ॥

प्रणम्य सर्वदेवेशं शिवब्रह्मादिकं ततः ।
सङ्गीतशास्त्रं वक्ष्यामि ब्रह्मणायदुदाहृतम् ॥ १ ॥

दामोदरेण विदुषा चतुरेण कलाविदा ।
सङ्गीतदर्पणोनाम क्रियते कृतिनां मुदे ॥ २ ॥

अथानुक्रमणीं वक्ष्ये तत्रादौ मुखचालिका
यतिनृत्तं शब्दचालिरुडुपानि ध्रुवादिकम् ॥ ३ ॥

नानाविधं लागनृत्तं सूडशब्दमतः परम् ।
नानाविधं शब्दनृत्यं विदर्भि काडसञ्ज्ञकम् ॥ ४ ॥

सूडद्वये गीतनृत्यं नानागीताश्रितं ततः ।
चिन्दुनृत्यं ततः कुर्यात् तालचारीसमन्वितम् ॥ ५ ॥

देशीकट्टरिनृत्तं च वेंपोताख्यं ततः परम् ।
शब्दनृत्तं कल्पनृत्तं झकरी ध्रौपदं ततः ॥ ६ ॥

खण्डमानेन विविधं बहुरूपमिति क्रमः
पेरणी गोण्डलीचैव नृत्यमन्ययथोचितम्
अथैषां लक्षणं वक्ष्ये यथालक्ष्यागमोदितम् ॥ ७ ॥

इत्यनुक्रमणिका

Sl. 1—7 The several items dealt with in this chapter
(சுலோ. 1—7) விஷய அட்டவணை

अथ मुखचालिः । तत्र प्रथमं प्रमुलक्षणम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सङ्गीतमार्गकुशले वदान्ये भावुके नृपे

कलाभिज्ञैः समं सभ्यैः स्वस्थे रङ्गमधिष्ठिते ॥ ८ ॥

प्रविशेदथ रङ्गोर्वीं सांप्रदायिक वृन्दकम् ।

गातृवादक संघातो वृन्दमित्यभिधीयते ॥ ९ ॥

मुख्यानुवृत्तिमिळनं ताळकालानुवर्तनम् ।

मिथ स्त्रुटितनिर्वाहः त्रिस्थानव्याप्तिशाक्तिता ॥ १० ॥

शब्दसादृश्यमित्येते प्रोक्तावृन्दस्य षड्गुणाः ।

ततादिवाद्ययुक्तेन कर्तव्यं नृत्तकोविदैः ॥ ११ ॥

चत्वारोमुखगातारो द्विगुणास्समगायनाः ।

गायन्यष्टौ च तत्रोक्तास्तालधारीचतुष्टयम् ॥ १९ ॥

मार्दङ्गिकास्तु चत्वारो वांशिकानां चतुष्टयम् ।

एवञ्चोत्तमवृन्दंस्यात् कर्तव्यंच प्रयत्नतः ॥ १३ ॥

मध्यमंस्यात् तदर्धेन तदर्धेन लघुस्मृतम् ॥ इति वृन्दलक्षणम्

नृत्यादौ प्रथमं नृत्यं मुखचालिरितिस्मृतम् ।

अनिबद्धं निबद्धं च द्विधागीतं प्रयोजयेत् ॥ १४ ॥

ततो गणेशशब्दं च मङ्गळार्थं प्रयोजयेत् ।

मेलापकं वादयेयुः मुहरापरनामकम् ॥ १९ ॥

किञ्चित्स्थानकमाश्रित्य तिष्ठेज्जवनिकान्तरे

दधत्पुष्पाञ्जलिं पात्रं सौष्ठवैकनिकेतनम् ॥ १६ ॥

अन्तर्धानांशुके दूरीकृते चेतांसि पश्यताम् ।

मोदयन् प्रविशेद्रङ्गं मध्येपुष्पाञ्जलिं क्षिपेत् ॥ १७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अग्रतः क्षेपणाद्राजा पीड्यते दक्षिणेसभा ।
गुरुःपृष्ठे ततो रङ्गपीठान्तर्वामतः क्षिपेत ॥ १८ ॥

रङ्गपीठान्तरं यस्मात् ब्रह्मास्वयमधिष्ठितः ।
केचित्पुष्पाञ्जलौ संख्यां पुष्पाणामाचचक्षिरे ॥ १९ ॥

एकविंशतिमन्येतु नियमेनैव मेनिरे ।
प्रायशो नर्तनारम्भे संहतं च लताकरौ
चतुरश्रं भवेदङ्गं विशेषस्त्वयमुच्यते ॥ २० ॥

-अथवा समपादम्

वपुः स्वाभाविकं पादौ वितस्त्यन्तरिताववृजू ।
तत्र तत्समपादं स्यात् चतुराननदैवतम् ॥ २१ ॥

-तत्र संहतलक्षणम्

देहः स्वाभाविकोऽङ्गुष्ठौ पादयोश्चेन्मिथो युतौ ।
गुल्फौ च संहतौ तत्स्यात् पुष्पाञ्जलिविसर्जने ॥ २२ ॥

-तत्र लताकरलक्षणम् ।

पताकौ दोलितौ तिर्यक्प्रसृतौ तौ लताकरौ ।
संहतं च परित्यज्य चतुरश्रं ततः श्रयेत् ॥ २३ ॥

-तत्रचतुरश्र लक्षणम्

नन्द्यावर्तस्य चेदङ्घ्र्यो र्भवेदष्टादशाङ्गुलम् ।
अन्तरं चतुरैःस्थानं चतुरश्रं तदोदितम् ॥ २४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

-तत्र नन्द्यावर्तलक्षणम् ।

वर्धमानस्य चेदङ्घ्र्योरन्तरंस्यात्षडङ्गुलम् ।
वितस्तिमात्रमथवा नन्द्यावर्तं तदोदितम् ॥ २५ ॥

-तत्र वर्धमान लक्षणम् ।

वर्धमानेतु चरणौ तिर्यञ्चौ पार्ष्णिसङ्गतौ ॥
तत्रनीत्वासुलूगात्रं पात्रं सौष्ठवराजितम् ॥ २६ ॥

-तत्र सुलूलक्षणम् ।

मन्दानलचलद्दीप शिखेवाङ्गस्य चालनम् ।
सुलूशब्देन तत्त्वज्ञैः नटैस्तत्प्रतिपाद्यते ॥ २७ ॥

-तत्रसौष्ठवम् ।

कटीजानुसमायत्र कूर्परांसशिरस्समम् ।
उरस्समुन्नतं सन्नं गात्रं तत्सौष्ठवं भवेत् ॥ २८ ॥

-तत्रसन्नम्

सन्नं स्वस्थाननिष्क्रान्तं निषण्णं त्वचलस्थितिः ।
तलपुष्पपुटाख्येन ततः पुष्पाञ्जलिं क्षिपेत् ॥ २९ ॥

-तत्र तलपुष्पपुट लक्षणम् ।

चार्याध्यर्धिकया पादे त्रिनिष्क्रामतिदक्षिणे ।
व्यावर्तनात्करयुगे दक्षिणं पार्श्वमागते ॥ ३० ॥

परिवर्तनतो वामपार्श्वे सन्नतमाश्रिते ।
तत्कुचक्षेत्रसंविष्टो यस्य पुष्पपुटः करः ॥ ३१ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तलपुष्पपुटं तत्स्यात् पादेग्रतलचञ्चरे ।
एतत्पुष्पाञ्जलित्यागे लज्जायां च नियुज्यते ॥ ३२ ॥

-तत्र अध्यर्धिकाचारी लक्षणम् ।

सव्यस्य पृष्ठदेशे स्या द्वामः सव्यस्य पार्श्वगः ।
सार्धतालान्तरस्थश्च एवं वामस्य दक्षिणः ।
यत्र साध्यर्धिकान्वर्था प्रोक्तान्यैर्हंसपादिका ॥ ३४ ॥

-तत्र पुष्पपुट लक्षणम्

सर्पशीर्षौ मिलद्बाह्यपार्श्वौ पुष्पपुटो भवेत् ॥ ३५ ॥

-तत्राग्रतलसञ्चर लक्षणम्

यस्योत्क्षिप्तोभवेत्पार्ष्णिरङ्गुष्ठः प्रसृतस्तथा ।
अङ्गुल्यो न्यंचिता:सस्यात्पादोऽग्रतलसञ्चरः ॥ ३६ ॥
किञ्चिच्चाभिनयेन्नान्दीं पुष्पाञ्जलिविसर्जने ॥ ३७ ॥

"भवतां भूतये भूयाद्भवानी भववल्लभा ।
अङ्गीकृत सुसङ्गीत भङ्गी मुदित मानसा" ॥ ३८ ॥

-तत्रश्लोकाभिनयः ।

भवतां-पुरोदेशगतेन पताकेन ।
भूतये-शिरोदेशगताभ्यामलपल्लवाभ्यां ।
भूयात्-उद्वेष्टिताधोमुखगतेन पताकेन ।
भवानी-शिरोगतेन अञ्जलिना ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भव-मस्तकगत सूच्या

वल्लभा—हृदयगत चतुरेण ।

अंगीकृत-मुखस्थेन कपोतेन

सुसंगीत मुखदेशगतेन हंसास्येन

भंगी-कंपित पुरोदेशगतेन त्रिपताकेन ।

मुदित-अलपल्लवेन

मानसा-हृदय गतेनव्यावृत्त-परिवर्तित सन्दंशेन ।

मुखचारीगतं पाटं जकारादिक मुच्चरेत् ।

"जाहाङ्गने माहाङ्गने" ।

तत आविर्भवद्भावं नर्तनं मनसान्वितम् ॥ ३९ ॥

तत्तु सम्बन्त्रययुतं नृत्तहस्तै र्विभूषितम् ।

ताले र्द्वित्रि चतुर्भिश्च स्यात्कटेरन्तरं भुवः ॥ ४० ॥

तलमध्योर्ध्वसंचारास्त्यु स्तालमात्रा वितस्तिका ।

अङ्गुष्ठमध्यमाङ्गुल्यौ येहस्तस्यप्रसारिते ॥ ४१ ॥

तदग्रयोरन्तरालं तालमाहुर्मनीषिणः ।

चारीकरण संयुक्तं स्थानकैश्च समन्वितम् ॥ ४२ ॥

अङ्गैस्तथैवोपाङ्गैश्च प्रत्यङ्गैश्चाति सुन्दरम् ।

दक्षिणे प्राग्गतिं नीत्वा ततो वामे ततः पुरः ॥ ४३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ततः सकलदिक्चक्राभिमुखं गतिमाचरेत् ।
त्र्यस्रां च चतुरस्रां च गतिं सर्वत्र दर्शयेत् ॥ ४४ ॥
लहरी चक्रकादींश्च चालकान् कतिचिन्नयेत् ।
अत्रक्रियामनोहारि बाह्योश्चालकमुच्यते ॥ ४५ ॥
तत्र लहरी चक्र सुन्दरस्य लक्षणम् ।
नाभिक्षेत्रसमीपस्थे तिर्यग्लुठतिचैकके ॥ ४६ ॥
अपरन्तु पराचीन मान्दोळितककर्मणा ।
नीत्वा वामांसपर्यन्तं बहिरेव प्रसार्य च ॥ ४७ ॥
अमुमन्तःसमाक्षिप्य मूर्ध्नासव्यापसव्यमोः ।
विलोड्य पार्श्वयोर्मन्दं विलासेन तु यद्भवेत् ॥ ४८ ॥
प्रकीर्तितं तुतद्धीरै र्लहरीचक्रसुन्दरम् ।
रासकेनैव ताळेन लयत्रितयसंयुतम् ॥ ४९ ॥
लध्वादिताळो लोकेऽसौ रास इत्यभिधीयते ।

इत्यादिताळः

क्रियानन्तरविश्रान्ति र्लयस्स त्रिविधो मतः ॥ ५० ॥
द्रुतो मध्यो विलम्बस्तु द्रुतश्शीघ्रतमोमतः ।
द्विगुण त्रिगुणौ ज्ञेयौ तस्मान्मध्यविलम्बितौ ॥ ५१ ॥
विधाय नर्तनं हंसास्येन मानमथाचरेत् ।

इति मुखचालिः ।

Sl. 8. 'Prabhu' or the Patron presiding over the performance.

Sl 9-14. 'Brinda' or the group of singers and orchestra.

Sl. 14-51. 'Mukhachāli' or the Introductory Dance; 'Pushpānjali' or the flower-offering; and 'Nāndi' or the Benedictory verse.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

சு. 8. நாட்டிய அரங்கின் தலைவர்.
சு. 9-14. பாடகர், வாத்தியக்காரர்களின் கோஷ்டி.
சு. 14-51. 'முகசாலி' என்னும் ஆரம்ப நர்த்தனம்; 'புஷ்பாஞ்சலி' அல்லது மலர் சொரிதல்; 'நாந்தி' என்னும் மங்கள சுலோகம்.

अथेदानीनर्तनस्य भेदमाह :—

नाट्यं नृत्यं ताण्डवं च नृत्तं लास्यमिमा भिदाः ।
नर्तनस्याथ नृत्येतु विषमं विकटं लघु ।
पेरणी गोण्डली चैव नृत्यं दशविधं स्मृतम् ॥ ५३ ॥

-तत्र नाट्यलक्षणम् ॥

चतुर्धाभिनयोपेतं नाट्यमुक्तं मनीषिभिः ।
अथवा ; नाटकस्थितवाक्यार्थ पदार्थाभिनयात्मकम् ।
तदाद्यं भरतेनोक्तं रसभावसमन्वितम् ॥ ५४ ॥

-तत्र रस लक्षणम् ॥

विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः
आनीयमानः स्वादुत्वं स्थायीभावो रसः स्मृतः ॥ ५५ ॥

-तत्र भाव लक्षणम् ।

निर्विकारस्य चित्तस्य भाव स्या दादिविक्रिया ।

-तत्र विभाव लक्षणम् ।

तत्रज्ञेयो विभावस्तु रसज्ञापनकारणम् ॥ ५६ ॥
बुधैर्ज्ञेयोयमालम्ब उद्दीपन इति द्विधा ।
आलम्बनं नायक नायिकादि । उद्दीपनम् ।—
चन्द्रकिरण भूषणालङ्कारादि धारागृह ताम्बूलादि ॥ ५७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

-तत्रानुभावः ।

भावं मनोगतं साक्षात् स्वहेतुं व्यञ्जयन्ति ये ।
तेऽनुभावा इति ख्याताः कटाक्षहसितादयः ॥ ९८ ॥

-तत्र सात्त्विकः ।

सर्वेषामपि भावानां यैस्तु सत्त्वं विभाव्यते ।
ते भावा भावतत्त्वज्ञैस्सात्विकाः समुदाहृताः ॥ ९९ ॥

तेतु स्तम्भ स्वेदादयः ।:—

स्तम्भस्स्वेदोऽथ रोमाञ्चःस्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥ ६० ॥

-तत्र व्यभिचारिणः ।

विशेषेणाभिमुख्येन भवन्ति स्थायिनं प्रति ।
वागङ्ग सत्त्वाभिनयै र्ज्ञेयास्ते व्यभिचारिणः ॥ ६१ ॥
तेतु त्रयस्त्रिंशन्निर्वेदायः ।

-तत्र रसः ।

शृङ्गारहास्य करुणा रौद्रवीरभयानकाः
वीभत्साद्भुतशान्ताश्च रसानाट्येनिरूपिताः ॥ ६२ ॥

-तत्र तु स्थायिभावाः ।

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयन्तथा ।
जुगुप्सा विस्मयशमाः स्थायिभावाः प्रकीर्तिताः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

-तत्र रतिलक्षणं

यूनोरन्योन्यविषया स्थायिनी रति रुच्यते ॥ ६४ ॥

अन्योन्यमभिलाषः स्त्रीपुंसयो र्वासनामयः ।
भावः कटाक्षादिहेतुः श्रृङ्गारे बीज मुच्यते ।
प्रेमा मानः प्रणयः स्नेहो रागोऽनुराग इत्युक्तः ।
अङ्कुर पल्लव कलिका प्रसूनफलभोगभागियं क्रमशः ॥६५॥

-तत्र कटाक्ष लक्षणम् ॥

यद्गतागत विश्रान्ति वैचित्र्येण विवर्तनम् ।
तारकायाः कलाभिज्ञाः तं कटाक्षं प्रचक्षते ॥ ६६ ॥

तत्र त्रिविधः कटाक्षः । श्वेतः ।
श्यामः । श्वेतश्यामश्च ।

तत्र श्वेतः ।

करे वेणी मेणीसदृशनयना स्नानविरतौ
दधाना हर्म्याग्रे हरनयनतेजोहतमपि ।
इयं मुग्धा दुग्धाम्बुधिबहळकल्लोलसदृशा
दृशा वारंवारं मनसिजतरुं पल्लवयति ॥ ६८ ॥

-श्यामः ।

शिलासम्यक्धौतोज्ज्वलधवळधारापरिसरा
निमानन्तःश्यामा निवकुसुमबाणस्य विशिखान् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दृढप्रज्ञावर्माण्यपि हृदयमर्माणिरुजतः

कटाक्षानेणाक्ष्याः मुनिरपि न सोढुं प्रभवति ॥ ७० ॥

श्वेतश्यामः ।

अदृश्यन्त पुरस्तेन लेखाखञ्जनपङ्क्तयः ।

अस्मार्यन्त विनिश्वस्य प्रियानयनविभ्रमाः ॥ ७१ ॥

तत्र चतुर्धाऽभिनयं लक्षणम् ।

आङ्गिको वाचिकस्तद्वदाहार्यस्सात्विकोपरः ।

चतुर्धाभिनयस्तत्राङ्गिकोङ्गैर्दर्शितोमतः ॥ ७२ ॥

त्रिविधस्त्वाङ्गिकोदृष्टः शारीरो मुखजस्तथा ।

तथाचेष्टाकृतश्चैव शाखाङ्गोपाङ्गसंयुतः ॥ ७३ ॥

शारीरः शिरोहस्तकरणादिरङ्गविषयः ।

मुखजो नेत्र भ्रूविकारादिरूपाङ्गविषयः ॥ ७४ ॥

चेष्टाकृतस्तु निश्वसितोच्छ्वसिताक्षिपुटसम्मीलन

चत्मकारपतनघूर्णनादिः ।

तत्र शाखेति विख्याता विचित्रा करवर्तना ॥ ७५ ॥

इति शाखा । इत्याङ्गिकः ।

वाचा विरचितः काव्य नाटकादिस्तु वाचिकः ।

इति वाचिकः ।

आहार्यो हार केयूर किरीटादि विभूषणम् ॥ ७६ ॥

इत्याहार्यः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सात्विक स्सात्विकै र्भावैर्भावुकेन विभावितः ।

इति सात्विकः ।

-तत्र अभिनय लक्षणम् ।

अभिपूर्वस्तु णीङ् धातुराभिमुख्यार्थ निर्णये ॥ ७७ ॥

असात्मयोगं नयति तस्मादभिनयः स्मृतः ।

अर्थानामभिमुखीकरण मभिनयशब्दार्थः ॥ ७८ ॥

इति अभिनय लक्षणम् ।

-तत्र लोकधर्मी नाट्यधर्मीच ।

इतिकर्तव्यता तस्य द्विविधा परिकीर्तिता ।

लोकधर्मी नाट्यधर्मीत्येते च द्विविधे पुनः ॥ ७९ ॥

चित्तवृत्यर्पिका काचिद्बाह्यवस्त्वनुकारिणी ।

इति भेदद्वयं प्राहुः लोकधर्म्याः पुरातनाः ॥ ८० ॥

-तत्र चित्तवृत्यर्पिका

अलसवलितैः प्रेमार्द्रार्द्रैर्मुहुर्मुकुलीकृतैः

क्षणमभिमुखै र्लज्जालोलै र्निमेषपराङ्मुखैः ।

हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणैः ।

कथयसुकृती कोयं मुग्धेत्वयाद्यविलोक्यते ॥ ८१ ॥

अथवा :—सत्रासा इव सालसा इव लसद्गर्वा इवार्द्रा इव

व्याजिह्मा इव लज्जिता इवपरिश्रान्ताइवार्ताइव ।

त्वद्रूपे निपतन्ति कुन्तलपते वामभ्रुवामुल्लस

द्भ्रातावर्तित नर्तितोत्पल दळ द्रोणी द्रुहो दृष्टयः ॥ ८२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सत्रासा इत्यत्र त्रस्तादृष्टिः। उत्कम्पोत्फुल्लतारास्यात् त्रासे

त्रस्ता भ्रमत्पुटा। अथवा शङ्किताद‍ृष्टिः।

मुहुश्चलस्थिरा पार्श्वालोकिनी बहिरुन्मुखी।

गूढावलोकिनी शीघ्रनिवृत्ताच विलोकितात्।

शङ्कायां शङ्किताद‍ृष्टिरुक्तानिश्शङ्कसूरिणा ॥ ८३ ॥

साळसेत्यत्राभितप्ताद‍ृष्टिःविलोकनालसे तारे व्यथाप्रचलितौ पुटौ।

यस्याः सातप्तवङ्क्रान्ता सामितप्ताभिधीयते ॥ ८४ ॥

लसद्गर्वा इवेति मदिराद‍ृष्टिः।

आघूर्णमाना तारास्याद् मदिरातरुणेमदे।

आर्द्रा इवेतिस्निग्धाद‍ृष्टिः।

विकासि स्निग्धा मधुरा चतुरे बिभ्रती भ्रुवौ।

कटाक्षिणी साभिलाषा द‍ृष्टिः स्निग्धाभिधीयते ॥ ८५ ॥

अत्रैकभ्रूसमुत्क्षेपं आहुः कीर्तिधरादयः।

(इदं सार्धं पद्यं अत्र त्यक्तं

संगीत रत्नाकरात् उद्धृतम् ॥)

व्याजिह्माइवेति क्रुद्धाद‍ृष्टिः।

स्थिरोद्वृत्तपुटांरूक्षांकिञ्चित्तरळतारकां।

भ्रुटीकुटिलांद‍ृष्टिं क्रुद्धां ब्रूतेहरिप्रियः ॥ ८६ ॥

लज्जिताइवेति लज्जिताद‍ृष्टिः। मिथोपगामिपक्ष्माप्राप्यध

स्ताद्गततारका। पतितोर्ध्वपुटाद‍ृष्टिर्लज्जायां लज्जितामता ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिश्रान्ताइवेति श्रान्तादृष्टिः। अदूरालोकिनी ग्लाना

पुटाप्यलसचारिणी। पतत्तारा मनाक्कुञ्चत्प्रान्ताश्रान्ता

श्रमेमता ॥ ८८ ॥

आर्ता इवेतिकान्तादृष्टिः–

आपिबन्तीव दृश्यं.या सविकासातिनिर्मला। सभ्रूक्षेपक

टाक्षा सा कान्ता मन्मथवर्धिनी ॥ ८९ ॥

त्वद्रूपे। तत्ररूपं—पुरोदेशगताभ्यां पताकासन्दंशाभ्यां।

निपतन्ति—क्षिप्राधोमुखहंसास्येन। कुन्तलपते—

शिरोदेशगताभ्यां त्रिपतकाभ्यां।

अथवा। शिरोदेशगतेन त्रिपताकेन।

वामभ्रुवां—परिवाहितशिरसा खटकामुखहस्तेन।

उल्लसत्—उच्छ्रितपद्मकोशेन। वातावर्तित

मण्डलाकारसूच्या। नर्तित-कंपितालपल्लवेन।

उत्पल-विलसित कमलवर्तनया। दळ-त्रिपताकेन।

द्रोणी-सर्पशीर्षेण। द्रुहः सूचीद्वयसंयोगात्-

अथवा-बहिःक्षिप्ताङ्गुलिद्वंद्वत्रिपताकेन।

दृष्टयः-नेत्रगतचतुरेण।

इति चित्तवृत्त्यपिका।

-अथवाह्यनस्त्वनुकारिणी।

कस्तूरी तिलकं बाले भाले भल्लीवराजते।

भ्रूलताचापमाकृष्य न जाने कं हनिष्यसि ॥ ९० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कस्तूरी-नासादेशगतेन विचित्रवर्तनया हंसास्येन ।
तिलकम्-मस्तकदेशगतेन त्रिपताकेन ।
बाले-हृदयगतकाङ्गूलस्वस्तिकाभ्यां । भाले-शिरोदेशगत
पताकाभ्याम् । भल्ली-पृष्ठदेशगतेन खटकामुखेन ।
इव-नतोन्नत कर्तरीमुखेन । राजते —
पुरोदेशगतेन विचित्रकरवर्तनयालपल्लवेन ।
भ्रूलता-भ्रूदेशगतात्कर्णपर्यन्तं खटकामुखेन ।
चापं-शिखरेण ।
आकृष्य-पुरोगतात् कर्णपर्यन्तं खटकामुखेन
नजाने-कम्पितपताकेन । कं-विचित्रवर्तनया चतुरेण ।
हनिष्यसि-अधोमुखगतेन पताकेन ।
अथवा । इदं रुणद्धि मां पद्ममन्तःकूजितषट्पदम् ।
मयादष्टाधरं तस्याः ससीत्कारमिवाननम् ॥ ९१ ॥

इति लोकधर्मी ।

अथनाट्यधर्मी ।

आश्रित्य कैशिकीं वृत्तिं एकां नाट्योपयोगिनीम् ।
तद्योग्यां लौकिकीं शोभां करोत्यावेष्टितादिभिः ॥ ९२ ॥

अंशेनैवोपजीवन्ती लोकमन्या प्रवर्तते ।
नाट्यधर्म्या अपि प्राज्ञा भेदद्वंद्वमिदं जगुः ॥ ९३ ॥

इति नाट्यधर्मी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आङ्गिकाभिनयैरेव भावानेवव्यनक्तियत् ।
तन्नृत्यं मार्गशब्देन प्रसिद्धं नृत्यवेदिनाम् ॥ ९४ ॥

गात्रविक्षेपमात्रन्तु सर्वाभिनयवर्जितम् ।
आङ्गिकोक्तप्रकारेण नृत्तं नृत्तविदोविदुः ॥ ९५ ॥

नृत्तं तत्कथितं तज्ज्ञैरर्थहीनं सुरेखकम् ।
केवलं तस्योक्तव्यं नृत्तं ताललयाश्रितम् ॥ ९६ ॥

इति नृत्यनृत्तलक्षणम् ।

-तत्र अङ्गप्रत्यङ्गोपाङ्गभेदः । सङ्गीतरत्नावल्यां ।-

शिरोवक्षः करौपार्श्वं कटिश्चरणइत्यपि ।
षडङ्गानिभवन्त्येव कथितानि विपश्चिता ॥ ९७ ॥

उपाङ्गानि भ्रुवौनेत्रे नासागण्डस्थलाधरम् ।
चिबुकंचेतिषट् प्राहुर्नृत्ये नृत्यविशारदाः ।
प्रत्यङ्गानि पुनर्ग्रीवा बाहू पृष्ठं तथोदरम् ।
ऊरूजङ्घायुतंचेति षडुक्तानि मनीषिभिः ॥ ९८ ॥

तथाचरत्नाकरः ।

अङ्गान्यत्रशिरोहस्तौवक्षः पार्श्वे कटीतटम् ।
पादाविति षडुक्तानि स्कन्धावप्यपरे जगुः ॥ ९९ ॥

प्रत्यङ्गानित्विहग्रीवा बाहूपृष्ठे तथोदरम् ।
ऊरूजङ्घेषडित्याहुरपरे मणिबन्धकौ ॥ १०० ॥

जानुनी भूषणानीति त्रयमप्यधिकंजगुः
दृष्टिभ्रूपुटताराश्च कपोलौनासिकानिलः ॥ १०१ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अधरोदशनाजिह्वा चिबुकं वदनं तथा ।

उपाङ्गानि द्वादशेति शिरस्यङ्गान्तरेषुतु ॥ १०२ ॥

पार्ष्णीगुल्फौ तथाङ्गुल्यः करयोः पादयोस्तले ।

मुखरागश्च करयोः प्रचारः करणानिच ॥ १०३ ॥

इति रत्नाकरमते अङ्गप्रत्यङ्गोपाङ्गभेदः ।

अथाङ्गिकोक्तप्रकारमाह ।

शिरो नेत्रकरादीनामङ्गानां मेलनेसति ।

कायस्थितिर्मनोनेत्रहारीत्वेषा प्रकीर्तिता ॥ १०४ ॥

कटाक्षेणयुतेनेत्रे निर्मलं भ्रुकुटिद्वयम् ।

सुहासंवदनंचैव रूपमेतदुदाहृतम् ॥ १०५ ॥

अथवा । अङ्ग प्रत्यङ्गाकानां यः सन्निवेशो यथोचितः ।

सैवोक्ता जनताचित्तनयनानन्ददायिनी । इति रेखा ॥

प्रमाणं गीतवाद्याभ्यां नृत्यस्य समता भवेत् । इति प्रमाणम् ।

सम्प्रदायानुसरणं मुद्राहृदयरञ्जनी । इति मुद्रा ॥१०७॥

जवत्वं स्थिरता रेखा भ्रमरीदृष्टिरश्रमः ।

प्रीतिर्मेधावचो गीतिः पात्रप्राणा दशस्मृताः ॥ १०८ ॥

इति दशप्राणाः ।

यत्रमध्येन सत्त्वेन नैरन्तर्येण नर्तनम्

प्रमाणरेखया युक्तं मट्टनृत्यं प्रचक्षते ॥१०९॥इति मट्टः ।

यतो हस्तस्ततो दृष्टिर्यतो दृष्टिस्ततोमनः ।

यतोमनस्ततो भावः यतो भावस्ततो रसः ॥ ११० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अङ्गेनालम्बये द्गीतं हस्तेनार्थं प्रदर्शयेत् ।
चक्षुर्भ्यां भावमित्याहुः पादाभ्यां ताळनिर्णयः ॥ १११ ॥

इति नृत्यविधिः ।

(Sl. 55-111). Nāṭya and its principal features:—

i. 'Rasa' or āesthetic enjoyment (Sl 55).

ii. Its emergence from the representation of heights of emotion with the help of :

(*a*) Bhāvas (emotional changes)

(*b*) Vibhāvas (favourable surroundings).

(*c*) Anubhāvas (accompanying features)

(*d*) Sāttvikabhāvas (involuntary physical changes due to emotions.)

(*e*) Vyabhichāribhāvas (characteristic minor emotional changes due to particular heights of emotion) (Sl. 56-61):

iii. The 9 Rasas and the coresponding heights of emotion-(eg) 'Sriṅgāra' (erotic) and its corresponding emotion of Rati (conjugal felicity).

'Kataksha' or fond look with a meaning through the corner of the eye; its 4 varieties illustrated by concrete instances. (Sl. 62-71)

iv. 'Abhinaya' or visual representation and its 4 kinds:—

Āngika (of the body)

Vāchika (by speech)

Āhārya (by make-up and stage-setting)

Sāttvika (by involuntary physical changes due to deep emotions) (Sl. 72-80):

v. The 2 modes of acting:—

Loka Dharmi (realistic or natural)

Nāṭya Dharmi (conventional) (Sl. 81-93)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

vi. Nritya (Dance accompanied by Abhinaya) and Nritta (Pure Dance with graceful poses) (Sl. 94-96)

vii. The Angas (principal features), Upangas and pratyangas (subsidiary features) used for Abhinaya (97-103).

viii. A few technical terms in Dance:—

(a) Rekha (attractive pose).

(b) Pramāṇa (rhythm and harmony with vocal music and orchestra).

(c) Mudra (grace and faithfulness to tradition in gestures etc.) (104-107).

xi. The 10 good points of a dancer:-

Quickness, firmness, attractive pose, easy rotation of body, expressive look, endurance, affability, intelligence and memory, clear enunciation and sweet music. (107-109).

x. Malla Nritya (the most common Dance in South India) (—109).

xi. The 2 most important rules for dance. (110-111).

(சு. 53-111) நாட்டியமும் அதன் முக்கிய அம்சங்களும்:—

i. 'ரஸம்' அல்லது சுவை (சு. 55)

ii. நாட்டியத்தில் சுவையுற்பத்திக்குக் காரணமானவை:—

(a) பாவங்கள் (உணர்ச்சிகள்)

(b) விபாவங்கள் (அனுகூலமான சூழ்நிலை)

(c) அநுபாவங்கள் (பிரதான உணர்ச்சியுடன் இணைந்த உணர்ச்சிகள்)

(d) சாத்துவிக பாகங்கள் (மனதில் உணர்ச்சிப் பெருக்கு ஏற்படும்போது தேகத்தில் தானக ஏற்படும் விளைவுகள்-கண்ணீர் முதலியன).

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(e) வ்யபிசாரிபாவங்கள் (குறிப்பிட்ட உணர்ச்சிப் பெருக்குக்கே உரிய ஏனைய உணர்ச்சிகள்). (சு 56-61)

iii நவரஸங்களும் அவைகளுககுரிய ஸ்தாயி பாவங்கள் என்னும் உணர்ச்சிப் பெருக்குகளும் :

உதாரணமாக, சிருங்கார ரஸமும் அதற்குரிய ரதி என்னும் சிற்றின்பமும்.

கடைக்கண் பார்வைகளின் வகை 4 —உதாரணங்களுடன் (சு. 62-71)

iv 'அபிநயம்'; அதன் 4 வகை :-

ஆங்கிகம் (உடல் உறுப்புக்களால்)
வாசிகம் (பேச்சு)
ஆஹார்யம் (நகை, உடை, சின் முதலியன)
சாத்துவிகம் (உணர்ச்சிப் பெருக்கின் விளைவுகள்) (சு. 72-80)

v நடித்தல் முறைகள் இருவகை :—
லோகதர்மி (இயற்கையைப் பின்பற்றுவது)
நாட்டியதர்மி (கலைஞரின் கட்டுப்பாடுகளைப் பின் பற்றுவது). (சு. 81-93)

vi நிருத்தியமும் (அபிநயத்தோடு சேர்ந்த நர்த்தனம்), நிருத்தமும் (சுத்த நர்த்தனம்). (சு. 94-96)

vii அங்க, உபாங்க, பிரத்தியங்கங்கள் (உடல் உறுப்புக்களின் பிரிவினை) (சு. 97-103)

viii நாட்டியத்தில் வழங்கப்படும் சில பரிபாஷைச் சொற்கள் :—

(a) 'ரேகை' (எழில் நிறைந்த நிலை)

(b) 'பிரமாணம்' (பாட்டும், வாத்தியமும், நர்த்தனமும் காலம் முதலியவைகளில் ஒத்திருப்பது)

(c) 'முத்திரை' (சம்பிரதாய சுத்தமும் அழகும் நிறைந்திருக்குமாறு கைகாட்டல் முதலியன)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ix நாட்டிய பாத்திரத்தின் குணங்கள் (பாத்திரப்ராணன் கள்) 10 :—

துரிதம், ஸ்திரத்தன்மை, அழகுவாய்ந்த அங்க அமைப்பு, பாவ பூர்ணமான பார்வை, களைப்பின்மை, பிரியமான தோற்றம், புத்தி நுட்பம், உச்சரிப்பில் அக்ஷர சுத்தம், இனிய கீதம்.

x 'மட்ட' நிருத்தியம்.

xi நர்த்தனத்திற்கான முக்கியமான விதிகள் 2.

अथ सप्तगतयः ।

भानवी मैनवी चैव गजलीला तुरङ्गिणी ।
हंसी मृगी खञ्जरीटी गतयः सप्तधा त्विमाः ॥ ११२ ॥

भानोर्गतिरिवालक्ष्या या स्यात्पात्रस्य नृत्यतः ।
सा भानवीगतिः सद्भि र्भाषिता जनरञ्जनी ॥ ११३ ॥

इति भानवी ।

कूपान्तर्गतमीनस्य विश्रान्तिरहितागतिः ।
यथा तथैव नटनी यास्यात्सामैनवीमता ॥ ११४ ॥

इति मैनवी ।

गतिर्मन्दा विलासेन मत्तकुञ्जरवद्भवेत् ।
नटस्य यत्रनृत्येतु सागतिर्गजगामिनी ॥ ११५ ॥

इति गजगामिनी ।

अभ्र(भ्र)मं यागतिश्शीघ्रं वाचो. व्यावर्तनोत्तरा ।
असौ तुरङ्गिणी सद्भिः कथिता गतिवेदिभिः ॥ ११६ ॥

इति तुरङ्गिणी ।

अयं श्लोकः संगीतमकरंदे प्रमाणी-
कृतः । तत्र पाठान्तरं यथा :—

अतीव यागतिः शीघ्रं वाय्योर्व्यावर्तनोत्तरा
असौतुरंगिणीसद्भिः कथिता गतिकोविदैः ' इति ॥११७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हंसस्येव गतिर्मन्दा मन्दव्यावर्तनोत्तरा ।
या विशाला हंसिनी सा नर्तने कथिता बुधैः ॥ ११८ ॥
इति हंसिनी ।

मृगीवचकिताङ्गी याऽनुरक्ता नर्तकीयदा ।
गतिंतुरचयेन्नृत्ये सामृगी परिकीर्तिता ॥ ११९ ॥
इति मृगी ।

समपादं समारभ्य यागतिर्द्रुतमानतः ।
खञ्जरीटखगस्येव खञ्जरीटा भवेदसौ । इति खञ्जरीटी ।
भानवी गजलीलाच हंसिनी च तथा परा ।
एतास्तिस्रो बुधैर्लास्ये नृत्येच परिकीर्तिताः ॥ १२१ ॥

मैनवी खञ्जरीटी च तद्वदन्यातुरङ्गिणी ।
इमास्स्युर्गतयस्तिस्रः ताण्डवे शिववल्लभे ॥ १२२ ॥

ताण्डवे लास्यनृत्येच मृगीसद्भिर्मतागतिः । इति गतयः ।
अथवा । लावो हंसोमयूरश्च हयः कुञ्जर एवच ।
तित्तिरः कुक्कटो मीनोप्यष्टधा गतयो मताः ॥ १२३ ॥
इति मतान्तरेगतयः ।

(Sl. 112-123) The seven gaits.
(ச. 112-123) ஏழு வகை கதி பேதங்கள்.

अथताण्डवम् ।

वीर रसे महोत्साहे पुरुषो यत्नृत्यति
रौद्रभावरसोत्पत्ति तत्ताण्डवमिति स्मृतम् ॥ १२४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथाच रत्नाकरमते ।

तण्डूक्तमुद्धतप्रायप्रयोगं ताण्डवम् मतम् । इति ताण्डवम् ।

अथलास्यम्

यौवनस्त्रीविलासिन्यः कामभावविचक्षणाः
यदङ्गहारवैदग्ध्यात्कुर्युर्लास्यमुदीरितम् ॥ १२९ ॥

तथाच रत्नाकरमते

लास्यन्तु सुकुमाराङ्गं मकरध्वजवर्धनम् । इति लास्यम् ।

(Sl. 124-125) Tandava (male dance) and Lasya (Ladies' Dance)

(சு. 124-125) தாண்டவமும் (ஆடவர் நர்த்தனம்), லாஸ்யமும் (ஸ்த்ரீ நர்த்தனம்)

अथ मुखरागः ।

ईषद्धास्यः प्रसन्नास्यो मुखरागो भवेद्द्विधा ।
सहजोऽसहजश्चेति प्रसन्नः कान्तिभूषित । अथवा
स्वाभाविकः प्रसन्नश्च रक्तश्श्याम श्चतुर्विधः ।
स्वाभाविकस्तु सहजः स्वभावाभिनये भवेत् ॥ १२७ ॥

इति स्वाभाविकः ।

प्रसन्नो मधुरः सस्यात् शृङ्गाराद्भुतहास्ययोः । इति प्रसन्नः ।
रक्तस्स्याद्रोहितोवीरेकरुणेऽद्भुतहास्ययोः ॥ १२८ ॥

इति रक्तः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्यामोन्वर्थस्तु विज्ञेयः सबीभत्से भयानके। इति श्यामः।

इति चतुर्धा मुखरागः।

(Sl. 126-128) Mukharaga (emotions colouring the face)

(சு. 12-6128) முகராகம் (முகவர்ண மாறுதல்)

अथ नान्दी।

केयं नान्दी नाम उच्यते।

सूत्रधारस्य देवस्तुति समाश्रयादाशीर्वादात्मिका नान्दी।

सूत्रधारः पठेत्तत्र मध्यमं स्वरमाश्रितः।

नान्दीपदै द्वादशभिरष्टभिर्वाप्यलङ्कृतम् ॥ १२९ ॥

अत्र पदशब्देन सुप्तिङन्तं गृह्यत इत्येके।

श्लोकचरण इत्यपरे। इति नान्दी।

Sl. 129. Nandi (Benedictory verse)

சு. 129. நாந்தி (மங்கள சுலோகம்)

अथ नटलक्षणम्

चतुर्धाभिनयाभिज्ञो नटोभाषादिभेदवित्। इति नटः।

नर्तकः सूरिभिः प्रोक्तो मार्गनृत्ये कृतश्रमः ॥ १३० ॥

इति नर्तकः।

Sl. 130. Nata (Dancer) and Nartaka (Expert in classical Dance)

சு. 130. நடன் (கூத்தன்); நர்த்தகன் (புராதன நர்த்தனத்தில் வல்லவன்)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ यतिनृत्यम्

कूटाक्षराभ्यां काभ्यांचित् निर्मितोऽत्यन्तकोमलः ।
एकरूपाक्षरश्चच्चत्पुटताळानुगोयदा ॥ १३१ ॥

वाद्यते यो वाद्यखण्डो विरामै र्भूरिभिर्मुहुः ।
यतिरेषा तयानृत्यं चतुर्दिक्षुमनोहरम् । अथवा :—

हरवक्त्रोद्भवैः पाटैः कूटैरत्यन्तकोमलैः ।
अष्टताल्यैकताळ्यावा विरामैर्भूरिभिर्मुहुः ॥ १३३ ॥

यो निर्मितो वाद्यपाटैर्वाद्यभेदो यतिस्स्मृतः ।
कूटाक्षरैः क्रमेण स्यात् आघातः पादयोः समः ।
पार्श्वाङ्गुळी मूलपार्ष्णि चरणाग्रेणचक्रमात् ॥ १३४ ॥

दौ लौ भवेदष्टताली । इत्यष्टताली ।

अथ यतिवाद्याक्षराणि ।

तत्त तत्तथा-दाधि क्किटक्कथो—तक्किट तक्किट
धि किट—धिक्किट तथोंगा थोंगा थैताति थैथा
ति थै थै थै ति थै थै थै था

इति यतिनृत्यम्

(Sl. 131-134) Yati Nritya (Dance to the accompaniment of a musicial piece composed of soft syllables of instrumental sounds)

(சு. 131-134) யதி நிருத்தியம் (வாத்ய அக்ஷரங்களால் தொகுக்கப்பட்ட 'சொல்லுக் கட்டை' யனுசரித்த நர்த்தனம்)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ शब्दचालिं लक्षयति

प्राग्वत्कृत्वा स्थानहस्तौ मध्यसञ्चेन नर्तकः ।
यत्रस्थित्वैकपादेन शब्दवर्णानुगामिनीम् ॥ १३५ ॥

गतिं नयेद्द्वितीयेन दक्षिणाध्वनि शोभनम् ।
तद्वत्पादान्तरेणाथ क्रमेणैतदृद्वयोर्यथा ॥ १३६ ॥

पर्यायेण गतिं कुर्या द्वार्तिकादिषु पञ्चसु ।
मार्गेष्वसौ शब्दचालिः पण्डितैश्चनिरूपिता । अथवा :-
मार्गतालैः क्रमेणैव आदितालेननर्तनम् ।
शब्दचालिस्तदा प्रोक्तालक्ष्यदृष्ट्याविचक्षणैः ॥ १३८ ॥

शब्दवर्णो यथा । तकुकु ढिंका । झिंकुझिंका
झिंकुकुथरिक्किट थरिक्किट झिं का झिं
थरिकि।थरिक्किथोम् ॥

वार्तिके तुचतुर्मात्रा कळाचित्रे
द्विमात्रिका । मात्राच ध्रुवकेचस्यात् अर्धाचित्रतरे मता ॥

अथचित्रतमेमार्गे कलाचानुद्रुतसंज्ञिका ।
स्थानकैश्च तथा चारीखण्डमण्डलसंयुता ॥ १४० ॥

करणैश्चाथहस्तैश्च प्रमाणेन विभूषिता ।
शब्दचालिस्तथाज्ञेया संप्रदायागतक्रमात् ॥ १४१ ॥

-तत्रस्थानचार्यादिः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्थानं स्थितिर्गतिश्चारी स्थानमाद्यंतयोर्गते: ।
तत्रैकपादगति: पादचारीशब्देनकथ्यते ॥ १४२ ॥

पादद्वयेन करणं तन्नृत्यकरणात्पृथक् ।
करणै:स्यात्त्रिभि: खण्डो मण्डलं खण्डकैस्त्रिभि: ॥ १४३ ॥

चतुर्भिर्वा क्रमात्ताळे त्र्यश्रे च चतुरश्रके ।

इति शब्दचालिनृत्यम् ।

(Sl, 135-143) Sabda Chali Nritya (Symmetrically repeated dance to the accompaniment of syllables of instrumental sounds in the 5 margas or provincial modes of varied paces)

(சு, 135-143) சப்தசாலி நிருத்யம் (இடசாரி வலசாரியாக வாத்ய அக்ஷரங்களை அனுசரித்துச் செய்யப்படும் நர்த்தனம்)

अथेदानीं उडुपान्युच्यन्ते

तत्र द्वादश उडुपानि:—

नेरि: करणनेरिश्च मिश्रं चित्रं तथा भवेत् ॥ १४४ ॥

नत्रं च जारमानश्च मूरुरिट्ट(पिल्ल)मुरुस्तथा ।
हुलं च लावणीज्ञेया कर्तरी तुलुकन्तथा ॥ १४५ ॥

प्रसरं च द्वादशस्यु रुडुपानियथाक्रमम् ।
आदिताळानुगंयत्त विलम्बितलयान्वितम् ॥ १४६ ॥

रेखामुद्राप्रमाणाढ्यं नानाकरविभूषितम् ।
दिक्चक्राभिमुखं नृत्तं नेरिरित्यभिधीयते । इति नेरि: ।

अयं करणसंयुक्तो मत:करणनेरुक: । इति करण नेरि: ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स एवद्रुतमानेन नडनेरिरितिस्मृतः । इति नडनेरिः ।

रसभावादिपुष्ट्यास्याद्भावनेरिस्स एवतु । इति भावनेरिः ।

शुद्धैरेवपताकाद्यैः शुद्धनेरिरिहोच्यते । इति शुद्धनेरिः ।

मिळितैस्संयुतैर्हस्तैः सालङ्कं भेदमादिशेत् । इति सालङ्गनेरिः ।

असंयुतैस्संयुतैश्च नृत्यहस्तैस्तथैव च ॥ १९० ॥

सङ्कीर्णनेरिंतां प्राहुः नृत्येनृत्यविशारदाः ।

इति सङ्कीर्णनेरिः ।

भ्रुवाऽतिचित्रमार्गाभ्यां गतिसङ्कोचसंयुतम् ॥ १९१ ॥

यत्ररूपकताळेनाप्यसङ्कुचचालकान्वितम् ।

नर्तनं स्यात्त्रिसञ्चैस्तु तद्भिन्नमभिधीयते । इति भिन्नम् ।

विचित्र चालकोपेतं रेखासौष्ठवशोभितम् ।

एकताळ्याचित्रतरे मार्गे चित्रं तदोदितम् ॥ १५३ ॥

रूपकेणवा 0 । 0 0 ते, थै । इति चित्रम् ।

क्रीडाताळानुगं बालक्रीडासाधनचक्रवत् ।

यतीनां यत्रसङ्कोचप्रसरौ नत्रमीरितम् ॥ १५४॥ इति नत्रम् ।

समाच विषमासूची खुलंस्यान्मध्यमानतः ।

इति खुल्लम् ।

आदिताळेन चेद्दिक्षु जारमानन्तदोदितम् । इति जारमानम् ।

उत्कटस्थानकेस्थित्वा शरीरं सरळंयदा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मोटयेत्तिर्यगभितः क्रीडातालानुगौ मुहुः ।
त्रिपताकौ समाक्षिप्य ,सर्वतः सामुरुर्मता ॥ १५६ ॥

-तत्रोत्कट लक्षणम्

समासनमसंस्पृष्ट भूतलं चरणौ समौ ।
यदा तदोत्कटं योगध्यानसन्ध्याजपादिषु । इत्युत्कटम् ।
अथवा आदिताळः । इति मुरुः ॥ १५७ ॥

उत्क्षिप्यपादमेकंचेत् डोलयेल्ललितंवपुः ।
लघुशेखरताळेन मुहुर्हुल्लंतदोच्यते ॥ १५८ ॥ इति हुल्लम् ।
पश्चमेनकटेरूर्ध्वं भ्रामयेल्लावणीतदा ॥ इति लावणी ॥
समपादेनादिताळे द्रुत्यासव्यापसव्यतः ॥ १५९ ॥
स्वस्तिकीकृत्यजङ्घेचेत् भ्राम्येतांकर्तरींजगुः । इति कर्तरी
गजलीलेन ताळेन नर्तनंसर्वेदिङ्मुखम् ॥ १६० ॥
सौष्ठवाधिष्ठितं यत्र तत्तुल्लमभिधीयते । इति तुल्लम् ।
मुहुः प्रसारिताविद्धबाहूतदनुसारिणौ ॥ १६१ ॥
चरणावादिताळेन प्रसरो मध्यमानतः । इति प्रसरम् ।

इति द्वादश उडुपानि ॥

(Sl. 114-161) The 12 varieties of 'Udupas' or quick-movement dances with 'Bhramaris' (rotation movements) in various postures and chālakas (graceful waving of hands):—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

1. Neri 2. Karananeri 3. Bhinnam 4. Chitram 5. Natram 6. Jāramanam 7. Muru 8. Hullam 9 Lāvaṇi 10. Kartari 11. Tullam 12. Prasaram.

(சு. 144-161) 'உடுபம்' (துரித காலச் சுற்று முதலிய அசைவுகளுடன் கூடிய நர்த்தன வகை) 12 :—

1. நேரி 2. கரணநேரி 3. பின்னம் 4. சித்ரம் 5. நத்ரம் 6. ஜாரமானம் 6. முரு 8. ஹுல்லம் 9. லாவணி 10. கர்த்தரி 11. துல்லம் 12. ப்ரஸரம்.

इदानीं ध्रुवाड लाग नृत्तमाह ॥

उत्प्लुत्याद्यैर्यदानृत्ये करणैस्तालसम्मितैः ।

तदोत्प्लुत्यादिकरणं नृत्यं नृत्तविदोविदुः ॥ १६२ ॥

इदमेव नटा ध्वाडनृत्तं नाम्ना प्रचक्षते ।

अथवा प्रकारान्तरेण लक्षणमाह :-

आकाशचार्यो द्वित्राश्चेत्ततश्च तिरिपं भवेत् ॥ १६३ ॥

अन्तेमुरू तदादिष्टं ध्वाडनृत्यं नटोत्तमैः । अथवा ।

लागद्वये ऽत्वैकपादं पश्चात्तुतिरिपं भवेत् । इति ध्रुवाडनृत्तम् ।

अथ लागनृत्यम् ।

लागशब्देन कर्णाट भाषयायत्र चोत्प्लुतिः ।

सुल्कबद्धैकपादेन सहैवानुपतेद्यदि ॥ १६५ ॥

द्वितीयोपि तदा रायरङ्गालं तद्विदोविदुः ।

इति रायरङ्गालः ।

सुलूं बद्ध्वातदोत्प्लुत्य चरणौ पक्षिपक्षवत् ॥ १६६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भ्रमित्वा निपतेद्भूमौ तदाऽडालमितीरितम् । इत्यडालम् ।

सुलपूर्वं यदोत्प्लुत्य मिळितौ चरणौ समौ ॥ १६७ ॥

दूरं भूमौनिपततः सनिश्शङ्कः प्रकीर्तितः ।

इति निश्शङ्कः ।

अलातं परिवर्त्याङ्गं पादपृष्ठगतं यदा ॥ १६८ ॥

अलातांघ्रौ पृष्ठगते शीघ्रमन्येनलंघयेत् ।

लङ्घयेदङ्घ्रिणान्येन प्रोक्ताहुरुमयीनटैः ॥ १६९ ॥

इति हुरुमयी ।

पुरः प्रसार्यचरणं लङ्घयेदपराङ्घ्रिणा ।

सूलपूर्वं तदान्वर्था प्रोक्ता लङ्घिकजङ्घिका ॥ १७० ॥

इति लङ्घिकजङ्घिका

तांमण्डमाहुः कर्णाटा स्त्विदमेव यदापुनः ।

मिळितौ पुरतः पादावडन्तरमितीरितम् ॥ १७१ ॥

इत्यडन्तरम् ।

उत्प्लुत्य चरणद्वंद्वं वस्त्रनिष्पीडनोपमम् ।

परिभ्रम्यावनींयाति यदितद्दिण्डुरुच्यते । इति दिण्डुः ।

पादौ समौ यदान्यस्मिन्पार्श्वे त्वपरपार्श्वतः ।

उत्प्लुत्य पादयोश्चित्रं तदाढेङ्कीति कथ्यते । इति ढेङ्की

भूमावेकं समास्थाय द्वितीयं पूर्ववद्यदा ।

भ्रातयेच्चरणं चारु तं वीसं चतुरो ऽब्रवीत् । इति वीसम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यदिमण्डी मधिष्ठाय प्रसृतौ भ्रमतः करौ ।
तदा तं नटशार्दूलाः पक्षिशार्दूलमूचिरे ॥ १७५ ॥

इति पक्षिशार्दूलः । इति ध्रुवाड लागनृत्तम् ।

(Sl. 162-175) Dhruvāḍalāga Nritya and its varieties.

(ஸ. 162-175) த்ருவாடலாக ந்ருத்தியத்தின் வகைகள்.

अथ शब्दनृत्तं प्रारभ्यते ।

अङ्गैर्द्रुतादिमानं स्यात् तत्तत्कारं च पादयोः ।
वाद्याक्षरं रसैर्युक्तं शब्दनृत्तं तदा भवेत् ॥ १७६ ॥

गात्रेनटः स्वरानङ्गैर्भावान् लोचनचेष्टितैः ।
पादाभ्यां दर्शयेत्तालं लयान् शब्दाक्षराण्यपि ॥१७७ ॥

ताळधारिण्यभिव्यक्त तादिकं वर्णसञ्चयम् ।
समुच्चरति षड्जादीन् मगणादिगणान्वितम् ॥ १७८ ॥

चतुरश्रं समाधाय विधाय शिखरंकरम् ।
नाभावेकमुरोदेशेऽप्यपरं पुरतःकरम् ॥ १७९ ॥

पताकहस्तकाद्यन्यतमं कुर्यात्प्रयत्नतः ।
आद्यशब्दाक्षरोत्पत्तिहेतुकं सुभगं ततः ॥ १८० ॥

एकपादं पुरस्सूची परं चरणमञ्चितम् ।
पश्चान्न्यस्यायतं हस्तं तत्तत्कारसमं यदा ॥ १८१ ॥

व्यावर्तयेच्चमेवाङ्घ्रिं नयेत्पश्चात्तथापरम् ।
नाभौ तदूर्ध्वकुचयोः स्कन्धयोः शिखरौकरौ ॥ १८२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीतेऽथ शब्द उडुपे लगेस्थाप्यौ क्रमात्पुनः ।
करणै नृत्यहस्तैश्च चारीस्थानकसम्मिता ॥ १८३ ॥

शब्दप्राधान्यतोज्ञेया वाद्याक्षरविवेकतः ।
वाद्याक्षराणि यथा । तद्धि त्थोंठेंनं ॥ १८४ ॥

शब्दनृत्तं द्विधात्रैक मक्षरैक प्रधानकम् ।
स्वरप्रधानमपरं नर्तनं यत्र जायते ॥ १८५ ॥

वाद्यप्रबन्धाये पूर्वं उक्तास्तेनैव सूरयः ।
दाक्षिणात्या जगुश्शब्दाभिधेया नृत्यकर्मणि ॥ १८६ ॥

तत्र प्रथमं ध्रुवस्योदाहरणम् । तक्कं दिक्किण्णक
जक्क जक्क ढिंढिं झक्क किंग कक्किण जकक्क जकक्क-
त्तकु कुडि किण ॥ १८७ ॥

जक्क झण कुथ डिक्कि तक्किर्ण जथ डिकिट तक्किण जकणक
किटनक किथा । इति ध्रुवशब्दाः ।
एवमन्येपि शब्दाः लक्ष्ये द्रष्टव्याः ॥ १८८ ॥

इति सूडशब्दनृत्तम् ॥

अथ विवर्तना नृत्तम् ।

दक्षिणांगेऽथवामाङ्गे स्वरपाटगतं यदि ।
नृत्तं विवर्तनाख्यं स्यात् अङ्गोपाङ्गसमन्वितम् ॥ १८९ ॥

ध्रुवताळेन चेन्नृत्यं सर्वलोक मनोहरम् ।
अथोदाहरणं । ध्रुवतालः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ढिं ढिं ढिं णक्का-क्रिणक्का था ढै गाढैं टाकिण थोंगा

थोंग। इति विवर्तना नृत्तं। अथ चमत्कार नृत्तम्।

मिळितौ यत्र हस्तौ च यथाक्षरसमन्वितम्।

अक्षराणां प्रधानं स्याच्चमत्कारं प्रचक्षते ॥ १९२ ॥

गारुगि ताळेन युतं शोभनं सर्वतोमुखम्। उदाहरणम्।

ततत थाथा। ततकु कु त्तथा। कुनक्रिट ककुथरिकिट

कुकुं थरिंकि। झनक्रिट कुथाडित्था-इति दक्षिणभागे।

झन किट ककुथरिकिट।

ककुन्थरिकि झनकिट कुन्थडिद्धि। इति वामभागे।

तकुलोक तकधिक तोकधिकि तोक तधिकि।

तोका झनकिटकु टकुकुथ किटिथा ॥१९६॥ इति अङ्गद्वयेन

इति चमत्कार नृत्तम्

एवं कर्कट एरकट गण्डभेरुण्डइत्यादिशब्दाः ज्ञातव्याः।

कम्पितोच्छ्रितया किंचित्सूच्या झिं झिं प्रदर्शयेत् ॥

आउझनाम वाद्यस्याक्षरमेतत्।

अग्रे झिं झिं भवेत्कुक्कुपाटोऽउझभवोह्ययम् ॥ १९७ ॥

अग्रगोऽग्रेद्रुतं सर्पेन् प्रयोज्यःपङ्क्तिलक्षितौ।

मर्दितेनाथ थरिंःस्यात् मृदङ्गाक्षरसंम्भवः ॥ १९८ ॥

यस्तिरश्चा पदेनोर्वीं प्रमृद्नाति समर्दितः।

हरिणत्रासिताचार्या तुतुगोपाङ्गसंम्भवः।

समाभ्यां स्याद्दिगिदिगि मृदङ्गोत्थसमन्वितः ॥ १९९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्येऽपि सन्ति भूयांसः शब्दास्तेलक्ष्यवर्त्मनि ।
ग्रन्थ विस्तर भीरुत्वान्नोक्तं लक्षणवस्तुतः ॥ २०० ॥

इति शब्द नृत्तम्

(Sl. 176-200) Sabda Nritta and its varieties.
(ஃ. 176-200) சப்த நிருத்தம் - அதன் வகைகள்.

अथ गीत नृत्यम् ।

तदादिवर्ण संघाते गीतताळानुसारिणी ।
ताळधारिसमुद्गीते नृत्येत्पात्रं ससौष्ठवम् ॥ २०१ ॥

येन येन हि गीतेन तन्नाम्ना नृत्यमादिशेत् ।
स्थाय्यादिवर्णानङ्गेन भावान्नेत्राद्युपाङ्गकैः ॥ २०२ ॥

हस्तैरभिनयेदर्थान्पदवाक्यसमुद्भवान् ।
ताळग्रहा नङ्घ्रिभेदैः समादींश्च यथोचितम् ॥ २०३ ॥

अथ स्वरमण्ठ नृत्यम् ।

यस्य गीतस्य यो रागस्तत्र मुख्यास्त्रयः स्वराः ।
ग्रहांशन्यासभेदेन तत्र यः स्याद्ग्रहः स्वरः ॥ २०४ ॥

सस्वरोऽत्राभिनेतव्यः अंशन्यासस्वरौ तथा ।

अथ षड्जादीना मभिनयः ।

दक्षिणे नालपद्मेन वामेन चतुरेण तु ।
परिमण्डलितेनाथ मयूरललितेन च ॥ २०५ ॥

एवं विनिर्दिशेत्षड्जं कोविदो नाट्यनृत्ययोः ।

28

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ ऋषभाभिनयः ।

हंसास्याभिध हस्तेन दक्षिणे नेतरेणतु ।

कटिस्थेनार्धचन्द्रेण समेनशिरसा तथा ॥ २०६ ॥

ब्राह्मचाख्यस्थानकेनापि धीमान् ऋषभमादिशेत् ।

अथ गान्धाराभिनयः ।

शुकतुण्डेन हस्तेन दृष्ट्या करुणया तथा ।

अधोमुखेन शिरसाऽश्वक्रान्तस्थानकेन च ॥ २०७ ॥

चार्याप्युचितया धीमान् गान्धारं स्वरमदिशेत् ।

अथमध्यमाभिनयः ।

शैवाख्यस्थानकेनापि कटिच्छिन्नेनवापुनः ॥ २०८ ॥

दृष्ट्याचहास्यया धीरोऽभिनयेन्मध्यमं स्वरम् ।

अथ पञ्चमाभिनयः ।

कृत्वाऽलपल्लवौ हस्तौ धुतेनशिरसा तथा ॥ २०९ ॥

वैष्णवस्थानकेनापि दृष्ट्या कान्ताख्यया तथा ।

एवं विनिर्दिशेद्धीमान् स्वरं पञ्चमसंज्ञकम् ॥ २१० ॥

धैवताभिनयः ।

काङ्गूल हस्तकौ कृत्वा दृष्ट्या बीभत्सया तथा ।

परावृत्ताख्य मूर्ध्ना च प्रत्यालीढाभिधेन च ॥ २११ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्थानकेन विनिर्देश्यो धैवतो निपुणैर्नटैः ।

निषादाभिनयः ।

हस्तेन करिहस्तेन कटिहस्तेन दीनया ।
दृष्ट्या विधूतशिरसा निषादं सन्निरूपयेत् ॥ २१२ ॥

इति स्वराभिनयः

षड्जादीनामन्यतमः सोऽभिनेयोऽत्रहस्तकैः ।
व्यस्तैस्समस्तैः करणैः तलपुष्पपुटादिभिः ॥ २१३ ॥

तथोचितैः प्रतिदिशं तत्तत्कारानुसारतः ।
निस्सारुकेन ताळेन सपताकं प्रनृत्यच ॥ २१४ ॥

तेनकैं श्चालकोपेतैः प्रनृत्यध्रुवकेण च ।
विलम्बेन ततोनृत्येत् शब्दखण्डेन तत्परम् ॥ २१५ ॥

यतिगीतेनैकताळ्या यत्यावायत्रनृत्यति ।
हावभावादिसुभगं लास्यलीलामनोहरम् ॥ २१६ ॥

स्वरमण्ठकनृत्यं तदुक्तं नृत्यविशारदैः ॥ २१७ ॥

इति स्वरमण्ठनृत्यम् ।

अथ सालगसूडनृत्यम् ॥

ध्रुवोमण्ठोरूपकं च झंपाताळस्तृतीयकः ।
अष्टताळ्येकताळी च सप्तसालंगसूडकाः ॥ २१८ ॥

रत्नाकरमते । आद्यो ध्रुवस्ततो मण्ठः प्रतिमण्ठोनिसारुकः ।
अड्डताळस्ततोरास एकताळीत्यसौ मतः ॥ २१९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ शुद्धसूडनृत्यम् ।

एलाकरण ढेंकीभि र्वर्तन्या झोंबडेन च ।
लम्भरासैकताळीमिरष्टभिस्सूड उच्यते ॥ २२० ॥

अथ ध्रुवगीत नृत्यम् ।

ध्रुवेण चच्चत्कारान्तं पूर्वं पूर्ववदाचरेत् ।
करणैर्वेष्टिताद्यैश्च कृताङ्गपरिवर्तनम् ॥ २२१ ॥

दक्षिणादि क्रमान् कुर्वन् समानुभयतोगतीन् ।
नृत्येद् ध्रुवेणाभिनयं हस्तकैः सुमनोहरम् ॥ २२२ ॥

उद्ग्राहाभोगनृत्यान्ते उद्ग्राहादौ समापयेत् । इति ध्रुवनृत्यम्
मण्ठकस्य सकृन्नृत्ये उद्ग्राहं मण्ठताळतः ॥ २२३ ॥

द्विस्त्रिश्चतुर्वा ध्रुवक माभोगस्तु सकृद्यदा ।
विचित्रहस्तकैर्न्यासं ध्रुवादौ पुनराचरेत् ॥ २२४ ॥

योज्यं तदा मण्ठनृत्यं सौष्ठवाधिष्ठितं शुभम् ।
इति मण्ठनृत्यम्
रूपकेतु यदोद्ग्राहाभोगयो र्गीतयो र्द्रुतम् ॥ २२५ ॥

ततो नृत्येत् ध्रुवे गीतं द्रुतादिलयसंयुतम् ।
तदा रूपकनृत्यं स्यात् ताळे रूपकसंज्ञके ॥ २२६ ॥
इति रूपक नृत्यम्

झंपाताळे गीयमाने मध्यमानेन नर्तकः ।
यदिनृत्येत्समां चेद्दं दूरपादप्रचारणम् ॥ २२७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लसत्कलासलास्याङ्गो यो नटः पाणिभिस्तदा ।
झंपाताळादि नृत्यं स्यात्कलासैरान्तरान्वितम् ॥ २२८ ॥

इति झंपाताळ नृत्यम् ।

तृतीयाख्येन ताळेन द्रुतमानेन यो नटः ।
यदाभिनेयवशगैः करैरतिमनोहरैः ॥ २२९ ॥
लास्याङ्गैरन्वितैः कैश्चित्कलासैरपि नृत्यति ।
तदा तृतीय नृत्यं स्यान्नृत्यं विद्वत्सुखावहम् ॥ २३० ॥

इति तृतीय नृत्यम्

अड्डताळेन ताळेन यदोद्ग्राहादि धातुषु ।
गीयमानेषु नृत्येयुः विलम्बितलयाश्रयम् ।
गीयमाने ध्रुवे कैश्चित् करैरतिमनोहरैः ॥ २३१ ।
तदाऽड्डुताळनृत्यं स्यात्सामाजिक मनोहरम् ।

इत्यड्डुताळ नृत्यम् ।

एकताल्यभिधे गीते गीयमाने यदा द्रुतम् ॥ २३२ ॥
मध्ये मध्ये भ्रमरिकाप्रयोगं चालकान्वितम् ।
गीताकलासेनालापं लसल्लास्याङ्गसंयुतम् ॥ २३३ ॥
विविधं नर्तनं कुर्यादेकताल्यानुगं यदा ।
नृत्यं विचित्रया रीत्या तदाजनमनोहरम् ॥ २३४ ॥

इत्येकताळी नृत्यम् ।

Sl. 201-233) Gita Nritya and its varieties. Here ends the Suddha paddhati or classical dance.

சு. 201-233 கீத ந்ருத்யம் - அதன் வகைகள். இதனுடன் 'சுத்த பத்ததி' என்ற நர்த்தன விவரம் முடிந்தது.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति शुद्धपद्धतिः ।

अथ देशीनृत्यविधिः ।

तत्र चिन्दुनृत्यम् ।

विडचिन्दु:कालचारीचेतिचिन्दुर्द्विधाभवेत् ।
पदपिल्लमुरूयत्र निबद्धोविडचिन्दुकः ॥ २३५ ॥

तत्र जात्यनुकारेण कालचारीति कीर्तितः ।
तानताल्सुलतुङ्ग घर्घरीध्वनिपेशलम् ॥ १३६ ॥

वादिते तुडिकेचिन्दुगीतेन यतिपूर्वकम् ।
तत्तज्जातियुतं नृत्यं नानागतिविचित्रितम् ॥ २३७ ॥

चारुपाटानुगं चचत्किंङ्किणीध्वनिपेशलम् ।
कलासैरपिलास्याङ्गै रङ्कजैरन्तरान्तरा ॥ २३८ ॥

धृतहस्तत्रिशूलादि यत्रनृत्यंसमाचरेत् ।
तदाधीरैस्समाख्यातं चिन्दुनृत्यं मनोहरम् ॥ २३९ ॥

यत्रोद्ग्राहध्रुवपदे बद्धे द्राविडभाषया ।
तद्गीतं चिन्दुसंज्ञंस्यात् आभोगेनविवर्जितम् ॥ २४० ॥

इति चिन्दुनृत्यम् ।

अथ देशीकट्टरीविधिः

उड्डुकेवाद्यमानेतु यत्रनृत्यं धृताञ्चलम् ।
रङ्गं प्रविश्य तदनु नान्दीमभिनयेत्ततः ॥ २४१ ॥

नृत्यशब्देन लास्याङ्ग युक्तेन तदनन्तरम्
आलापेनलसत्तुङ्ग सुललास्याङ्ग सुन्दरम् ॥ २४२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विचित्रचरणं साक्षाद्रागमूर्तिमिवाङ्गकैः ।
दर्शयन् विविधं नृत्यं लास्यलीलामनोहरम् ॥ २४३ ॥

ततः पिल्लमुरूनृत्यं मध्ये मध्ये यथोचितम् ।
धरूमि हर्षविभावाभ्यां लयतालानुसंगतम् ॥ २४४ ॥

कोमळाङ्गैरन्वितं च नर्तनं तनुयात्ततः ।
वाद्याक्षरैर्निर्मितं च नृत्यन्तुद्रुतमानतः ॥ २४५ ॥

पुनः पिल्लमुरूपद्या नृत्यं च विधिपूर्वकम् ।
पुनः शब्दाक्षरैर्नृत्यं सूळूपेन यथोचितम् ॥ २४६ ॥

रचयेदथ शब्देन द्विरावृत्तपदेन च ।
विधाय नर्तनं चारुशब्देन्यासं समाचरेत् ॥ २४७ ॥

एवं कर्तरि नृत्ये च यथायोग्यं समाचरेत् ।
नियमात्कर्तरि ज्ञेया रसिकानां सुखप्रदा ॥ २४८ ॥

मल्लिकामोदनामापि प्रसिद्धा लक्ष्यदृष्टितः ।
अद्री तुडुकपर्याया नृत्यज्ञैः कथिता यतः ॥ २४९ ॥

आलापो यत्र नृत्येत धरूणां यत्र नर्तनम् ।
स्वरपङ्क्तिसमायुक्तं सुळूपं पदमेव च ॥ २५० ॥

क्रमेण व्युत्क्रमेणाथ नर्तनं कट्टरिमंता ।
बन्धनापरपर्यायाः कथिता नृत्यवेदिभिः ॥ २५१ ॥

तत्तत्कारादिकैः पाटैरेकतारत्यादिभिर्युतम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धात्वादिरहितं गीतं आलापः परिकीर्तितः। अथवा
रागालापनमालप्तिः प्रकटीकरणं मतम् ॥ २९२ ॥

इति आलापः।

भाषयाचांध्रयानित्यं ध्रुवधातुविनिर्मिता।
उद्ग्राहाऽऽभोगरहिता धरू तदज्ञैर्निरूपिता ॥ २९३ ॥

धरू वेदमिताकेचिदन्ये बाणाङ्क संम्मिता।
नस्वीकुर्वन्ति नियमं लक्ष्यानियमदर्शनात्। ॥ २५४ ॥

इति धरू।

पदमेकं ताळहीनं बद्धं तैलङ्गभाषया।
पूर्वस्वरोच्चार्यमाणं यदेकयतिसंयुतम् ॥ २५९ ॥

पद्दिः साकथिता तदज्ञैः विदग्धानां मनोहरा।
किन्नरी ताळयुक्तं च तेन शब्देन नर्तनम् ॥ २६३ ॥

मृदङ्गादियुतं यत्स्यात् सुरूपं तन्निगद्यते।
ततैर्विरचितं यद्वा सर्वदा सुखदं भवेत् ॥ २९७ ॥

कर्णाट भाषया बद्धैर्यदुद्ग्राहादिभिर्युतम्।
ताळेन येन केनापि युतं तत्पदसंज्ञकम् ॥ २९८ ॥

सामान्य लक्षणमिदं कथितं लक्ष्यदृष्टितः।
अन्येऽपि कट्टरेर्भेदाद्रष्टव्या जतिपोषिताः ॥ २९९ ॥

इति कट्टरिनृत्यम्।

विधुतं कम्पितं यत्र स्याद्रेचकचतुष्टयम्
शिरोग्रीवाहस्तपाद कम्पनं रेचकं विदुः ॥ २६० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आन्ध्र कर्णाट भाषाभिर्युतं च ध्रुवधातुना
लास्यकैलमुरूमत्यं कलाकोविदरञ्जकम् ॥ २६१ ॥

वैपोताख्यं तदानृत्यं रसजं दृष्टिसौख्यदम् । इति वैपोताख्यम्

अथ बन्धनृत्यम् ।

यत्रपात्रे उभेयुक्ते नृत्येते करणैस्तदा ।
यथामिथो भुजौहस्तौ पादावपि तथा तयोः ॥ २६२ ॥

रमणीयाकृतिर्यद्वा त्रीणि चत्वारिवा तथा ।
यद्वासुन्दररूपाणि त्रीणि चत्वारि पञ्चच ॥ २६३ ॥

यत्रनृत्यन्ति तन्नृत्यं बन्धपूर्वकनृत्यकम् ।
बन्धनृत्ये विलासिन्याः प्राधान्यं तु विशेषतः ॥ २६४ ॥
इति बन्ध नृत्यम् ।

अथ कल्पनृत्यम् ।

किञ्चित्करणमाश्रित्य स्थानकं वा यथेप्सितम् ।
एषां न्यासविधिं कुर्यात्प्रायो नृत्यविचक्षणः ॥ २६५ ॥

प्रायशो गीतनृत्येतु कल्पतालौ बुधैर्मतौ ।
यतोविनाऽऽभ्यो नोभाति नृत्यं सर्वाङ्गसुन्दरम् ॥ २६६ ॥

यो गीताद्यपदस्यादौ तदन्तस्पर्शरञ्जकः ।
अपरस्यपरस्यादौ सकल्प इति कथ्यते ॥ २६७ ॥
इति कल्पनृत्यम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यवन्याभाषया युक्तं यत्र गीतं धृताञ्चलम् ।
कौलादिगजरा युक्तं माहंगेन विभूषितम् ॥ २६८ ॥

विदध्यान्नर्तनं नानालयत्रय विचित्रितम् ।
कोमलाङ्गैर्यदानृत्यं भ्रमर्यादिविराजितम् ॥ २६९ ॥

सशब्दादिक्रियायत्न ध्रुवझंपादिभेदतः ।
यत्न चेष्टाविरहितं नृत्यं तज्जकरिमतम् ॥ २७० ॥

पारसीकैः पण्डितैश्चोद्ग्राहादि स्वस्थभाषया
यद्गीतं जकरीसंज्ञा यवनानामतिप्रियम् ॥ २७१ ॥

इति जकरी

गीयमाने ध्रुवपदे गीतेहावमनोहरे ।
नर्तनं तनुयात्पात्रं कान्ताहास्यादिदृष्टिजम् ॥ २७२ ॥

नानागतिलसद्भाव मुखरागादिसंयुतम्
सुकुमाराङ्गविन्यासं दन्तोद्योतितहावकम् ॥ २७३ ॥

खण्डमानेन रचितं मध्ये मध्येचकम्पनम्
यत्र नृत्तं भवेदेवं ध्रुपदाख्यं तदाभवेत् ॥ २७४ ॥

प्रायशोमध्यदेशीय भाषयायत्र धातवः ।
उद्ग्राह ध्रुवकाभोगास्त्रय एतेवदन्तिते ॥ २७५ ॥

उद्ग्राहवर्जितं केचित्परेत्वाभोगवर्जितम्
उद्ग्राहाभोगरहितमन्वर्थमपरेजगुः ॥ २७६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्यादक्षिभ्रूविकारादि शृङ्गाराकृतिसूचकम् ।

इति वैपोताख्यं नृत्यं ।

अथ पेरणी ।

भस्मादि श्वेतलिप्ताङ्गो बिभ्रन्मुण्डशिरश्शिखाम् ॥ २७७ ॥

भ्राजद्घर्घरिकाजालजङ्घः शारीरपेशलः ।
पञ्चाङ्गकुशलस्ताल कलालयविचक्षणः ॥ २७८ ॥

पद्धत्यामेवोच्चरन् पाटान् योनृत्यति सपेरणी ।

अथ गोण्डली

वाद्यप्रबन्धैः कठिनैस्त्यक्तमेलादिभिस्तथा
गीते सालगसूडस्थैः प्रबन्धैश्चध्रुवादिभिः ॥ २७९ ॥

लास्याङ्गैरचितं यत्र नृत्यंचद्रुतमानतः ।
स्वयंगायतिवाद्यंच त्रिवलींवादयेत्स्वयम् ॥ २८० ॥

तत्पात्रं गोण्डली, केचित् वादनं नास्यमन्वते ।
त्रिवलीधारणं स्कन्धे ग्राम्यत्वंकुरुतेस्त्रियः ॥ २८१ ॥

अगायन्तीव शारीरा सैवस्यान्मूकगोण्डली ।

इति गोण्डली

गोण्डल्यामण्डनं प्रोक्तं तद्ज्ञैःकर्णाटदेशजम् ॥ २८२ ॥

इति श्रीमत्पण्डितलक्ष्मीधरसुतचतुरदामोदरविरचिते

सङ्गीतदर्पणे नृत्ताध्यायः सप्तमः ।

॥ समाप्तश्चायं ग्रन्थः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Printed by S. KRISHNASWAMY, M. A.,
At The Kalyan Press, 12-A Madura Road, Tiruchirapalli

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Printed at
The Kalyan Press, Tiruchi.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi